संस्कृत-निबन्ध-चन्द्रिका

डॉ० राकेश शास्त्री

दिल्ली संस्कृत अकादमी के सहयोग से प्रकाशित -

संस्कृत -निबन्ध -चन्द्रिका

लेखक :

डॉ. राकेश शास्त्री

अध्यक्ष, संस्कृत-विभाग

हरिदेव जोशी राजकीय कन्या महाविद्यालय

बाँसवाडा (राज.)

धर्म-नीराजना प्रकाशन ,दिल्ली

प्रकाशक :
धर्म-नीराजना प्रकाशन
११४,समाचार अपार्टमेण्ट्स
दिल्ली -९१

सर्वाधिकार सुरक्षित

प्रथम संस्करण :२००३

824
शाद्द | रा | सं

मूल्य : चालीस रूपये मात्र

हमारे संस्कृत विषयक प्रकाशन
•स्नातक संस्कृत सरला
•नीतिशतकम्
•ऋक्सूक्त चन्द्रिका
•बृहदारण्यकोपनिषद् (तृतीय अध्याय)
•सुगम संस्कृत व्याकरण
•मनुस्मृति (द्वितीय अध्याय)
•शुकनासोपदेश
•कठोपनिषद् (प्रथम अध्याय)
•किरातार्जुनीयम् (प्रथम सर्ग)
•भारतीय दर्शन की मूल अवधारणाएं
•स्वप्नवासवदत्तम्
•श्रीमद्भगवद्गीता(१,२ अध्याय)
•अपरीक्षितकारकम्
•काव्यदीपिका (अष्टम शिखा)
•भारतीय संस्कृति के तत्त्व
•बृहद्दृक्सूक्त चन्द्रिका
•संस्कृत-बोध-कथा-मञ्जरी
•सांख्यकारिका

मुद्रक :
हिमांशु प्रिन्टर्स
मेन यमुना विहार रोड , मौजपुर
फोन : २२६०७९४

यत्किञ्चित्

यह अत्यन्त प्रसन्नता का विषय है कि आजकल छात्रों में संस्कृत के प्रति रुचि जाग्रत हुई है,किन्तु साथ ही यह चिन्ता का विषय भी है कि यह रुचि केवल परीक्षा में श्रेष्ठ अंक प्राप्त करने तक ही सीमित प्रतीत होती है। ऐसा प्रतीत होता है कि महाविद्यालय में छात्र-छात्राएं केवल अच्छे अंक प्राप्त करने के लिए ही संस्कृत विषय को स्नातक स्तर पर लेते हैं।

इन छात्रों को श्रेष्ठ अंकों का आकर्षण संस्कृत के प्रति आकर्षित तो करता है,किन्तु बाद में वे इसकी कठिनता को देखते हुए बहुत घबरा भी जाते हैं। विशेष रूप से व्याकरण और निबन्ध के प्रति वे अत्यन्त जटिलता का अनुभव करते हुए परीक्षा में या तो इसे छोड देते हैं या फिर यों ही कुछ करके स्वयं को परीक्षक की दया पर छोड देते हैं।

किन्तु यह स्थिति शोभनीय नहीं है। व्याकरण एवं निबन्ध में अनेक पुस्तकें विद्वानों द्वारा लिखी गई । प्रयास तो उन सभी का यही रहा कि उनकी कृति छात्रों को सरलतापूर्वक मार्गदर्शन कर सकेगी,किन्तु अत्यन्त सरलता के आदी हमारे छात्र उनकी सरलतम कृतियों को भी कठिन समझ बैठे।

उनकी दृष्टि सदैव ही ऐसी नई पुस्तक को प्राप्त करने की रहती है जो उन्हें अत्यन्त प्यार की भाषा में विषय को सरल ढंग से समझा सके,उनकी विषय के प्रति कठिनाई की भावना को दूर कर सके तथा विषय में उनकी रुचि बढा सके।

मेरा यही प्रयास 'सुगम संस्कृत व्याकरण 'की रचना करते समय रहा तथा यही दृष्टि इस निबन्ध की पुस्तक लेखन में भी रही । मैंने संस्कृत निबन्ध की अनेक पुस्तकों का अवलोकन किया । उनमें से कुछ विद्वानों ने विषय के प्रतिपादन की अपेक्षा भाषालालित्य के मोह के कारण पुस्तक को जटिल बना दिया तो कुछ पुस्तकें स्नातक स्तरीय छात्रों के लिए विषय प्रतिपादन की दृष्टि से अपर्याप्त प्रतीत हुई।

अत: मैंने छात्रों की सुविधा को दृष्टिगत रखते हुए संस्कृत निबन्ध की पुस्तक लिखने का मन बनाया । ईश्वर की परम अनुकम्पा से यह लघु कृति आपके हाथों में है। मेरा लघु प्रयास कितना सफल है ,इसकी पुष्टि तो छात्र ही करेंगे। पुनरपि संस्कृत निबन्ध लेखन के प्रति यदि यह कृति छात्रों में थोडी सी रुचि भी उत्पन्न कर पाती है तो मैं इसे अपना परम सौभाग्य समझूँगा।

एक बात और विषय की सरल भाषा में प्रस्तुति की दृष्टि से इसमें संधियों के प्रति मोह का अंशत: परित्याग किया गया है ,क्योंकि जहां पढने में प्रवाह में बाधा न हो तथा पदों का मूल स्वरूप भी सहजरूप में ही समझ में आ जाए ,उन स्थलों पर ही केवल संधि की गई है।

सम्भव है विद्वानों को यह स्वीकार्य न हो एतदर्थ मैं उनके प्रति क्षमाप्रार्थी हूं क्योंकि इसमें मेरी यही भावना प्रमुखरूप से रही है कि छात्र निबन्ध को पढकर रटने की अपेक्षा सरल भाषा में उसे हृदयङ्गम करके पुन: अपनी भाषा बनाकर सरलरूप में प्रस्तुत कर सकें।

अन्त में मैं उन श्रेष्ठ एवं वरिष्ठ विद्वानों के प्रति श्रद्धा से अवनत हूँ ,जिनकी कृतियों से इस पुस्तक के लेखन में सहायता प्राप्त हुई। यद्यपि प्रूफ संशोधन में अत्यन्त सावधानी रखी गई है तथापि कुछ त्रुटियां यदि रह गई हों उनके लिए मैं क्षमाप्रार्थी हूं। साथ ही इस विषय में मेरा आग्रह है कि कृपया त्रुटियों की ओर ध्यान दिलाने का अनुग्रह करें जिससे अग्रिम संस्करण में उन्हें सुधारा जा सके ।

दिल्ली संस्कृत अकादमी के सहयोग से यह लघुकृति प्रकाशित हो सकी , इसके लिए परम श्रद्धेय अग्रज डॉ.श्री कृष्ण सेमवाल एवं चयनसमिति के मान्य पदाधिकारियों का हृदय से आभारी हूँ। आशा है आगे भी उनका सहयोग, आशीर्वाद एवं प्रोत्साहन इसी प्रकार प्राप्त होता रहेगा।

इति शुभम्।

राकेश शास्त्री

१६ जून , २००२
१-जे-३८,शास्त्रिनिलयम्
हाउसिंग बोर्ड कालोनी ,
बांसवाडा (राज.) ३२७००१
दूरभाष - ०२९६२/२५००२६

समर्पणम्

संस्कृत के प्रचार-प्रसार के लिए
पूर्णतया समर्पित
परम श्रद्धेय ,अग्रज -

डॉ. श्री कृष्ण सेमवाल

सचिव
दिल्ली संस्कृत अकादमी

के कर-कमलों में
सादर -

डॉ.राकेश शास्त्री

यत्किञ्चित्

अतीवप्रसन्नताया: विषयोऽयं यत् अद्यत्वे छात्रेषु संस्कृतं प्रति रुचि: जायते ,किन्तु चिन्ताया: विषयोऽयं यत् एषा रुचि: केवलं परीक्षायां श्रेष्ठाङ्कान् प्राप्नाय खलु सीमिता। प्रतीयते यत् एते स्नातकस्तरे केवलं श्रेष्ठाङ्कान् प्राप्त्यर्थमेव गृह्णन्ति संस्कृतम् । यद्यपि कारणमेतत् तान् सर्वान् आकर्षति तु संस्कृतं प्रति , तथापि अनन्तरं ते अस्या: काठिन्यं विचार्य अतीव व्याकुला उद्विग्नमना: च जायन्ते , विशेषेण व्याकरणं प्रति संस्कृत निबन्धान् प्रति खलु ते अतीव चिन्तातुरा: भवन्ति । अत: ते प्राय: ईदृशान् प्रश्नान् त्यजन्ति ,किंवा येन केन प्रकारेण यत् किमपि लेखित्वा स्वं परीक्षकस्य कृपायै त्यजन्ति खलु, स्थितिरेषा नैव शोभनीया ।

अनेनैव कारणेन तेषां दृष्टि: ईदृशानि पुस्तकानि प्रति भवति ,यानि तान् सर्वान् सरलतया संस्कृतव्याकरणस्य ज्ञानं कारयेयु: । यद्यपि अनेकै: विद्वद्भि: अनेकानि ईदृशानि पुस्तकानि लिखितानि येषु संस्कृतव्याकरणस्य संस्कृतनिबन्धलेखनस्य च प्रशिक्षणं प्रदत्तं वर्तते ,किन्तु तै: न खलु छात्रा: संतुष्टा: प्रतीयन्ते , इति अनुभूतं मया । यतोहि अस्माकं छात्रा: अतीव सारल्यं वाञ्छन्ति , अनेनैव ते ईदृशानि सरलानि पुस्तानि अपि कठिनमस्ति , इति विचारयन्ति ।

अनेन उद्विग्नमना: ते सदैव सरलानां पुस्तकानां प्रतीक्षां कुर्वन्ति । अनेन खलु पुस्तकेऽस्मिन् मम प्रयासोऽयमेव अस्ति , यत् ईदृशा: छात्रा: पुस्तकेऽस्मिन् स्वं वाञ्छां प्राप्नुयु: । ते सर्वे संस्कृतं प्रति काठिन्यभावानां त्यजेयु: ,इति । एतत् विषयं प्रति तेषां स्वाभाविकी रुचि : स्यात् ।

एतद् विचार्य खलु मया पुस्तकलेखनस्य मन: कृतम् । ईशानुकम्पया च कार्योऽयं भवतां समक्षे वर्तते। कार्यमेतत् कीदृशमिति छात्रा: ,अस्य विषयस्य विद्वांसश्चैव कथयिष्यन्ति,तथापि मया पुस्तकेऽस्मिन् पदे –पदे सन्धिकार्यं न कृतं विद्यते ,नैव च भाषायां लालित्यमोह: स्वीकृत: । वस्तुत: मया तत्रैव सन्धिकार्यं कृतम् , यत्र सरलतया शब्दानां प्रतीति: स्यात्।

दिल्ली संस्कृत अकादम्या: अस्या: लघुकृत्या: प्रकाशनार्थं यदार्थिक सहाय्यं कृतम् , तदतीव महत्त्वपूर्णम् , एतदर्थमहं तस्या: अधिकारिण: प्रति विशेषत: डॉ. श्री कृष्ण सेमवाल महाभागं प्रति कृतज्ञताज्ञापनं पुनीतं कर्त्तव्यं महनीयं मन्ये । आशासे भविष्येऽपि एवमेव सहाय्यं प्राप्स्यामि तेषां महानुभावानाम् , इति।

१६ जून , २००२

डॉ. राकेश शास्त्री

१-जे-३८, हाउसिंग बोर्ड कालोनी ,
बांसवाडा (राज.) ३२७००१
दूरभाष - ०२९६२/२५००२६

विषयसूची

		पृष्ठसंख्या
यत्किञ्चित्		--- ३
समर्पणम्		--- ५
विषयसूची		--- ७
१.	संस्कृतस्य महत्त्वम्	---- ९
२.	विद्या	---- १०
३.	भारतीया संस्कृतिः	---- १२
४.	सत्संगतिः	---- १३
५.	परोपकारः	---- १४
६.	उद्योगः	---- १६
७.	सत्यम्	---- १८
८.	सदाचारः	---- १९
९.	देशभक्तिः	---- २१
१०.	अहिंसा परमो धर्मः	---- २२
११.	अस्माकं प्रियकविः	---- २४
१२.	अस्माकं प्रियनेता	---- २६
१३.	महात्मागान्धिः	---- २८
१४.	अस्माकं देशः	---- २९
१५.	अस्माकं महाविद्यालयः	---- ३१
१६.	विद्यार्थिजीवनम्	---- ३२
१७.	ग्राम्यजीवनम्	---- ३४
१८.	पुस्तकालय	---- ३५
१९.	वसन्तर्तुः	---- ३६
२०.	ग्रीष्मर्तुः	---- ३८
२१.	वर्षर्तुः	---- ३९
२२.	शरद्ऋतुः वर्णनम्	---- ४१
२३.	प्रातःकालः	---- ४२
२४.	हिमालयः	---- ४४
२५.	राष्ट्रभाषा	---- ४५
२६.	दीपावली	---- ४६
२७.	विजयादशमी	---- ४८
२८	होलिकोत्सवः	---- ४९
२९.	स्वतन्त्रतादिवसः	---- ५०

३०.	गणतन्त्रदिवसः	---- ५२
३१.	गुरोर्महिमा	---- ५३
३२.	छात्राणां कर्तव्यानि	---- ५४
३३.	अनुशासनम्	---- ५६
३४.	समाजसेवा	---- ५७
३५.	भारतीयसंस्कृतौ नारी	---- ५९
३६.	दूरदर्शनस्य लाभाः	---- ६०
३७.	चलचित्रम्	---- ६२
३८.	विज्ञानं वैज्ञानिकाः आविष्काराश्च	---- ६३
३९.	पर्यावरणस्य रक्षणोपायाः	---- ६५
४०.	उद्यानम्	---- ६६
४१.	महाराणाप्रतापः	---- ६७
४२.	शङ्कराचार्यः	---- ६९
४३.	महर्षिः दयानन्दः	---- ७०
४४.	स्वामीविवेकानन्दः	---- ७२
४५.	लालबहादुरशास्त्री	---- ७३
४६.	संघे शक्तिः कलौ युगे	---- ७४
४७.	मदिरापानस्य दूषणानि	---- ७६
४८.	दानस्य महिमा	---- ७७
४९.	महाकविःभारविः	---- ७९
५०.	महाकविःभवभूतिः	---- ८१
५१.	महाकविः बाणः	---- ८३
५२.	उपमा कालिदासस्य	---- ८४
५३.	भारवेरर्थगौरवम्	---- ८६
५४.	दण्डिनः पदलालित्यम्	---- ८८
५५.	माघे सन्ति त्रयो गुणाः	---- ९०
५६.	नैषधं विद्वदौषधम्	---- ९२
५७.	बाणोच्छिष्टं जगत्सर्वम्	---- ९४
५८.	कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्	---- ९६
५९.	एको रसः करुण एव	---- ९८
६०.	कालिदासस्य नारी भावना	---- १००
६१.	आधुनिकयुगे संस्कृतस्य महत्त्वम्	---- १०२

◆ ◆ ◆

संस्कृतस्य महत्त्वम्

अस्मिन् संसारे अनेकानां भाषाणां प्रयोगो भवति । वस्तुतः भाषा भावानाम् अभिव्यक्तिमात्रिका भवति, किन्तु यदापि यस्यापि भाषायां अधिकाधिकस्य उपयोगी साहित्यस्य निर्माणं भवति, तदानीमेव तस्याः भाषायाः महत्त्वं वर्धते। एतत् सर्वं संस्कृतस्योपरि अक्षरशः परिघटते ।

इयं भाषा न केवलं भारतवर्षस्य, अपितु विश्वस्य प्राचीनतमा भाषा, अतएव अस्याः महत्त्वमतीव वर्तते । अस्यां भाषायां सर्वाधिकस्य वाङ्मयस्य संरचना जाता , एषा भाषा अतीव वैज्ञानिकी च विद्यते ।अस्याः पाणिनीयं व्याकरणमतीव वैज्ञानिकमस्ति ।संस्कारयुक्ता परिष्कृता चेयं भाषा 'संस्कृत'इति कथ्यते ।अस्याः अन्यत् नाम देवभाषा, देववाणी, सुरवाणी, गीर्वाणवाणी चाप्यस्ति ।एभिरपि अस्याः भाषायाः महत्त्वं परिवर्धते ।

'विद्वांसो हि देवाः' अनेनैव कथनेन भाषा एषा देववाणी अस्ति, कुतः पूर्वकाले एषा भाषा विद्वद्भिः परस्परदैनिकव्यवहारे प्रयुज्यते स्म । विश्वस्य सर्वाधिक प्राचीनतमः ग्रन्थः ऋग्वेदोऽस्यामेव भाषायां निबद्धोऽस्ति। यदि वयं प्राचीनज्ञानविज्ञानसंस्कृतिं प्रति जिज्ञासवः भवेम , तर्हि संस्कृतभाषा खलु अस्माकं सहाय्या भविष्यति , एतदर्थं अस्या एव भाषायाः अध्ययनं अपेक्षितं अस्ति।

संस्कृतभाषा न केवलं भारतवर्षस्य, अपितु विश्वस्य अनेकानां भाषाणां जननी अस्ति। भारतवर्षः अनेकतायाः उदाहरणरूपः देशो विद्यते, यदि वयं अनेकतायां एकतायाः परिदर्शनं कर्तुं वाञ्छामः, यदि वयं भाषागतवैमनस्यं दूरीकर्तुमिच्छामः, तर्हि अस्माभिः भाषा एषा वर्तमानसमये राष्ट्रभाषारूपेण प्रतिष्ठिता कर्तव्या।

वस्तुतः इयं भाषा खलु सर्वेषां भारतीयानां मानसं एकस्मिन् सूत्रे निबद्धं कर्तुं शक्यते । संस्कृतभाषायाः साहित्यभण्डारोऽपि विपुलः ज्ञानविज्ञानसम्पन्नोऽस्ति । सम्पूर्णं वैदिकं साहित्यं आध्यात्मिकज्ञानविज्ञानस्याकरो वै वर्तते । महाभारतं रामायणञ्च द्वे अस्याः भाषायाः महत्त्वपूर्णे रत्ने स्तः।

महाकवि-कालिदास-भवभूति-माघ-हर्ष-चरक-सुश्रुत-कणाद-गौतम-आर्यभट्टादीनाम् अनेकेषां विदुषां कृतिभिः भाषा एषा समृद्धा विद्यते । राजनीतेः अप्रतिमो ग्रन्थः 'कौटिल्यार्थशास्त्रम्' ,मनुविरचिता 'मनुस्मृतिः'च अस्यामेव भाषायां विरचिता अस्ति। माधुर्यमस्याः भाषायाः महत्त्वपूर्णा विशेषता , अनेनैव कथ्यते विद्वद्भिः 'भाषासु मधुरा रम्या दिव्या गीर्वाण-भारती' ।

उपर्युक्तेन संक्षिप्तेन विवरणेन स्पष्टमेतत् भवति यत् संस्कृत-भाषायाः अनेकदृष्टिभिः अत्यधिकं महत्त्वमस्ति ।अतः अस्माकं भारतवासीनां पुनीतकर्तव्यमेतत् यत् स्व गौरवास्पदमतीतमाधृत्य भविष्यनिर्माणाय संस्कृतस्य प्रचारस्य प्रसारस्य प्रयासो विधेयः।

संस्कृतस्य खलु उन्नतिभिरस्माकं सर्वेषामुन्नतिः सम्भाविता ।ये जनाः स्वराष्ट्रस्य गौरवपूर्णमितिहासं स्मरन्ति ते खलु सफलतायाः चरमोत्कर्षं लभन्ते ।

◆◆◆

विद्या

ज्ञानार्थकाद् 'विद्' धातोः 'क्यप्' कृत्वा स्त्रीप्रत्ययः ' टाप्' इति संयुज्य विद्या शब्दो निष्पद्यते । मानवजीवने विद्यायाः महत्त्वमतीव वर्तते । विद्ययैव जनः संसारेऽस्मिन् सुखान् सर्वान् लभते, न केवलं मृत्युलोके अपितु परलोकेऽपि सः विद्यया खलु सुखसम्पन्नो भवति । अनेनैव कारणेन शास्त्रेषु अस्माकं कथ्यते –

'विद्ययाऽमृतमश्नुते' ' विद्यया विन्दतेऽमृतम्'

विद्यायाः अभावे मनुष्यः पशुतुल्यः । विद्या मानवस्य प्रच्छन्नं धनमस्ति । विद्ययैव जनाः संसारेऽस्मिन् यश-सुख-भागिनः भवन्ति । यदि मनुष्यः विदेशं गच्छेत्,तर्हि विद्या खलु तस्य सर्वाधिकं श्रेष्ठं मित्रं भवति । अनेनैव कारणेन महाकविना भर्तृहरिणा कथितम्–

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नं गुप्तं धनं,
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूजिता न हि धनं विद्याविहीनः पशुः।।

संसारेऽस्मिन् विद्या वस्तुतः अतीवाद्भुतं धनमस्ति,कुतः अन्यानि धनानि व्यये कृते विनष्टानि भवन्ति, किन्तु विद्या नामकं धनमेतत् तु व्यये कृतेऽपि निरन्तरं वर्धते, सञ्चयात् खलु विनष्टं भवति ।उक्तञ्च–

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति,क्षयमायाति सञ्चयात् ।।

विद्या नामकस्य धनस्यास्यैका अन्यापि विशेषता,कोऽपि चौरः एनं धनं चोरयितुं न शक्यः,नैव धनमेतत् राजाऽपि बलपूर्वकं ग्रहीतुं शक्यते ,एवमेव धनमेतत् भ्रातृभिः नैव विभज्यते, भारोऽपि खलु नैव भवति धनेऽस्मिन् ,अनेनैव धनमेतत् अन्येषु धनेषु मुख्यतां भजते । उक्तञ्च–

न चौर्यहार्यं न च राज्यहार्यं,
न भ्रातृभाज्यं न च भारकारि ।
व्ययेकृते वर्धत एव नित्यं ,
विद्याधनं सर्वधनं प्रधानम् ।।

विपत्सु पतितोऽपि विद्वज्जन: सरलतापूर्वकं निस्सरति स्व विद्याबलेन,किन्तु मूर्खस्तु विनाशमेव लभते । न केवलमेतदपितु विद्वान् विद्यया ग्रामं,स्वदेशं, समाजं,राष्ट्रमपि च रक्षति,किन्तु मूर्खोजन: एकल एव स्व मूर्खतावशात् सम्पूर्णं वै राष्ट्रं विनश्यति।

विद्यामेवाधिकृत्य विश्वस्यानेके देशा: स्वप्रभावं स्थापितं कर्तुं समर्था: जाता: । वर्तमानसमये तेषां देशानां प्रभाव: वर्चस्वं वा सर्वत्र खलु प्रसरति । वस्तुत: विद्या मनुष्यं मातावत् रक्षति,पितातुल्य: हितकारिषु विषयेषु नियुज्यते, मानवस्य विषादं दूरीकृत्य कल्पलतेव सुखीकरोति । अतएव केनचित् कविना सम्यक् एव कथितम्-

मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चाभिरमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं,
किं किं न साधयति कल्पलतेव विद्या ॥

अनया एव विद्यया जनो विनम्रो भवति, अनया खलु मानवेषु शिष्टताया: सञ्चारो भवति । तेषां यशश्चतुर्दिक्षु प्रसरति । अनेनैव कारणेन कविभि: विद्या नृपत्वादपि श्रेयस्करी कथिता -

विद्वत्त्वं च नृपत्वञ्च,
नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा,
विद्वान् सर्वत्र पूज्यते ॥

वस्तुत: राज्ञ: पूजा तु स्वदेशे खलु भवति, यदि स: अन्यत्र गच्छति तर्हि तस्य सम्मानं स्वदेशवत् न भवति,किन्तु विदुष: सम्मानं तु यत्रापि स: गच्छति तत्रैव भवति, विश्वस्य कस्मिन्नपि देशे क्षेत्रे वा । भारतीयसंस्कृतौ मानवजीवनं चतुर्षु आश्रमेषु विभक्तमस्ति, तेषु एवाश्रमेषु प्रथमो ब्रह्मचर्य: आश्रमो विद्यते, अस्मिन्नेवाश्रमे मनुष्य: गुरुसमीपं विनयेन गत्वा विद्यार्जनं कुरुते । विद्यार्थिजीवने स: अथकपरिश्रमं करोति, तदैव स: विद्यारत्नं लभते । अनेनैव कथ्यते विद्वद्भि:-

सुखार्थिन: कुतो विद्या,
विद्यार्थिन: कुतो सुखम् ।
सुखार्थी वा त्यजेद् विद्यां,
विद्यार्थी वा त्यजेद् सुखम् ॥

वस्तुत: भूमण्डलेऽस्मिन् यदपि सत्यं शिवं सुन्दरमस्ति,सर्वमेतत् विद्याया: एव महिमा दृश्यते । विद्याविहीन: जन: विद्वत्समाजे तथैव न शोभते यथा हंसमध्ये बको न शोभनं प्रतिभाति । विद्या मनुष्यशरीरस्य सर्वोत्कृष्टमाभूषणमस्ति,विद्या समं किमपि मानवशरीरस्य कृते अन्यत् आभूषणं न विद्यते ।अत: अस्माभि: सदैव विद्याया: प्राप्त्यर्थं प्रयत्नो विधेय:।

◆◆◆

भारतीया संस्कृतिः

सम् उपसर्गपूर्वकात् कृ धातोः क्तिन् प्रत्ययेन संस्कृतिः शब्दो निष्पद्यते। कस्यापि देशस्य राष्ट्रस्य वा जनैः योऽपि व्यवहारः आचारो वा क्रियते, तत् सर्वं तस्य देशस्य संस्कृतिः कथ्यते।

विश्वस्य सर्वासु संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमा उत्कृष्टा च वर्तते। अस्याः वैशिष्ट्यम् तदेव यत् अनेकैः वैदेशिकैरनेकशः अस्याः विनाशाय प्रयत्नं कृतम्, किन्तु नैवेषा विनष्टा, अपितु अद्यापि अक्षुण्णा एव दृश्यते।

वस्तुतः अस्यां संस्कृतौ ईदृशानि महत्त्वपूर्णानि तत्त्वानि सन्ति कानिचित्, यैरेषा दीर्घकालानन्तरमपि अद्य सर्वोत्कृष्टतामक्षुण्णतां च भजते। अस्याः सम्यक् दर्शनाय अस्माभिः संस्कृतसाहित्यस्य अध्ययनम् अपेक्षितं वर्तते। संस्कृतभाषायां निबद्धं प्रत्येकं काव्यं भारतीय-संस्कृतेरुदात्तरूपं प्रख्यापयति।

भारतवर्षस्य प्रतिग्रामेऽस्याः स्वरूपं द्रष्टुं शक्यते। वस्तुतः अद्यापि वयं स्वसंस्कृतिं प्रति महत्गौरवम् अनुभवामः। अस्याः मूलाधारो ज्ञान-विज्ञानागार-स्वरूपाः वेदाः सन्ति, वेदाश्चाखिल विश्वस्य भूमण्डलस्य वा प्राचीनतमानि पुस्तकानि सन्ति। अनेनैव संस्कृतिरेषा विश्वसंस्कृतिषु प्राचीनतमास्ति। ऋग्वेदे भणितम्-

''सा प्रथमा संस्कृति र्विश्वधारा ''

वस्तुतः इयं संस्कृतिः लोकमङ्गलकारी विश्वबन्धुत्व भावनया च परिपूरिता दृश्यते। अहिंसा अस्याः मूलमन्त्रम् एव अस्ति। परोपकार भावनाभिरेषा परिपूर्णा विद्यते। 'कर्मानुसारमेव पुनर्जन्म भवति' सिद्धान्तेऽस्मिन् अस्याः संस्कृतेः महती आस्था दृश्यते। समन्वयभावना अस्याः महत् वैशिष्ट्यम्। विदेशेभ्यः आगताः बहवः जातयः, अत्रागत्य अनया सह सम्मील्य एकीभूताः सञ्जाताः।

वर्णाश्रमव्यवस्थापि अस्या एका अन्या मौलिकी महत्त्वपूर्णा च विशेषता, अनया व्यवस्थया भारतीयसमाजः चतुर्षु वर्णेषु विभक्तः-'ब्राह्मण-क्षत्रिय- वैश्य-शूद्राः' इति। अस्याः व्यवस्थायाः उद्देश्योऽयं, यत् समाजे विविधेषु कार्येषु सौख्यं स्यात्। प्रारम्भे व्यवस्थैषा कर्माधारिता आसीत्, किन्तु अद्यत्वे जन्माधारिता सञ्जाता।

'मानवस्य सर्वाङ्गीणत्वेन विकासो भवेत्' इति आश्रमव्यवस्थायाः उद्देश्योऽऽसीत्। अनेनैव जनं शतायुं परिकल्प्य तस्य जीवनं चतुर्भागेषु विभक्तं कृतमासीत्, 'ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासश्चेति।' सर्वा एव एषाश्रमव्यवस्था उच्यते। भारतीया संस्कृतिः कृषिप्रधाना संस्कृतिः, अस्यां संस्कृतौ कृषेः महत् महत्त्वमस्ति। अत्र गोः गङ्गायाश्च वैशिष्ट्यं महत्त्वमपि च परिदृश्यते। अत्र तीर्थानां देवानाञ्च वन्दनं भावातिरेकेण भवति।

अस्याः संस्कृतेरेतदेव वैशिष्ट्यम्, यत् यानि यानि वैशिष्ट्यानि अपरेषां संस्कृतीनां

तानि तानि अनया सहजेनैव स्वीकृतानि,आत्मसात् कृतानि वा। अस्यां संस्कृतौ ये जनाः निवसन्ति,ते सर्वे परमं संतोषमनुभवन्ति,कुतः संस्कृतिरेषा यत्रकुत्रापि भेदभावं न परिगृह्णाति। 'वसुधैव कुटुम्बकम्'इति भावनया इयं संस्कृतिः ओतप्रोता च दरीदृश्यते। मानवताया :अत्र पूजा भवति। अस्याः मूलमन्त्रो वै एषोऽस्ति-

सर्वेभवन्तु सुखिनः,सर्वे सन्तु निरामयाः।
सर्वेभद्राणि पश्यन्तु,मा कश्चिद् दुःख भाग्भवेत्॥

◆◆◆

सत्सङ्गतिः

सज्जनानां सङ्गतिः सत्सङ्गतिः कथ्यते।मानवः एकः सामाजिकः प्राणी अस्ति,अनेनैव स एकलः स्थातुं न शक्यते।सत्यं तु एतत् यत् असारे संसारेऽस्मिन् नैव कोऽपि प्राणी संसर्गेण विना भवितुं स्थातुं वा शक्यते।न केवलं एतावत् वनस्पतयोऽपि संसर्गेण एव सुखिनः भवन्ति।एका लता वृक्षेण विना स्वजीवनं सम्यक्रूपेण जीवितुं न शक्यते,सा वृक्षस्यावलम्बनं गृह्णात्येव।

पशुपक्षिणश्च स्वमित्रैः सह उषित्वा एव प्रसन्नाः भवन्ति। वनवासी मृगः अनेनैव कारणेन मृगीं विना व्याकुलो भवति।एवमेव चक्रवाकोऽपि चक्रवाकीं विना जीवितुं न शक्नोति। एतत् सर्वं शास्त्रप्रसिद्धमेव।

कथनस्य तात्पर्यमिदं यत् संसारेऽस्मिन् नैव कोऽपि जीवः एकलः स्वजीवनं धारयितुं शक्यते। यत्र कुत्रापि सः तिष्ठति,उत्तिष्ठति ,खादति,पिबति, स्वपिति,आनन्दञ्चानुभवति, तस्य वातावरणस्य प्रभावः तस्योपरि भवत्येव,नैवात्र काऽपि विप्रतिपत्तिः दृश्यते। वस्तुतः जनः यादृश्यां संगतौ वसति,तादृशः एव प्रभावः तस्मिन् दरीदृश्यते। यदि सः दुष्टैः जनैः सह निवसति तर्हि प्रभावेनानेन सः दुष्टो वै भवति। यदि वा सज्जनानां सङ्गतौ वसति,तर्हि सः सज्जनो भवति। अनेनैव कथ्यते नीतिविद्भिः-

''संसर्गजाः दोषगुणाः भवन्ति''

प्राचीनकाले वाल्मीकिः नाम ऋषिः स्वस्य जीवनस्य प्रारम्भिके काले दस्युरेव आसीत्। सज्जनानां साधूनां वा संगत्या सः मुनिः सञ्जातः, तदनन्तरञ्च महाकविः,रामायणं नाम संस्कृतमहाकाव्यस्य संरचना कृता तेन। सत्सङ्गत्या एव 'कबीर'इति नामकः जनः निरक्षरोऽपि सन्तसमाजे प्रतिष्ठावान् सञ्जातः। अनेकशः मानवः विद्वान् ज्ञानवान् वा भवति,किन्तु तस्य कार्याणि दुष्टानि भवन्ति।ईदृशानां जनानां सङ्गतिः कदापि न विधेया। उक्तञ्च भर्तृहरिणा महाकविना-

दुर्जनः परिहर्तव्यः विद्ययाऽलंकृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयंकरः॥

संसारेऽस्मिन् यदि जनः सुखी भवितुं वाञ्छति,तर्हि तेन सदैव सज्जनानां सङ्गतिः

करणीया।दुष्टेभ्य: जनेभ्य: सदैव दूरीभूयात्।दुष्टानां सङ्गति: कज्जलवत् भवति,यत्र गमने मलिनता अवश्यमेव भवति,एवमेव दुष्टानां संगत्या जनस्य चरित्रमपि मलिनं कलुषितं वा भवति। अनेनैव कथ्यते–

सद्भिरेव सहासीत्,सद्भि: कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्रीं च,नासद्भि: किञ्चिदाचरेत्॥

प्राय: दृश्यते यत् मानव: सुसंस्कारै: विलम्बेन प्रभावितो भवति,दु:संस्कारैश्च स: खलु शीघ्रमेव प्रभवति। अत: अस्माभि: सदैव सावधानो भूत्वा सत्सङ्गति: वै विधेया।स्व मित्राणि पारिवारिकान् सदस्यान् च सदैव दुष्टसंगात् वारयितव्यम्। सत्सङ्गतिस्तु वस्तुत: गुणनिधाना वर्तते। यदि जन: गुणीजनसंसर्गे वसति,नैव तं जनं कस्यापि शिक्षकस्य अध्यापकस्य वा कदापि आवश्यकता प्रतीयते।कुत्रापि च विद्याध्ययनस्य अनिवार्यता नैव,कुत: तस्मिन् स्वयमेव सत्सङ्गत्या प्रभावेण ते सर्वे गुणा: प्रविशन्ति,येन जनेन सह स: वसति। अतएव केनापि कविना सत्यमेव कथितम्–

जाड्यं धियो हरति,सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति,पापमपाकरोति।
चेत: प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गति: कथय किं न करोति पुंसाम्॥

अत: अस्माभि: सदैव सत्सङ्गति: विधेया।

◇◇◇

परोपकार:

परेषां उपकार: परोपकार:,इति कथ्यते।संसारेऽस्मिन् स्व हानिलाभयो: चिन्तां परित्यज्य परेषां हितकरणाय यानि कार्याणि क्रियन्ते तानि सर्वाणि परोपकाराणि कथ्यन्ते। एतादृशाश्च जना: परोपकारिण: भवन्ति।

अस्मिन् जगति द्विधा जना: भवन्ति,केचित् स्वार्थाय जीवन्ति,केचिच्च परार्थाय। स्वार्थिन: यदपि कुर्वन्ति तत्र तेषां कोऽपि स्वार्थो भवत्येव। स्वार्थाभावे तेषां कापि क्रिया न सम्पद्यते,किन्तु ये जना: परोपकारिण: भवन्ति,तेषां सर्वे क्रियाकलापा: खलु अन्येभ्य: प्राणिभ्य: एव भवन्ति। ते लेशमात्रमपि स्वार्थवशात् न चिन्तयन्ति, न किमपि स्वार्थाय कुर्वन्ति। न केवलमेतत् एतादृशा: परोपकारिण: तु स्व प्राणान् अपि अन्येभ्य: जीवेभ्य: ददति। ते जना: वस्तुत: जगत्यस्मिन् मानवताया: कृते आभूषणमेव भवन्ति। विषयेऽस्मिन् महाकविना भर्तृहरिणा अति सुन्दरमुद्धृतम्–

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये निघ्नन्ति निरर्थकं परहितं ,ते के न जानीमहे ॥

प्रसङ्गेऽस्मिन् सत्पुरुषरूपेण महाराज्ञः शिवेः नाम को न जानाति,येन कपोतमात्रस्य जीवितार्थं स्वशरीरस्य मांसमपि विच्छिद्य हस्तेन स्वेनैव तूलिकायां न्यक्षिपत्,अन्ते च स्वयमेव तस्यां तूलिकायां आरोहत्।एवमेव महर्षिः दधिचिः मानवतायाः उपकारार्थं,देवैः प्रार्थनाकृते सति स्व अस्थिनि अपि अददात्। वस्तुतः तेषां जीवनं धन्यं येऽन्येभ्यः जनेभ्यः जीवन्ति। स्वार्थमयी वृत्तिस्तु पशूनाम् भवति। कथितञ्च–

पशवो हि जीवन्ति केवलं स्वोदरम्भराः ।
तस्यैव जीवितं श्लाघ्यं यः परार्थं हि जीवति ॥

परोपकारिणां जीवनं तु परोपकारः एव भवति।ये जनाः परोपकारं कुर्वन्ति,तेषां समाजे सम्मानं भवति,ते सर्वत्र प्रतिष्ठां लभन्ते।अनेनैव महाकवि भर्तृहरिणा कथितम्–

श्रोत्रं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां,
परोपकारैर्न तु चन्दनेन ॥

वस्तुतः सत्यमेव एतत् यत् मानवस्य शोभा परोपकारेण भवति न तु अलङ्कारैः। प्रकृतेरप्युपादानानि,तत् वृक्षः स्यात् नदी वा भवतु,अम्बोदः भवेत्,सूर्यः वा अस्तु,चन्द्रमा अपि वा स्यात्। सर्वेषां एतेषां जीवनं परोपकाराय एव। अनेनैव कथ्यते –

स्वयं न खादन्ति फलानि वृक्षाः,
पिबन्ति नाम्भः स्वयमेव नद्यः ।
धाराधरो वर्षति नात्महेतोः,
परोपकाराय सतां विभूतयः ॥

शास्त्रेषु अपि परोपकारस्य अतीव प्रशंसा कृता विद्यते। अष्टादश पुराणानां कर्ता महर्षिः वेदव्यासोऽपि कथयति –

अष्टादशपुराणेषु व्यासस्य वचनं द्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

ये जनाः परोपकारं कुर्वन्ति,ईश्वरोऽपि तेषां सहाय्यं करोति।वस्तुतः परोपकारः सर्वेषां धर्माणां तत्त्वमेवास्ति। ये जनाः परोपकारिणः भवन्ति,ते यदि पूजामपि न कुर्युः नैव कापि हानि,कुतः भगवान् अपि परोपकारिणं प्रति उदारो भवति। परोपकारी जनः परोपकारं कृत्वा असीमशान्तिं अनुभवति। महाकवि श्रीहर्षदेव प्रणीते 'नागानन्दम्' नाम नाटके जीमूतवाहनो नाम नायकः एतादृशः एव,सः स्वशरीरमपि शङ्खचूडस्य नाम जनस्य कृते दत्त्वा असीमानन्दं अनुभवति। एतादृशाः जनाः वस्तुतः मानवतायाः कृते रत्नतुल्यः एव भवन्ति। वध्यशिलायां स्थित्वा सः जीमूतवाहनः चिन्तयति एवम्–

न तथा सुखयति मन्ये मलयवती मलयचन्दनरसार्द्रा ।
अभिवाञ्छितार्थसिद्ध्यैवध्यशिलेयं यथा स्पृष्टा ॥

अथवा किं मलयवत्या–

शयितेन मातुरङ्के विस्रब्धं शैशवे न तत् प्राप्तम् ।
लब्धं सुखं मयास्या वध्यशिलाया यदुत्सङ्गे ॥

सज्जनास्तु परोपकारं स्व कर्तव्यं मन्यन्ते ।ते स्वयं कष्टान् अनुभूय अपि परेषां सेवार्थं उपकारार्थं वा सज्जीभवन्ति। वस्तुत: परोपकारिणां जीवनं धन्यं भवति,यत: स्वार्थाय तु सर्वे खलु जीवन्ति,परार्थाय वै जीवनं जीवनं भवति । अत: अस्माभि सदैव अन्येषां उपकार: करणीय: ,एतदर्थं सज्जीभवितव्य: वा सत्यमेव कथितमञ्च केनापि कविना–

परोपकाराय वहन्ति नद्य:,
परोपकाराय फलन्ति वृक्षा: ।
परोपकाराय दुहन्ति गाव:,
परोपकारार्थमिदं शरीरम् ॥

◆◆◆

उद्योग:

अस्मिन् संसारे सर्वे जना: सुखं वाञ्छन्ति, अनेनैव कारणेन ते अहर्निशं परिश्रमं कुर्वन्ति । परिश्रमेण विना नैव कस्यापि जनस्य कस्यापि कार्यस्य सिद्धि र्भवति ।कार्यसिद्धिस्तु वस्तुत: उद्योगेनैव भवति ।यदि वयं विषयेऽस्मिन् सूक्ष्मदृष्ट्या चिन्तयेम,तर्हि पश्याम: यत् देवा: अपि स्वकार्यसिद्धिकरणे उद्योगाभावे समर्था: न भवन्ति ।अनेनैव तेऽपि कार्यसिद्धयर्थं भूमण्डलेऽवतारं गृह्णन्ति ।अत: सिद्धमेतत् यत् परिश्रमं विना दैवमपि पंगु: भवति ।अनेनैव केनापि कविना सम्यक् एव भणितम्–

यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिद्धयति ॥

संसारेऽस्मिन् द्विविधा जना: दृश्यन्ते । तयो: एके परिश्रममेव सफलताया: प्रमुखं कारणं मन्यन्ते। अन्ये तु भाग्यवादिन: भवन्ति। तेषां मते–'भाग्यं फलति सर्वत्र , न विद्या न च पौरुषम्' इति ,ये जना: भाग्यवादिन: भवन्ति तेषां जीवने नैराश्यमेव भवति। संसारेऽस्मिन् वस्तुतस्तु ते का पुरुषा: भवन्ति ,एतादृशा: आलस्ययुक्ता: जना: किमपि न लभन्ते। अनेनैव कथ्यते–

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी:,
दैवेन देयमिति का पुरुषा: वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या,
यत्ने कृते यदि न सिद्धयति कोऽत्र दोष:॥

स्वयमेव विचारयन्तु भवन्तः ,यदि कृषकः स्वक्षेत्रे परिश्रमं न करोति ,क्षेत्रं न कर्षति,बीजानि न वपति,काले शस्यानि जलेन न सिञ्चति,तर्हि किं सः स्वादुफलं आस्वादयति। कथं सः अन्येभ्यः जनेभ्यः स्वादिष्टान्नस्य उत्पत्तिं कर्तुं शक्यते।

एवमेव सिद्धान्तोऽयं छात्राणां विषयेऽपि प्रतीयते सत्यरूपेण,यदि कोऽपि छात्रः परीक्षायां परिश्रमं न करोति,तर्हि केन प्रकारेण सः तस्यां साफल्यं प्राप्तुं शक्यते। साफल्यार्थे तु तेन अहर्निशं उद्योगः कर्तव्यः एव।

वस्तुतः कथनमेतत् तेषां भ्रान्तिमूलकं सत्यात् परोऽस्ति। कुतः भवन्तः स्वयमेव विचारयन्तु यत् ये जनाः भाग्यं वदन्ति , तत् भाग्यं वस्तुतः किं वस्तु ? सूक्ष्मदृष्ट्या विचारयामः चेत् तर्हि जानीमः यत् भाग्यं तु पूर्वजन्मकृतानां कर्मणां निर्मितिः एवास्ति। अतः कर्मणः मुक्तिः कथं स्यात् ? तत् कर्म अस्मिन् जन्मनि भवेत् पूर्वजन्मनि वा?

अनेनैव कारणेन विश्वस्य सम्पूर्णे साहित्ये आलस्यं शरीरस्थो महान् रिपुः कथ्यते। आलस्यवशात् कोऽपि प्राणी मृत इव तिष्ठति,अन्ते सः विनश्यत्येव,किन्तु परिश्रमेण जनः उन्नतिं प्राप्नोति,प्रतिष्ठां लभते, लक्ष्मीं आलिङ्गति।वस्तुतः परिश्रमः जनस्य कस्यापि प्राणिनः वा सर्वोत्कृष्टः बन्धुः वर्तते। अतः सत्यमेव उक्तम्–

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धु यं कृत्वा नावसीदति॥

संसारेऽस्मिन् कोऽपि जनः जन्मतः महान् लघुः वा न भवति,किन्तु अस्मिन् जन्मनि सः यादृशानि कर्माणि करोति,तादृशः एव सः भवति । अथकपरिश्रमेणैव सः महापुरुषो भवति। भाग्यवादिनस्तु,निरुद्योगिनः मन्दा इव आचरन्ति ते सदैव यत्नेन विना सुखं वाञ्छन्ति,किन्तु साफल्यं न लभन्ते।ते प्रायः स्वपन् एव स्वकालं नयन्ति विनाशयन्ति वा। अनेनैव ते कदापि स्व परिवारस्य स्वस्य वा परिपोषणं कर्तुं समर्थाः न भवन्ति। सिंहः यद्यपि शक्तिसम्पन्नो भवति, किन्तु सोऽपि यदि परिश्रमं न करोति,तर्हि स्वाहारमपि न लब्धुं शक्यते। अनेनैव कथ्यते–

उद्योगेनैव हि सिद्धयन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

उद्योगेनैव जनाः विद्वांसः,वैज्ञानिकाः,धनिकाः,यशस्विनश्च भवन्ति। यः परिश्रमं करोति सः वै विजयता लभते । ईश्वरोऽपि तस्य सहाय्यं करोति येन स्वस्य सहायता क्रियते । अल्पीयसी पिपीलिका कठोरपरिश्रमेणैव विशालमपि पर्वतं लङ्घयते,किन्तु न गच्छन् वैनतेयोऽपि एकं पदं न गच्छति। अतः अस्माभिः सदैव उद्योगो विधेयः। सत्यमेव कथितम् विषयेऽस्मिन्–

उद्यमी लभते सिद्धिमयोग्योऽपि सुनिश्चितम्।
अनुरूर्गगनस्यान्तं प्रयात्येव दिने दिने॥

◆◆◆

सत्यम्

'न हि सत्यात् परो धर्म:'वस्तुत: कथनमेत् पूर्णतया सत्यं शाश्वतं चास्ति। सर्वेषां धर्माणां सर्वेषु ग्रन्थेषु सत्यस्य सर्वोत्कृष्टं स्थानमस्ति। अनेनैव मनुस्मृतिकारेण धर्मस्य लक्षणं कुर्वन् सत्यमन्यतमं स्वीकृतम्-

''आहु:,सत्यं हि परमं धर्म,धर्मविदो जना:''

मानवै: सदैव सत्यस्य पालनं कर्तव्यम् ।सत्यसम्भाषणेन जनस्य समाजे सम्मानं प्रतिष्ठा च वर्धेते,तं कीर्ते: ,सफलताया:,शान्ते: सुखस्य च प्राप्तिर्भवति।सर्वेषु वेदेषु शास्त्रेषु सत्यस्य महिमा वर्णित: दृश्यते। यादृशं महत्त्वं मानवजीवने सत्यस्यास्ति नैव तादृशं अन्यस्य कस्यापि वस्तो: वर्तते। सत्यवादिन: जना: सदैव निर्भया: प्रसन्नवदनाश्च भवन्ति। यत: ते सम्यक्रूपेण जानन्ति यत् -

'सत्यमेव जयते नानृतम् '

वाक्यमेतदेव तेषां कृते महद्बलं मनोबलं वा भवति। दृष्टस्य श्रुतस्य वा पदार्थस्य यथावत् प्रतिपादनं प्रस्तुतीकरणं वा 'सत्यम्' इत्युच्यते। अनेनैव व्यासेन योगसूत्रभाष्ये सत्यपदस्य व्याख्या एवं कृता वर्तते-

''सत्यं यथार्थे वाङ्मनसी ''

ये जना: समाजे सत्यं वदन्ति ते प्रमाणीभवन्ति। तेषां पूजा भवति विषयेऽस्मिन् सत्यवादी हरिश्चन्द्रस्य उदाहरणं दरीदृश्यते। तेन सत्यस्य पालनाय अनेकानि कष्टानि अनुभूतानि।अनेनैव अद्यापि तस्य नाम अत्यादरेण गृह्यते।

एवमेव महाराजदशरथेन स्वप्राणप्रिय: राम: वनं प्रेषित: आसीत्। महाभारतस्य सत्यवादिनं धर्मराजयुधिष्ठिरं को न जानाति ? सत्यबलेनैव तेन विजयश्री: लब्धा।रामायणे रामोऽपि सत्यमाश्रित्य वै लङ्कां विजितवान्।

उपनिषत्सु कथितं दृश्यते-''सत्यं वद धर्मं चर'',अत्रापि सत्यस्य महत्ता परि-लक्ष्यते। सत्यवादी केवलं ईश्वरादेव बिभेति,नैव अन्यस्मात् कस्मादपि जनात् जीवात् वा। यो जन: सत्यं वदति,तस्य मनसि नैव छल-छद्म-लोभस्य वा स्थानं लेशमात्रमपि दरी-दृश्यते।ईदृश: जन: नैव कदापि अनुचितं आचरति।

वस्तुत: धर्मस्य मूलमपि सत्यमेव अस्ति।भारतवर्षस्य तु राष्ट्रचिह्नं अपि 'सत्यमेव जयते'स्वीकृतं वर्तते। अत: अस्माकं संविधाननिर्मातृभि: विद्वद्भि: सत्यस्य महत्ता स्वीकृता।अनेनैव शिक्षाया: समाप्त्यनन्तरं आचार्योऽपि शिष्याय सत्यसंभाषणस्य उपदेशं ददाति।

अस्य सम्पूर्णस्य संसारस्य अस्तित्वमपि वस्तुत: केषाञ्चिदेव सत्यवादी जनानां सत्याचरेणैव वर्तते। अन्यथा यदि सर्वे जना: दुष्टा: असत्यवादिनश्च भवेयु:,तर्हि सर्वमेतत्

जगत् विनष्टं भवेत्।सत्यस्य आचरणेनैव कस्यापि समाजस्य राष्ट्रस्य वा कल्याणं भवति,तेनैव अस्माकं कल्याणं भवितुं शक्यते ।यतः-'सर्वं सत्ये प्रतिष्ठितम्' इति कथ्यते शास्त्रविद्भिः जनैः।

किन्तु विषयेऽस्मिन् एतदपि सम्यक्रूपेण अवधारणीयम्,यत् सत्यं कदापि अप्रियं न वक्तव्यम्। अनेन श्रोता आहतो भवति,वेदनाञ्च अनुभवति,क्लेशं च प्राप्नोति।अतः शास्त्रेषु -'प्रियं सत्यं ब्रूयात् सदैव'इति कथितम्-

सत्यं ब्रूयात् प्रियं ब्रूयात्,न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयात् , एष धर्मः सनातनः॥

अद्यत्वे तु प्रायः दृश्यते यत् बहवः जनाः सत्यभाषणात् विमुखाः सन्ति। अधिकसंख्यकानां जनानां प्रवृत्तिः असत्ये प्रतिष्ठिता दरी-दृश्यते। वस्तुतः नैव एतत् शुभलक्षणम्। कुतः यदि वयं स्वराष्ट्रस्य,देशस्य समाजस्य स्वस्य वा उन्नतिं कर्तुं वाञ्छामः,तर्हि सदैव सत्यभाषणं कर्तव्यम् ,अनेन समाजे स्वस्थवातावरणस्य निर्माणं भविष्यति।

◆◆◆

सदाचारः

सतां सज्जनानाम् आचारः 'सदाचारः'इत्युच्यते । येन प्रकारेण सज्जनाः संसारे,परिवारे,अन्यैः जनैः सह आचरन्ति व्यवहारं कुर्वन्ति वा, सः एव आचारः सदाचारः भवति। विषयेऽस्मिन् शास्त्रेषु अपि निगदितम्-

''आचारलक्षणो धर्मः सन्तश्चरित्रलक्षणाः।
साधूनाञ्च यथावृत्तम्,एतदाचारलक्षणम्॥''

अस्मिन् संसारे मनुष्यस्य यानि उन्नतिसाधनानि तेषु सदाचारस्य सर्वोत्कृष्टं स्थानम् अस्ति। आरम्भे तु सदाचारस्य पालने महत् कष्टं भवति,अन्ते तु जनः सुखी भवति,समाजे सर्वत्र तस्यादरो भवति । सदाचारिणः सर्वत्रैव सत्कारं,पूजां,प्रतिष्ठां सर्वोत्तमं च पदमपि लभन्ते।

किन्तु ये जनाः दुराचारिणः सन्ति ते समाजे सर्वथा अपमानिताः सुखशान्तिरहिताः गर्हिता च भवन्ति। ईदृशानां जनानां समाजे कथमपि कल्याणं शुभं वा न भवति। अस्मिन् संसारे प्रायः जनाः यशः कामयन्ते। सम्मानं च अभिलषन्ति। अन्ये च विद्यामुच्चपदं ऐश्वर्यं वा समाजे सम्मानहेतुस्वरूपेण मन्यन्ते,किन्तु साधनानि एतानि मानवं अल्पकालाय एवं सम्मानास्पदं कुर्वन्ति। एकेनैवाचारेण सदाचारेण वा मनुष्यः दीर्घकालं यावत् यशोभागी भवितुं शक्यते। यतोहि शास्त्रेषु अपि आचारस्य उच्च स्थानं प्रतिपादितम्। तत्र कथितम् अस्ति यत् सदाचारादेव धर्मो निस्सरति-

'आगमानां हि सर्वेषामाचार: श्रेष्ठ उच्यते ।
आचारप्रभवो धर्मो धर्मादायु र्विवर्धते ।।'

वस्तुत: सर्वेषु धर्मेषु आचारस्य महान् महिमा वर्णित: । आचारेण खलु मानवस्य चरित्रं प्रतिभाति । ये जना: सम्यक्तया विनम्रभावेन आचरन्ति ते सज्जना: कथ्यन्ते, किन्तु कुटिलरूपेण स्वार्थीरूपेण वा आचरणं कुर्वन्ति ते समाजे 'दुर्जना:' इति अभिधीयन्ते ।

अस्माकं शास्त्रेषु 'आचार: परमोधर्म:' इति घोषणा डिंडिमरूपेण कृता वर्तते ।वस्तुत: यदि वयं सूक्ष्मदृष्ट्या विचारयाम: तर्हि धर्मश्च आचारश्च एकमेव प्रतिभाति ।यतोहि यानि धर्मस्य अङ्गानि तानि सर्वाणि आचारेऽपि दृश्यन्ते सदाचारी मानव: सर्वै: जनै: सह स्नेहेन प्रेम्णा वा मिलति, व्यवहरति, वार्तां करोति ।यदि स: कमपि प्राणिनं क्षुधार्तं पिपासाकुलं कष्टापन्नं वा पश्यति तस्य हृदयं करुणया आर्द्रीभूतं जायते । स: अवश्यमेव तस्य सहायतां करोति । अस्मिन् कर्मणि तस्य प्राणा अपि संकटापन्ना: भवेयु: विषयेऽस्मिन् स: चिन्तां न आवहति ।अस्माकं समाजे एतादृशानां जनानां सम्मानं भवति ते समाजे मूर्धनि तिष्ठन्ति ।

एतद्विपरीतं ये आचारविहीना: भवन्ति समाजे तेषा क्वचिदपि स्थानं न भवति । प्रभुत्वात्, ऐश्वर्यात्, पदवशाद् वा कालविशेषे ते सम्मानिता: स्यु:, किन्तु सदाचाराभावे तेषां सम्मानं सर्वकालेषु न भवति ।शास्त्रेषु आचारस्य महिमा अन्यप्रकारेण अपि वर्णित: दरीदृश्यते तत्र वैभवस्य वित्तस्य वा निरर्थकता प्रतिपादिता यदि जन: सदाचारी न स्यात् ।विषयेऽस्मिन् महाभारतस्य श्लोकोऽयं द्रष्टव्य:-

''वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्तत: क्षीणो वृत्तस्तु हतो हत: ।।''

एतदेव आङ्गल भाषायामपि भिन्नरूपेण प्रतिपादितम्-''यदि मानवस्य धनं नष्टं तर्हि न किञ्चिदपि ,यदि स्वास्थ्यं विनष्टं तर्हि किञ्चिदिव नष्टम्, किन्तु यदि तस्य चरित्रं दूषितं भवति तदा तु तस्य दुर्भगस्य सर्वमेव विनष्टं जातम्, अत: जनै: सदा वृत्तस्य आचारस्य वा रक्षा करणीया ।''

अद्यत्वे अस्माकं समाजे देशे वा सर्वत्रैव दुराचारस्य भ्रष्टाचारस्य वा राज्यं दृश्यते । हिंसाया:, चौर्यस्य, लुण्ठनस्य, व्यभिचारस्य सर्वत्रैव नग्नदृश्यानि अवलोक्यन्ते। यद्यपि समाजे सदाचाररक्षणार्थं विभागा: नियतीकृता: सन्ति, किन्तु तेषामपि आदेशान् उल्लंघ्य दुराचारिण: प्रति दिवसं स्वेच्छाचारिण: एव दरीदृश्यन्ते । अनेनैव कारणेन समाजात् सुखशान्तिश्च सर्वथा दूरीजाता ।

अस्यां परिस्थितौ सदाचारस्य महती आवश्यकता वर्तते, अस्माकं समाजस्य कृते । अत: अस्माभि: ईदृश: प्रयत्नो विधेय: येन सर्वे जना: सदाचाररता: भवेयु: । अनेन प्रयत्नेन मानवहृदयेषु पारस्परिक प्रेम, दया उदारता इत्यादीनां भावानां स्वत: एव आगमनं भविष्यति ।अत: अस्माभि: सदैव सदाचार: पालनीय: ।

◆◆◆

देशभक्तिः

सेवार्थक 'भज्'धातोः क्तिन् प्रत्यये कृते 'भक्तिः'इति शब्दो निष्पद्यते ।मनुष्यः यस्मिन् देशे, राष्ट्रे,समाजे वा जन्म गृह्णाति,तस्मिन् समर्पणभावना आदरभावना च देशभक्तिः, राष्ट्रभक्तिः, समाजभक्तिः वा कथ्यते । यस्मिन् अपि देशे जनः जन्म लभते तस्य अन्नेन,जलेन,वायुना च तस्य मानवस्य शरीरनिर्माणं भवति । अतः तं प्रति तस्य प्रेम,आदरः समर्पणभावना वा स्वाभाविकी।

यथा माता स्वशिशून् दुग्धदानेन पालयति तथैव जन्मभूमिरपि अन्नदानादिना मानवान् रक्षति । अनेनैव शास्त्रेषु 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'कथ्येते।

अस्याः मातृभूमेः अन्नजलादानेनापि यदि जनः एषां प्रति समर्पणभावनां न करोति,तर्हि सः देशभक्तो न भवति। ईदृशस्य जनस्य जन्म निरर्थकं भवति।यतोहि जन्मभूमिः स्व निवासिनः जनान् स्वकीयेन जलेन, ओषधी-वनस्पतिभिश्च शिशून् इव पालयति पोषयति च तस्या एव प्राङ्गणे क्रीडन्तः जनाः वर्धन्ते बलिष्ठाश्च भवन्ति। तस्यामेव भूमौ विचरताम् सताम् सङ्गत्या मानवाः विशिष्टान् आचारान् शिक्षन्ते। बाल्यावस्थायाः किशोरावस्थायाश्च मधुरस्मृत्यः तया एव भूम्या सम्बद्धा भवन्ति।

अनेनैव कारणेन जनाः स्वजन्मभूमौ स्वगृहे इव सुखम् प्राप्यन्ते ,तत् सुखम् तु अन्यत्र दुर्लभमेव । वस्तुतः जन्मभूमिरपि जननीवत् पूज्या समादरणीया च सापि स्वर्गापेक्षया गरिमामयी महिमामयी च । यस्यां भूमौ अस्माभिः जन्म गृहीतम्,यस्यां क्रीडितं धावितं,ईदृशी सा वात्सल्यमयी जन्मभूमिः कदाचिदपि क्वचिदपि न विस्मरणीया। यस्याःजलं पायं पायं,अन्नं भोजं भोजं अस्माकं शरीरं सुपुष्टं,सबलं,ओजोमयं तेजोमयं वा संजातम् सा मातृभूः सततं वन्दनीया पूजनीया च।

यदा रामः लङ्कां विजितवान् तदा लक्ष्मणस्य अयं प्रस्तावः आसीत् यत् लङ्कायाः वैभवम् अतुलितम् अस्ति। अतः रामः लङ्काधिपतिं स्यात् तस्मिन् समये रामः प्रस्तावम् एतत् न स्वीकृतवान्,कथितम् च तेन-

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।

वस्तुतः एतत् रामस्य स्वजन्मभूमिं प्रति स्वदेशं प्रति प्रेम आसीत् । एषा तस्य देशभक्तिः एव आसीत् । कोऽपि देशभक्तः अस्यां परिस्थितौ एवम् एव अनुभवति ।तस्य समीपे यदि स्वर्ग-सुखानि अपि स्यात् तदापि सः मातृवत् स्वजन्मभूमिं न विस्मरति ।विवेकशीलानां मानवानां तु का कथा ?अपितु पशुपक्षिणोऽपि स्वजन्मभुवं प्रति असीम स्नेहं कुर्वन्ति। अनेनैव ते सायंतने काले स्व-स्व निवासस्थानं प्रति धावन्ति,इति प्रत्यहं वयं पश्यामः। अतएव मातृवत् भूप्रेम युक्तैः बहुभिः देशभक्तैः मातृभूमेः चरणौ स्वकीय शिरांसि समर्प्य तस्याः सेवा

कृता आसीत् ।

पराधीनता समये भारतभूमौ पारतन्त्र्य- शृङ्खला-विनाशाय भगतसिंह -चन्द्रशेखर प्रभृतिभि: अनेकै: वीरै: अनेकानि गौरवमयानि कार्याणि कृत्वा मातृभूमे: चरणयो: स्वकीयं बलिदानं विहितम्।एवमेव लोकमान्य-बालगङ्गाधरतिलक-मदनमोहनमालवीय-मोतीलाल नेहरु-महात्मागान्धि-प्रभृतिभि: देशभक्तै: स्वलौकिक सुखं समुन्नतिं च विस्मृत्य देशसेवा कृता। क्रान्तिकारिषु वीरसुभाषस्य नाम को न जानाति येन विदेशे गत्वा सेनासंघटनं विधाय मातृभूमे: स्वातन्त्र्यर्थं महान् प्रयत्न: कृत:।

वेदेषु अपि ''माता भूमि: पुत्रोऽहं पृथिव्या:''इति उक्ति: विद्यते साऽपि जन्मभूमे: मान्यताम् एव कथयति । अस्माकं पुराणसाहित्येऽपि मातृभूमे: माहात्म्यबोधका: बहव: प्रसङ्गा: अस्माकं दृष्टिपथं आयान्ति।अत: अस्माभि: सर्वै: सदैव स्वदेशं प्रति स्व जन्मभूमिं प्रति आदरो विधेय:। तस्या: कृते सदैव प्राणान् अपि परित्यागाय सज्जो भवितव्य: , इति।

◆◆◆

अहिंसा परमोधर्म:

'न हिंसा इति अहिंसा'इति विग्रहानुसारेण 'हिंसा'शब्दे नञ् समासकृते अहिंसा शब्दो निष्पद्यते। अस्य अयम् अभिप्राय:-''हिंसाया: अभाव: एव अहिंसा''भवति कथ्यते वा । सामान्यत: जना: प्राणीहननं हिंसारूपेण मन्यन्ते,किन्तु अहिंसा शब्दे नैव एषोऽभिप्राय:,अपितु अहिंसा शब्देन अभिप्रायोऽयं गृहीतव्य: यत्-मनसा,वाचा,कर्मणा नैव कस्यापि अहितचिन्तनं,कटुभाषणम् अप्रियम् आचरणमेव अहिंसा भवति । नैव एतत् सर्वं मानवं प्रति अपितु अस्मिन् जगति येऽपि प्राणिन: सन्ति तान् सर्वान् प्रति हिंसाया: परित्याग: करणीय:।

सर्वेषु सम्प्रदायेषु धर्मेषु वा अहिंसाया: महत्त्वं वर्ण्यते । संसारेऽस्मिन् नैव कोऽपि एतादृशो धर्मप्रवर्तकोऽभवत् येन हिंसाया: उपदेश: कृत:। सर्वै रेव अहिंसाया: आवश्यकता स्वीक्रियते।आचार्य मनुनापि स्व विरचितौ स्मृतौ दशसु धर्मलक्षणेषु सर्वप्रथमम् अहिंसाया: परिगणनं कृतं विद्यते। एवमेव योगसूत्रेषु योगाङ्गानां गणनाप्रसङ्गे 'यम'नामके अङ्गे सर्वप्रथमं अहिंसाया: एव परिगणनं सञ्जातम्। अत: एतत् सर्वं अहिंसाया: जीवनेऽस्माकं प्रमुखतां प्रतिपादति।

भारतवर्षे तु प्राचीनकालादेव अहिंसाया: महत्त्वं स्वीकृतम्। बुद्ध-महावीर-सम्राट् अशोक-महात्मागान्धि-प्रभृतिभि: जन: महापुरुषै: वा सदैव अहिंसाया: शान्तेश्च उपदेश: कृत:,इति सर्वै: ज्ञातम् एव। एषु सर्वेषां मते 'अहिंसया दुष्कराणि अपि कार्याणि सुकराणि

भवन्ति ', इति।

वस्तुत: हिंसया सर्वत्र अशान्ति: प्रसरति, किन्तु अहिंसाया: अवलम्बनेन चतुर्दिक् शान्ते: वातावरणं भवति। अहिंसाया:आचरणेन सर्वत्र सौहार्द्रं, सुखं, सौख्यं च भवति।अस्या: व्यवहार: सर्वेषु जनेषु औदार्यं विस्तारयति, दयाभावं उत्पादयति। अहिंसया मानव: हिंस्रजीवान् अपि वशीकरोति मानवानां का कथा।यस्य जनस्य चित्ते मनसि वा अहिंसाया: निवासोऽस्ति, तस्य समीपे सर्वे प्राणिन: वैरभावं विस्मरन्ति। एतत् अस्माभि: प्राचीनग्रन्थेषु पुराणेषु वा ऋषि मुनीनां विषये श्रुतमेव। तेषां आश्रमेषु हिंसका: अपि प्राणिन: हिंस्रभावं परित्यज्य दयाभावं मैत्रीभावं वा अङ्गीकुर्वन्ति स्म। योगसूत्रेऽपि कथितम् –

''अहिंसा प्रतिष्ठा यां तत्सन्निधौ वैरत्याग:''

अनेनैव प्राचीनकाले ऋषीणाम् आश्रमेषु गोव्याघ्रादिपशव: परस्परविरोधिन: सत्यपि स्व वैरभावं विस्मृत्य प्रेमपूर्वकं स्नेहभावं निवसन्ति स्म। वस्तुत: एष: प्रभाव: अहिंसाया: एव आसीत्। अस्माकं शास्त्राणि धर्मस्य स्थिति: अनेकेषु स्थानेषु मन्यन्ते।केचित् परोपकारे, अन्ये यज्ञे इतरे सत्याचरणे संभाषणे वा धर्मं स्वीकुर्वन्ति, किन्तु तेषु 'अहिंसारूप–धर्म:'श्रेष्ठतम: कथित:। उक्तञ्च–

'अहिंसा परमो धर्म:'

कोऽपि जन: हिंसां हिंसया शमीकर्तुं न शक्यते, किन्तु अहिंसया एव हिंसाया: उपरि विजयीभवति मानव:। विश्वप्रसिद्धमेतत् यत् बलशालीनां आङ्गलशासकानां समक्षे हिंसया किमपि भवितुं न शक्यते स्म, किन्तु अहिंसाया: पुरत: तैरपि समर्पणं कृतम्। भगवता बुद्धेन अहिंसाया: महान् प्रचार: विहित:। न केवलं भारतवर्षे अपितु चीन–जापान–वर्मा–श्रीलंका प्रभृतिषु देशेषु अद्यापि बौद्धधर्मधारा अहिंसाया: प्रचार: करोति ।

विषयेऽस्मिन् एतत् सर्वथा चिन्तनीयं वर्तते यत्–'कदापि केनापि कस्यापि वध: न करणीय:' एषापि व्याख्या पूर्णतया अहिंसाया: न करणीया, अपितु दुष्टानां पापिनाम् अपराधिनां आततायिनां वा वध: अवश्यमेव करणीय:, यतोहि समाजस्य, देशस्य, धर्मस्य मर्यादायाश्च रक्षा अनेनैव भविष्यति, तस्य हिंसायां नैव कोऽपि अपराध: दर्शनीय:। अस्माकं शास्त्रेषु आततायिनां वधव्यवस्था विहिता दृश्यते । वैदिककाले 'वेन'अस्योदाहरणम् अस्ति। आततायि सञ्जाते तस्य ऋषिभि: मिलित्वा वध: कृत: आसीत्। अनेनैव वेदविषये कथ्यते–

'आचारहीनं न पुनन्ति वेदा:'

अस्माकं समाजे सदैव आचारवन्त: सम्मानं लभन्ते।ये आचरणविहीना: सञ्जाता: तेषां वधेऽपि नैव कोऽपि दोषोऽस्ति।अद्य सर्वत्रापि विश्वे हिंसाया प्रभाव: दृश्यते।आतंकवादीनां आतङ्क: सर्वत्र चतुर्दिक् प्रसरति । सम्पूर्णा मानवता चित्करोति तेषां समक्षे, एतादृशे समये अहिंसाया: उपदेश: खलु अवलम्बोऽस्ति। अस्या: एव आचरणेन सिद्धान्तेन वा सर्वत्र दयाया:, प्रेम्ण: शान्तेश्च वृष्टि र्भविष्यति।अत: सर्वै: जनै: अहिंसाया: पालनम् अवश्यमेव करणीयम्।यतोहि विश्वशान्ति: अहिंसयैव सम्भाविता अस्ति।

अनेनैव श्रीमद्भगवद्गीतयाऽपि अहिंसा दैवी सम्पत्सु परिगणिता विद्यते–

अहिंसासत्यमक्रोधस्त्याग: शान्तिरपैशुनम् ।
दयाभूतेष्वलौलुप्त्वं मार्दवं ह्रीरचापलम् ॥

◆◆◆

अस्माकं प्रिय: कवि: (कालिदास:)

कविकुलगुरो: महाकवि-कालिदासस्य नाम को न जानाति अपारे काव्यसंसारे ऽस्मिन् ।येन न केवलं भारतवर्षं अपितु सम्पूर्णं जगत् आत्मानं धन्यं मन्यते ।एतादृश: स: एव महाकवि: मम प्रिय: कवि: अस्ति ।महाकविरयं कदा,कुत्र वा जात: ? इत्यस्मिन् विषये विद्वांस: नैव एकमता: सन्ति । यतोहि महाकवेरस्य प्रमाणभूतं इतिवृत्तं अद्यापि कुतश्चित् न प्राप्यते । महाकविकालिदासेन स्वनाटकेषु,काव्येषु वा नैव किमपि स्वविषये लिखितमस्ति ।

यद्यपि अनेके भारतीया: यूरोपीय विद्वांस: तस्य कृतिषु एव किमपि अवगन्तुं प्रयतन्ते,तथापि इदानीं यावत् ते 'इदमित्थम्'इति रूपेण न निश्चेतुं शक्ता: ।अस्य कारणम् अन्यदपि यत् संस्कृत साहित्ये 'कालिदास'नामका: एकाधिका: कवय: भूता: ।

तथापि केचन विद्वांस: तस्य उज्जयिनीं प्रति विशेषस्नेहकारणेन तं उज्जयिनीनिवासी मन्यन्ते । तेषां मते तेन सम्राट्विक्रमादित्यस्य आश्रये स्वजीवनं यापितम् । अस्या: मान्यताया: आधारोऽयं श्लोक:-

धन्वन्तरि-क्षपणकामरसिंह-शंकु-
वेतालभट्टघटकर्पर कालिदासा: ।
ख्यातो वराहमिहिरो नृपते: सभायां
रत्नानि वै वररुचि र्नवविक्रमस्य ॥

महाकविकालिदासेन अनेकानि ग्रन्थरत्नानि विरचितानि । तेषु महाकाव्ये 'रघुवंशम् कुमारसम्भवम्'इति द्वे वर्तेते । नाटकानि अभिज्ञानशाकुन्तलम् ,मालविकाग्निमित्रम्, विक्रमोर्वशीयम् इति त्रीणि सन्ति,द्वे च गीतिकाव्ये-मेघदूतं ऋतुसंहारञ्च । तेषु सर्वेषु अभिज्ञानशाकुन्तलस्य काव्यसंसारे अतीव महत्त्वं वर्तते ।अनेनैव प्रसिद्धिरेषा संजाता-

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्क: तत्र श्लोक चतुष्टयम् ।।

'रघुवंशम्'नाम महाकाव्यस्य रचनाशैलीं सूक्ष्मदृष्ट्या अवलोकनेन प्रतीयते यदस्य रचना महाकविना 'कुमारसम्भवम्'नाम महाकाव्यस्य पश्चात् खलु कृता, सप्तदश सर्गात्मके महाकाव्येऽस्मिन् कालिदासेन शिवस्य पुत्रोत्पत्तिकथा निबद्धा कृता वर्तते । केचित्

विद्वांस: मन्यन्ते यदस्य काव्यस्य अष्टसर्गपर्यन्तमेव संरचना कृता महाकविना। रघुवंशे राजा दिलीपाद् आरभ्य अग्निवेशपर्यन्ता रघुवंश-परम्परा सम्यक्रूपेण प्रदर्शिता महाकवि कालिदासेन।

एवमेव ऋतुसंहारे षड्ऋतूनां मनोहारिवर्णनं कृतम्,प्रतीयते एतत् यद् महाकवे: कृतिरेषा प्रथमा वर्तते।अन्यं गीतिकाव्यं 'मेघदूतम्' दूतकाव्य-परम्पराम् अवलम्ब्य संरचितम्। अस्य काव्यस्य विषये विद्वत्सु प्रसिद्धिरेषा श्रूयते प्रशंसारूपेण-

''मेघे माघे गतं वय:''

वस्तुत: मेघदूते महाकवे: काव्यकला अतीव चमत्कारी मनोहारिणी च सञ्जाता । महाकविकालिदासस्य कविताया: अनेका: विशेषता: सन्ति,तासु विशेंषतासु एका अन्यतमा, उपमालङ्कारस्य प्रयोगे कविरेष: परमं वैशिष्ट्यं भजते । अनेनैव आभाणकम् एतत् प्रसिद्धं सञ्जातम्-

''उपमा कालिदासस्य''

यद्यपि महाकविना सर्वे रसा: स्वकाव्येषु प्रयुक्ता: सन्ति,तथापि रसराजे शृङ्गारे तत्रापि वियोग शृङ्गारे विशेषेण रुचिरस्य प्रतीयते।कथनस्य अस्य पुष्टि: मेघदूते संदेशेन,रघुवंशे रामस्य कारूण्येन,शकुन्तलाया: वियोगे,अजस्य विलापे,कुमारसंभवे रते: शोके निदर्शनरूपेण भवति। कालिदासस्य सम्पूर्णे साहित्ये एका उपमा अतीव प्रसिद्धा जाता,यया स:' दीपशिखा कालिदास:' अपि कथ्यते-

सञ्चारिणी दीपशिखेव रात्रौ,
यं यं व्यतीताय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे,
विवर्णभावं स स भूमिपाल: ।।

वस्तुत: कालिदासस्य कृतिषु उपमाया: आधिक्यम् उत्कृष्टत्वञ्च विराजते । कालिदासस्य प्रशंसायां प्रसङ्गेऽस्मिन् अधिकं न उक्त्वा,इदम् एव वक्तव्यम् यत् ,अस्मिन् भूमण्डले कालिदाससम: कवि: न भूतो न भविष्यति केनचित् कविना अनेनैव कथितम्-

पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासा:।
अद्यापि तत्तुल्यकवेरभावात्,
'अनामिका'सार्थवती बभूव।।

अन्ते केवलम् एतत् कथनीयं कालिदासस्य प्रशंसायां-कालिदास: खलु विलास: कलाया:,प्रकाश: प्रतिभाया:,विकास व्यञ्जनाया:,कल्प: कमनीयकल्पनाया:,अवतार: वाग्देवताया:,योजक: उपमाया: इति।

◆◆◆

अस्माकं प्रियो नेता (पं. जवाहरलालनेहरू:)

भूमण्डलेऽस्मिन् एतादृशा: बहव: जना: संभूता:,ये नश्वरशरीरस्य क्षयेऽपि यश: कायेन जीवन्ति।श्रेष्ठतमै: कार्यै: अद्यापि तेषां नामानि स्वर्णाक्षरेषु अङ्कितानि सन्ति।एवमेव अस्माकं भारतभूमौ अपि अनेके महापुरुषा: प्रादुर्भूता: काले-काले।तेषु महापुरुषेषु 'पं. जवाहर लाल नेहरू:'इति नाम्ना ख्यात: महापुरुषोऽपि अभवत्।स: स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्री आसीत्। स: खलु मम प्रियोऽस्ति,शान्तिदूतेन प्रसिद्ध:, स: वस्तुत: अस्माकमर्थे भारतवर्ष-स्यार्थे च अतीव गौरवास्पदं जात:।

अस्मिन् संसारे बहव: प्राणिन: जन्मानि लभन्ते,म्रियन्ते च।तेषां जीवनस्य किमपि लक्ष्यं न भवति,पशुतुल्यं तेषां जीवनं भवति,यतोहि पशवोऽपि स्वोदरपोषणाय जीवन्ति।एवमेव एतादृशा: सामान्या: पुरुषा:जीवन्ति।वस्तुत: तेषामेव जीवनं सार्थकं ,ये परार्थं जीवनं धारयन्ति ,एतादृशा: एव जना: महापुरुषा: कथ्यन्ते,तेषां जीवनं श्लाघ्यं भवति। उक्तञ्च-

पशवोऽपि जीवन्ति केवलं स्वोदरम्भरा: ।
तस्यैव जीवितं श्लाघ्यं य: परार्थं हि जीवति ।।

पं.जवाहरलालनेहरू: एतादृश: एव महापुरुषोऽस्ति।स: एक: देशभक्त: सर्वजनानां हितचिन्तक: विश्वस्य च बन्धुरासीत्।तस्य गणना विश्वप्रसिद्धेषु नीतिविशारदेषु अभवत्। अस्य पिता पं. मोतीलाल नेहरू: स्वयुगस्य प्रौढ: अधिवक्तारूपेण प्रसिद्ध: आसीत्। श्रीमती स्वरूपरानी अस्य माता वस्तुत: शीलवती,रूपसम्पन्ना, धार्मिका देशभक्ता च महिला आसीत्।

पं.जवाहरलाल नेहरू: इलाहाबादनगरे नवम्बरमासस्य चतुर्दशतारिकायां 'आनन्द-भवनम्'नामके गृहे १८८९ तमे वर्षे प्रादुर्बभूव । जवाहरलालस्य बाल्यकालं राजकुमार इव वैभवसम्पन्ने वातावरणे व्यतीतम् अभवत्। तस्य शिक्षा आङ्गलद्वीपे सञ्जाता। अस्य विवाह: 'कमला'नाम शीलवती कन्यया सह अभवत्।कमलाया: इन्दिरा नाम्नि एका सुता उत्पन्ना। अस्य विजयलक्ष्मी पण्डिता कृष्णा च द्वे भगिन्यौ आस्ताम्।

विद्यार्थिजीवने पं. जवाहरलालेन हिन्दी-उर्दू-आङ्गलभाषाया: शिक्षा गृहीता। तदनन्तरं सप्तवर्षपर्यन्तं विदेशे स्थित्वा भौतिकशास्त्रे विधिशास्त्रे च प्रवीणता लब्धा अनेन,पश्चात् विधिसम्मत 'बैरिस्टर'इत्युपाधिम् अधिगम्य एष: स्वदेशे भारते प्रत्यावर्तत्।

भारतम् आगत्य अधिवक्तृव्यवसाय: न स्वीकृत:। अस्य कारणं इदम् आसीत् यत् भारतमाता तदानीं परतन्त्र्य-शृङ्खलाभि: निबद्धाऽऽसीत् ,अत: अनेन भारतमाताया: सेवाया: निश्चय:कृत:।तस्मिन्नेव काले महात्मागान्धिमहोदयेन सत्याग्रहादि-आन्दोलनानि प्रारब्धानि कृतानि आसन्। राष्ट्रसेवायां संलग्न: महापुरुषोऽयं देशभक्तिभावेन आप्लुत: महात्माया: शान्तिप्रिये युद्धक्षेत्रे प्रविष्टोऽभवत्।

न केवलम् एतत् अस्य मातापितरौ, धर्मपत्नी, कमला, भगिनी विजयलक्ष्मी कृष्णा च अल्पवयसी पुत्री इन्दिरा च सम्पूर्ण:एव परिवार: देशसेवायाम् आत्मानं देशस्य स्वातन्त्र्यसंग्रामे अजुहोत्। अनेन तस्मिन् समये देशसेवाया: व्रत: स्वीकृत:। पुन: कांग्रेस संस्थाया: सदस्यता गृहीता। तदनन्तरम् अस्या: संस्थाया: नेतृत्वे परतन्त्रतापाशबद्धं भारतदेशं मोक्तुं बहुबारं एष: कारागारस्य यातना अपि सोढा। महानुभावोऽयं प्रकृत्या धीर:, प्रशान्त: गम्भीरश्च आसीत्। १९२९तमे वर्षे स्वगुणैरनेन कांग्रेसस्य प्रधानपदम् अलङ्कृतम्। तदानीमेव भारतवर्षस्य पूर्णस्वराज्यस्य घोषणापि सम्भूता। तस्मिन् समये पं. जवाहरलाल: भारतीयजनताया: हृदयसम्राट् सञ्जात:। अनेनैव स्वतन्त्रभारतस्य एष: प्रथम: प्रधानमन्त्री अभवत्।

तस्मिन् गौरवास्पदे स्थाने स्थित्वा अनेन महापुरुषेण बहुविधा राष्ट्रसेवा कृता आसीत्। पं. जवाहरलाल: सदैव देशस्य विकासाय प्रयत्नम् अकरोत्। शान्तिदूतो भूत्वा स: विश्वस्य परिभ्रमणम् अकरोत्। अनेन भ्रमणेन विश्वे भारतदेशस्य गौरवम् अवर्धत्। महापुरुषोऽयं जगत: अशान्तिं कलहं च दूरीकर्तुं वाञ्छति स्म। विषयेऽस्मिन् अस्य महान् प्रयत्न: आसीत्।

सम्पूर्णे विश्वे शान्ते: संस्थापनार्थं अनेन महापुरुषेण 'पञ्चशील' नामका: पञ्चसिद्धान्ता: अपि विश्वस्य समक्षे प्रस्तुता:, विश्वस्य अधिकसंख्यकै: देशै: एते सिद्धान्ता: स्वीकृता: अपि। अनेन भारतस्य गौरवं तस्मिन् काले विश्वसम्मतौ सम्यक्तया संस्थापितम्। अनेन प्रकारेण वक्तुं शक्यते यत्, गान्धिमहाभाग: भारते स्वराज्यं प्रापयत्, किन्तु पं. जवाहरलाल नेहरु: द्वारा अस्य स्वातन्त्र्यस्य संरक्षा कृता।

अस्य व्यक्तित्वम् अतीव आकर्षकम् आसीत्। बहुमुखी अपि। ज्ञान-विज्ञाने, राजनये, साहित्ये, कलासु च अस्य महती अभिरुचि: अभवत्। एष: महान् लेखक: अपि आसीत्। अनेन बहूनि पुस्तकानि लिखितानि तेषु 'डिस्कवरी आफ इण्डिया', 'विश्व इतिहास की झलक', 'मेरी कहानी', 'आत्मकथा' इत्यादीनि प्रसिद्धानि सन्ति। एता: सम्पूर्णा: कृतय: विश्वसाहित्ये प्रतिष्ठाम् अलभन्त।

सर्वाधिक लोकप्रिय: जननायकोऽयं बालकै: सह महत् प्रेम अकरोत्। अत: तै: स: 'चाचा नेहरु' इत्युपाधिना विभूषित: आसीत्। वर्तमानभारतस्य वास्तविक: निर्माता वस्तुत: स: एव। अस्य जन्मदिवस: प्रतिवर्षे भारते 'बालदिवस' रूपेण सम्पाद्यते। आजीवनम् असौ देशसेवायां निरतोऽभवत्। अस्यैव सुयोग्या पुत्री श्रीमती इन्दिरागान्धी स्व गुणै: योग्यतया च भारतस्य प्रधानमन्त्री पदम् अलङ्कृतवती। अस्या: विषये उक्तिरेषा चरितार्था भवति-

''वरमेका गुणी पुत्री न च पुत्रशतान्यपि''

यद्यपि महापुरुषोऽयं मई मासस्य सप्तविंशति तारिकायां पञ्चतत्त्व-विलीनोऽभवत्। पुनरपि स: भारतीयानां हृदयेषु अद्यापि स्थितोऽस्ति भविष्येऽपि स्थास्यति, इति। केनचित् कविना सत्यमेव कथितम्-

''परिवर्तिनि संसारे मृत: को वा न जायते।
स: जातो येन जातेन देश: याति समुन्नतिम्॥''

वस्तुत: महापुरुषोऽयं कण्ठहार:भारतमातु: अग्रदूत:विश्वशान्ते:,प्रियो नेता जनानां, विजेता स्वातन्त्र्ययुद्धस्य,लेखक: प्रौढ ग्रन्थानाम्,अस्य सम्माने अस्माकं मस्तक: सदैव नमिष्यति।

◆◆◆

महात्मागान्धि:

अस्मिन् संसारे तस्य एव मानवस्य चरित्रं श्लाघ्यं भवति य: मानवानां कृते स्वस्य शरीरस्य वा समर्पणं करोति। ईदृशानां पुरुषाणां जीवनस्य लक्ष्यं परार्थं एव भवति। अस्मिन् जगति बहव: जना: प्रतिदिनं जायन्ते म्रियन्ते च , किन्तु ते एव अजरा: अमराश्च भवन्ति ,ये जना: स्वकार्ये सम्पूर्णां मानवतां उपकुर्वन्ति।तेषां पावनं चरित्रं स्मृत्वा खलु सर्वे जना: सुखिन: आनन्दमग्नाश्च भवन्ति। परहितसम्पादनाय,संसारस्य कल्याणाय, धर्मसंस्थापनार्थाय च तेषां अवतारं पृथिव्यां भवति। ईदृशानां वै पुरुषाणां महापुरुषाणां वा कृते एतत् कथ्यते–

परोपकारैक धिय: स्वसुखाय गतस्पृहा: ।
जगद्धिताय जायन्ते महात्मानो महाव्रता: ॥

ते महापुरुषा: यश: काये सदैव जगति अस्मिन् विराजन्ते । ईदृश: एव महापुरुष: 'महात्मा गान्धि'आसीत् । अस्यां पृथिव्यां नैव कोऽपि ईदृश: जन: य: तस्य नाम 'भारतस्वातन्त्र्य– संस्थापकत्वेन''सत्य–अहिंसादि महाव्रती'रूपेण न जानाति । युगप्रवर्तकेन अनेन कर्मयोगिना भारतवर्षं स्वतन्त्रं कारयितुं स्व जीवनं समर्पितम्। अनेनैव न केवलं भारतवर्षस्य अपितु विश्वस्य महापुरुषेषु अस्य गणना उत्कृष्टत्वेन क्रियते जनै:।

गान्धिमहाभागस्य वास्तविकं नाम 'मोहनदास'आसीत् ।अस्य पिता कर्मचन्द्रमहोदय: राजकोटनगरस्य प्रख्यात: अधिवक्ता आसीत् । माता च अस्य 'पुतलीबाई'एका सतीसाध्वी,धर्मपरायणा महिला आसीत् । महात्मागान्धिन: जन्म गुजरातप्रान्ते पोरबन्दर नामके नगरे अक्टूबर मासस्य द्वितीयतारिकायां १८६९ ईसवीये वर्षे राजकोटराज्यस्य मन्त्रिगृहे अभवत् ।

श्रीकर्मचन्दगान्धी महोदयस्य चतस्र: सन्ततय: आसन् । तेषु सर्वेषु मोहनदास: कनिष्ठ: आसीत्। एष: शैशवकालादेव मातृ–पितृ सेवापरायण: धार्मिक:,सत्यप्रिय:,सरल:, सात्विक:,मितभाषी च आसीत्। अस्य प्रारम्भिकी शिक्षा ग्रामे सम्पन्ना,तदनन्तरम् अनेन राजकोटनगरे शिक्षा प्राप्ता।अनन्तरं एष:विधानशास्त्रं पठितुं इंग्लैण्ड देशम् अगच्छत्। विदेशे उषित्वा अपि अनेन स्वमातु: समक्षे कृता मांसमदिराधूम्रपानपरित्यागरूपिणी प्रतिज्ञा पूर्णरूपेण परिपालिता।

विधिपरीक्षाम् उत्तीर्य तेन मुम्बईनगरे निवास: कृत:। तदानीम् एव स: एकदा एकं अभियोगम् अभिलक्ष्य अफ्रीका देशम् अगच्छत्। तत्र भारतीयानां दुर्दशां दृष्ट्वा अतीव उद्विग्नो

जात:। अतएव अतीव करुणाद्रो भूत्वा तत्रैव तेषां कृते असौ सत्याग्रहं कृतवान्।

तत: आगत्य स: स्वदेशवासिनाम् जनानाम् अतीव दीनां हीनां दशाम् अवलोक्यामास। अत: तेन परतन्त्रतां भारतीयानां दुर्दशाया: कारणं विचिन्त्य भारतस्य स्वाधीनतायै दृढनिश्चय: कृत: तथा च एतदर्थं अनेकानि आन्दोलनानि अपि सञ्चालितानि।महात्मागान्धिन: द्वे अस्त्रे प्रसिद्धौ आस्ताम्-'अहिंसा-सत्याग्रहश्च'। आभ्यां द्वाभ्याम् अस्त्राभ्याम् एव तेन भारतदेश: स्वतन्त्र: कारित:। एतदर्थं स: अनेकश: कारागारम् अपि गतवान्।

महापुरुषोऽयं न केवलं स्वातन्त्र्यवीर:,अपितु समाजसुधारक: अपि आसीत्। अयं महात्मा सर्वान् अपि प्राणिन: समभावेन अपश्यत्। अस्पृश्यता- निवारणार्थं, अशिक्षा-दूरीकरणार्थं स: सतत् प्रयासं कृतवान्,साफल्यं च गृहीतवान्।

महात्मागान्धिना अस्माकं देशस्य यादृशी सेवा कृता समर्पण-भावनया,अनेन सर्वेभारतवासिन: तं 'बापू'इति नाम्ना कथ्यन्ते। वस्तुत: स: अतीव सरल: विनम्रश्च आसीत्। अनेनैव स्नेहेन जनेषु स:'महात्मा'इति नाम्ना प्रसिद्ध अभवत्।

अस्य विवाह: 'कस्तूरबा'इति नाम्नि कन्यया सह अभवत्। सा अतीव धर्मपरायणा, पतिपरायणा, स्नेहसिक्ता च आसीत्। पश्चात् सा खलु 'बा'इति अभिधानेन विख्याता। सत्यमेव सा महात्मागान्धी महोदयस्य सहधर्मिणी आसीत्,यतोहि राजनीतिक्षेत्रेऽपि तया अस्य धर्मस्य निर्वाह: कृत:। कृशदेहो ऽपि महात्मा गान्धि: लोहपुरुष: आसीत्।अहिंसाया: दूतोऽयं सदैव देशहिताय अत्र निवासिनां क्लेशनिवारणाय एव चिन्तयति स्म। अनेन अनेकश: विदेशवस्तूनां बहिष्कारं कृत्वा स्वदेशीवस्तूनां प्रचार: कृत:।

वस्तुत: तस्य महात्मन: उपकारान् स्मारं स्मारं वयं सर्वे भारतवासिन: तस्य समक्षे अवनतमूर्धान: भवन्ति। अतीव दु:खस्य कष्टस्य च विषयोऽयं एतादृशोऽपि 'महात्मा',अस्माकं सर्वेषां'बापू'जनवरी मासस्य त्रिंशततमे दिनाङ्के १९४८ तमे वर्षे नाथूराम गोड से नाम्ना विकृतेन युवकेन गोलिकाप्रहारेण कथावशेष: कृत:। तदानीं समये महात्मागान्धि: महाभाग: विरलाभवने प्रार्थनासभायां गच्छति स्म।

महापुरुषं एनं वयं भूयोभूय: नमाम:।विश्ववन्द्यो अयं महात्मा सत्यार्थेषु वस्तुत: अस्माकं 'राष्ट्रपिता'अस्ति।यद्यपि स्थूल-शरीरेण स: अस्माकं मध्ये नास्ति, किन्तु यश: कायेन स: अस्माकं सर्वेषां हृदयेषु विराजते। केनापि कविना सत्यमेव उक्तम्-

''वन्दे तं मनुजदेहधारिणं गान्ध्या: दैवं परम्''

◆◆◆

अस्माकं देश:

सम्पूर्णे महीमण्डले स्थितेषु देशेषु सर्वोत्कृष्ट: अस्माकं भारतवर्ष:,अनेन अतीव प्रिय: एष: अस्माकम्। अयं देश: सर्वप्रभुतासम्पन्न: स्वतन्त्रराष्ट्ररूप: अस्ति। अस्य देशस्य भूमि: सुजला, सुफ ला,शस्यश्यामला,मलयजशीतला च वर्तते। गङ्गा-यमुना-गोदावरी-

सरस्वती-ब्रह्मपुत्र-सिन्धु-कावेरी प्रभृतय: नद्य: स्व पवित्रेण जलेन सर्वप्रकारेण सिञ्चन्त्येनम् । सागरश्च अस्य चरणौ प्रक्षाल्य आत्मानं धन्य-धन्यरूपेण मन्यते । अस्य देशस्य उत्तरे भागे हिमाच्छादित: शुभ्र: हिमालय: शुभ्रकिरीट इव सुशोभते । देवा: अपि अस्य महिमानम् उच्चस्वरेण गायन्ति,वाञ्छन्ति च अत्र जन्म लब्धुम् । उक्तञ्च-

गायन्ति देवा किल गीतकानि
धन्यास्तु ते भारतभूमि: भागे,
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूय: पुरुषा: सुरत्वात् ।।

वस्तुत: देशोऽयं देवभूमिरस्ति । अस्य संस्कृति: पुरातना उत्कृष्टा चास्ति,शकुन्तला-दुष्यन्तयो: पुत्रस्य 'भरत'इति नाम्ना अस्य नाम 'भारतवर्ष'सञ्जात: । मानवस्य आदिसभ्यताया: उदय: अत्रैव अभवत् । अस्मिन्नेव देशे विश्वस्य प्राचीनतम: ग्रन्थ: ऋग्वेद: विद्यते । संसारस्य सर्वासां भाषाणां जननी देववाणी संस्कृतम् अत्रैव समुद्भूता पुष्पिता पल्लविता च । देशोऽयं अनेकेषां महापुरुषाणां जन्मदाता ।

हरिश्चन्द्रसदृशा: सत्यवादिन:,शिवि-दधीचि-कर्णतुल्या: दानवीरा:,राम-परशुराम सदृशा: पितृभक्ता:,भरततुल्या: भ्रातर:, कृष्णसदृशा: कर्मयोगिन:,भीष्मसदृशा: दृढप्रतिज्ञ:,हनुमान्सदृशा: स्वामिभक्ता:, महात्मागान्धि: तुल्या: देशभक्ता: अत्रैव अस्मिन्नेव देशे प्रादुर्भवन् । वस्तुत: अस्य देशस्य महिमा अनिर्वचनीय: अस्ति।

अस्य पुरातनं नाम आर्यावर्त: अस्ति ।प्राचीनसमये देशोऽयं 'स्वर्णचटका'रूपेण प्रसिद्ध:आसीत् । अनेनैव सदैव एषा भूमि: वैदेशिकानां आक्रमणकारिणाम् आकर्षण-केन्द्रम् अभवत् । आक्रमणकारिकै:देशात् अस्मात् महत् धनं लुण्ठितम् । इयं भूमि: तपस्विनां ऋषीणां च आसीत्,अनेनैव अत्र आध्यात्मिकं ज्ञानं प्राचुर्येण विद्यते ।

रामायण-महाभारतसदृशानि महाकाव्यानि अस्यामेव भूमौ संरचितानि । सांख्य-योग-न्याय-वेदान्त सदृशानि दर्शनानि अत्रैव प्रकाशितानि, श्रीमद्भगवद्गीताया: ज्ञानम् अत्रैव प्रसरितम् । कालिदास-भवभूति-माघ प्रभृतय: महाकवय:, स्वामी दयानन्द-विवेकानन्दसदृशा: महापुरुषा: अत्रैव जन्मग्रहणं अकुर्वन् ।

देशेऽस्मिन् न केवलं पुरुषा: अपितु स्त्रय: अपि अग्रगण्या: आसन् ।तासु अपाला-मैत्रेयी-सदृशा:ब्रह्मविचारविचक्षणा:,सीता-सावित्री-सदृशा: पतिपरायणा: पावनाचरणा:, मदालसासदृशा: मातर:,दुर्गावती-लक्ष्मीबाई-सदृशा: वीरता मूर्तय: विशेषेण उल्लेखनीया: सन्ति। वस्तुत: अस्माकं भारतवर्षस्य महिमा सर्वातिशय: आनन्ददायकश्चास्ति।

अस्माकं भारतदेश: विश्वस्य समस्तान् देशान् सदैव शान्तिपाठं पाठयति। अनेनैव एष: सदैव 'जगद्गुरु:'इत्युपाधिना विभूषित: अभवत् ।अस्मिन् देशे विभिन्न वर्गाणां जातीनां,विविध भाषाभाषिणां जना: निवसन्ति, किन्तु सर्वे भेदभावं विस्मृत्य स्नेहेन परस्परं व्यवहारं कुर्वन्ति। ईदृशम् अनेकतायां एकताया: उदाहरणम् अन्यत्र कुत्रापि अनुपलब्धमेव।

भारतवर्षेऽस्मिन् विभिन्न धर्मसम्प्रदायानां जना: परस्परं सम्मील्य एव अस्य उन्नते:

उपाया: कुर्वन्ति, विकासाय च प्रयतन्ते।वस्तुत: धन्या इयं जन्मभू: धन्याश्च अस्या: निवासिन: भारतीया: । अस्य देशस्य महिमा भगवान् मनुना एवम् उक्त:-

एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा: ॥

एतादृश: भारतवर्ष: अस्माभि: सदैव अभिनन्दनीय: वन्दनीयश्च वर्तते।

◆◆◆

अस्माकं महाविद्यालय:

अस्माकं महाविद्यालयस्य नाम 'राजकीय: महाविद्यालय:'बांसवाडा अस्ति । महाविद्यालयोऽयं राजस्थानप्रदेशस्य सुदूर दक्षिणस्यां दिशि आदिवासी क्षेत्रे नगराद् बहि: सुरम्ये वातावरणे स्थितोऽस्ति ।अस्य भव्यं भवनं सुधया अवलिप्तं दूरत: एव दृश्यते ।अत्र सर्वाषां कक्षाणां प्रकोष्ठानि पृथक्-पृथक् निर्मितानि सन्ति विशालाकारयुक्तानि ।प्रत्येके कक्षे काष्ठनिर्मितानि वेत्रासनानि पंक्तिबद्धानि सन्निहितानि सन्ति।

महाविद्यालयस्य भवनस्य समक्षे एकं सुन्दरम् उद्यानम् अस्ति ।यत्र बहव: हरिता: पुष्पवृक्षा: विराजन्ते ।पृथिव्यां च कोमलानि हरितानि च शाद्वलतृणानि शोभन्ते तेषां स्पर्शम् अतीव सुखकरम् आनन्ददायकञ्च अस्ति । उद्याने अस्मिन् विविधवर्णानि सुगन्धिनि पुष्पाणि प्रतिदिवसं नूतनाम् आभां धारयित्वा विकसन्ति, आगन्तुकानां जनानां छात्र-छात्राणां च मनांसि प्रफुल्लीकुर्वन्ति ।अस्य उद्यानस्य रक्षार्थं एक: मालाकार: नियुक्त: अस्ति । महाविद्यालयं परित: एकं विशालं प्राचीरं वर्तते । यस्य उत्तरस्यां दिशि डूंगरपुरमार्गे एकं लौहमयं विशालं गौपुरं विराजते।

अस्मात् एव मार्गात् छात्रा: अन्ये च जना: महाविद्यालयं प्रविशन्ति । अस्मिन् महाविद्यालये एक: विशाल: पुस्तकालय: वाचनालयश्च अस्ति । पुस्तकालयभवनं महाविद्यालय भवनस्य उत्तरस्यां दिशि निर्मितम् अस्ति। पुस्तकालयेऽस्मिन् छात्रा: स्थित्वा अध्ययनं कुर्वन्ति। अत्र सर्वेषां विषयानां बहूनि पुस्तकानि सन्ति। अत्र एक: पुस्तकालया-ध्यक्षोऽपि नियुक्तोऽस्ति।

महाविद्यालयेऽस्मिन् स्नातक-स्नातकोत्तरकक्षाणाम् अध्यापनं सम्पद्यते । अत्र हिन्दी-राजशास्त्र-संस्कृत-अर्थशास्त्र-भूगोल-उर्दू-विज्ञान-वाणिज्यं-आङ्गलभाषा-दर्शनशास्त्र-इतिहासादीनाम् अनेकानां विषयानां अध्ययनं सुचारुरूपेण प्रचलति। अस्मिन् महाविद्यालय त्रिसहस्र संख्यका: छात्रा: अध्ययनं पठन-पाठनं च कुर्वन्ति।

अत्रत्या: अध्यापका: सुयोग्या: कार्यकुशला: प्रवीणाश्च स्वेषु स्वेषु विषयेषु सन्ति ।अस्य महाविद्यालयस्य छात्राणां विश्वविद्यालयस्य योग्यताक्रमे प्राय: प्रतिवर्षेऽनेकविषयेषु स्थानम् आयाति । अत: महाविद्यालयोऽयं उदयपुरमण्डले श्रेष्ठतमेषु

महाविद्यालयेषु गण्यते । अस्य छात्राः राज्यस्तरीयासु प्रतियोगितासु प्रायः सहभागितां कुर्वन्ति,अग्रेसराश्च भवन्ति तासु।

समये समये आयोजितासु प्रतियोगितासु प्रातिनिध्यं कुर्वतां छात्राणां प्रशिक्षणार्थं वाक् प्रौढिं प्रदर्शनार्थञ्च प्रतिसप्ताहे शनिवासरे छात्र-सभायाः आयोजनं भवति । यस्यां छात्राः स्व भाषणं कवितां आख्यायिकाञ्च प्रस्तुवन्ति। अनेन तेषां छात्राणां बुद्धेः योग्यता वर्धते,वाक् पाटवं च आयाति । छात्राणां शरीरस्य विकासाय महाविद्यालयेऽस्मिन् एकं क्रीडाक्षेत्रम् अपि वर्तते । छात्राः अस्मिन् पठनानन्तरं हस्तकन्दुकपादकन्दुक-क्रीडा-धावनादिविविधान् व्यायामान् कुर्वन्ति । तेषां शिक्षणार्थं अत्र एकः व्यायामशिक्षकोऽपि अस्ति।

अस्मिन् महाविद्यालये राष्ट्रीय-सेवा-योजनायाः इकाई तिस्रः सन्ति । सर्वकारेण देशरक्षणार्थं अत्र राष्ट्रीय-सैनिक-प्रशिक्षणस्य ''एन.सी.सी.इत्यस्य व्यवस्थापि कृता वर्तते । महाविद्यालयेऽस्मिन् प्रतिवर्षं छात्राणां चुनावोऽपि सम्पद्यते । छात्रैः निर्वाचिताः छात्राः छात्रसंघमाध्यमेन महाविद्यालयस्य विकासाय छात्राणां काठिन्यं दूरीकरणार्थं च यतन्ते ।प्रतिवर्षं अस्य महाविद्यालयस्य वार्षिकोत्सवोऽपि भवति,तस्मिन् पुरस्कार- वितरणं भवति । ये छात्राः वर्षपर्यन्तं अनेकासु प्रतियोगितासु भागं गृहीतवन्तः तेभ्यः।

अस्य महाविद्यालयस्य प्राचार्यः श्री लक्ष्मणभाटिया अस्ति । सः अतीव सुयोग्यः अध्यवसायी,प्रशासनकुशलश्च अस्ति । विदुषां प्रेमी,कलाप्रेमी कर्मठश्च अयं सदैव महाविद्यालयस्य विकासाय उन्नत्यर्थं च प्रयतते समर्पणभावनया । सर्वकारस्य आदेशानुसारेण अद्यत्वे एकस्याः महाविद्यालय-विकाससमित्याः अपि संघटनं कृतं विद्यते। समितिरेषा महाविद्यालयस्य विकासार्थं चिन्तनं प्रयत्नं च करोति। अनेन प्रकारेण अस्माकं महाविद्यालयः वस्तुतः एकः आदर्शः महाविद्यालयः अस्ति । अतः अस्माभिः सदैव अस्य विद्यामन्दिरस्य उन्नत्यर्थं प्रयत्नो विधेयः।

◆◆◆

विद्यार्थिजीवनम्

विद्यार्थिजीवनं मानवजीवनस्य स्वर्णिमकालोऽस्ति । अस्मिन् काले एव मानवस्य निर्माणं भवति । अस्मिन् समये अङ्किताः संस्काराः मनुष्यजीवने स्थायीरूपेण संस्थिताः भवन्ति। ते कदापि विनष्टाः न भवन्ति। वस्तुतः अस्य जीवनस्य सफलता एव मानवजीवनस्य सफलता वर्तते।

अस्माकं शास्त्रेषु मानवजीवनं चतुर्षु आश्रमेषु विभक्तीकृतं विद्यते । तेषु प्रथमः

ब्रह्मचर्याश्रम:। अयमेव विद्यार्थिजीवनं छात्रजीवनं वा कथ्यते। अस्य आश्रमस्य महत्त्वं ईदृशं यत् अस्माकं पुरातनग्रन्था: अनेन आश्रमेण मनुष्यस्य द्वितीयं जीवनं मन्यन्ते। वस्तुत: मानव: यदा जन्म गह्णाति ,तस्मिन् काले स: पशु: तुल्य: भवति। तस्य जीवनस्य लक्ष्यं केवलं खादनं पानं, स्वप्नञ्च वर्तते।

किन्तु छात्रजीवने स: संस्कारान् लभते। अस्मिन् समये तस्य चरित्रनिर्माणं भवति। अस्मिन् काले अर्जितेन ज्ञानेनैव स: स्वजीवने साफल्यं भजते। धर्मतत्त्वस्य अवबोधनाय कालोऽयं महत्त्वपूर्णोऽस्ति। अनेन कथितं केनचित् कविना सम्यगेव–

चारित्र्यस्य विनिर्माणं साफल्यं जीवनस्य च।
आश्रमे प्रथमे नूनं कर्तव्यं ब्रह्मचारिणा॥

विद्यार्थिन: एव भाविन: नागरिका: अस्माकं देशस्य च कर्णधारा: सन्ति।ते खलु समाजस्य राष्ट्रस्य च चहुंमुखी विकासाय सक्षमा: भवन्ति।अस्मिन् काले आश्रमे वा मनुष्य: महापुरुषाणां विचारान् पठितुं,सम्यक्रूपेण च आचरितुं अवसरं प्राप्नोति।

अस्मिन् एव समये विद्यार्थिन: स्व तपोमयेन जीवनेन कठोरव्रतेन च ज्ञानार्जनं कुर्वन्ति,कठोरव्रतं च आचरन्ति।अनेन तपसा ज्ञानेन च ते स्व भाविजीवने कष्टानि सोढुं समर्था: भवन्ति।मनुष्यजीवने विद्याया: ज्ञानस्य तपस: दानादिधर्मस्य च विशिष्टं महत्त्वम् अस्ति। विषयेऽस्मिन् महाकविना भर्तृहरिणा सम्यक् एव उक्तम् –

येषां न विद्या न तपो न दानं,
ज्ञानं न शीलं न गुणो न धर्म:।
ते मर्त्यलोके भुवि भारभूता:,
मनुष्यरूपेण मृगाश्चरन्ति॥

वर्तमानसमये विद्यार्थिषु बहव: दोषा: प्रविष्टा: अभवन्।अनेन ते दिग्भ्रमिता: सञ्जाता:। यतोहि सम्प्रति विद्यार्थिन: स्वहितं विस्मृत्य खलु राजनीतिकक्षेत्रेषु भागं ग्रह्णन्ति।अनेन तेषां जीवनं अन्धकारमयं सञ्जातम्।प्राचीनसमये विद्यार्थिनां महती प्रतिष्ठा आसीत्।यतोहि ते सदाचारिण: सत्यवक्तार: शीलवन्तश्च आसन् तस्मिन् समये।ते संयमस्य प्रतिमूर्तय: आसन्।तस्मिन् काले ते खलु स्वगुरूणां सेवां कुर्वन्ति स्म,किन्तु अद्यत्वे एतादृशी स्थिति: न प्रतीयते।अस्माकं शास्त्रेषु विद्यार्थिणां पञ्चलक्षणानि कथितानि–

काकचेष्टा बकोध्यानं
श्वाननिद्रा तथैव च।
स्वल्पाहारी,गृहत्यागी
विद्यार्थिन:पञ्चलक्षणम्॥

वस्तुत: एतेषां नियमानां सम्यक्रूपेण पालनेनैव कोऽपि बालक: स्व विद्यार्थिजीवने ज्ञानोपार्जने सफल: भवति। चरित्रनिर्माणे च सक्षम: भवति।विद्यार्थिणां मुख्यं लक्ष्यं जीवनस्य पठन–पाठनं ,स्वचरित्रनिर्माणं च भवितव्यम्। ये छात्रा: स्वास्थ्यस्य,चरित्रस्य रक्षां कुर्वन्ति ते कदापि स्व भाविजीवने पश्चात्तापं न कुर्वन्ति।

छात्रै: सदैव स्वगुरूणां आज्ञा पालनीया। अनेन खलु ते प्रसन्ना: भूत्वा उत्कृष्टं

ज्ञानं, स्नेहाशिषं च दास्यन्ति। तेषां शुभाशिषेण छात्राणां जीवनं सफलं भविष्यति। सफले च तेषां जीवनस्य सञ्जाते अस्माकं देशस्य राष्ट्रस्य च बहुमुखी विकासोऽपि भविष्यति। अतएव छात्रैः सदैव अस्य स्वर्णावसरस्य सदुपयोगः कर्तव्यः, समयस्य विनाशः न कर्तव्यः कदापि।

ये छात्राः अस्मिन् काले आलस्यं कुर्वन्ति, गुरूणां आज्ञां न पालयन्ति, सत्यं न आचरन्ति, परिश्रमेण संयमेन च नियमपूर्वकं कार्याणि न कुर्वन्ति, ते कदापि स्वजीवने सफलाः न भवन्ति। वस्तुतः कालोऽयं सुखानाम् उपभोगाय न वर्तते। परिश्रमेण विना कदापि कोऽपि विद्यां लब्धुं न शक्नोति। अतएव उच्यते–

सुखार्थिनः कुतो विद्या,
विद्यार्थिनः कुतो सुखम्।
सुखार्थी वा त्यजेद् विद्यां,
विद्यार्थी वा त्यजेत् सुखम्॥

वस्तुतः विद्यार्थिभिः सदैव नियमपूर्वकं अल्पं भोजनं करणीयम्, नियतसमये प्रातःकाले व्यायामः करणीयः अनेन तस्य शरीरं बलिष्ठं पुष्टं च भविष्यति। जीवने साफल्याय शरीरपुष्टिः आवश्यिकी। तैः सदैव आलस्यं परित्यज्य प्रातःकाले चतुर्वादने उत्थाय अध्ययनं कर्तव्यम्। सदैव शोभनविचारयुक्तानि पुस्तकानि पठितव्यानि। अनेन तेषां चित्तशुद्धिः भविष्यति। जीवनस्य निर्माणाय मानवस्य चित्तस्य शुद्धेः अतीव आवश्यकता अस्ति। यतोहि स्वस्थे चित्ते स्वस्थानां विचाराणां स्थितिः निवासः वा भवति, इति।

◆◆◆

ग्राम्यजीवनम्

अस्माकं भारतवर्षः ग्रामाणां देशोऽस्ति। अस्य अधिक संख्यकाः नागरिकाः ग्रामेषु निवसन्ति। तेषां जीवनम् अतीव सरलं सुखकरं च भवति। ग्रामेषु प्रायः ते कृषिमेव कुर्वन्ति। अनेन ते कृषकाः कथ्यन्ते। अस्माकं भारतदेशः कृषिप्रधानः देशोऽस्ति। कृषकाः वस्तुतः अस्माकं सर्वेषां कृते जीवनं ददाति, यतोहि ते स्व क्षेत्रेषु अस्माकं कृते बहूनि जीवनोपयोगिनि वस्तूनि उत्पादयन्ति। अतः तेषां महत्त्वं सर्वविदम् एव।

ग्रामेषु कृषकाणां जीवनम् अतीव कष्टकरं वर्तते। ते प्रातः कालाद् सायंकालपर्यन्तं कठिनं परिश्रमं कुर्वन्ति, यतोहि कृषिः परिश्रमेण विना भवितुं न शक्नोति। ग्रामेषु जनाः प्रायः पशुपालनमपि कुर्वन्ति। पशवः कृषिकार्येषु तेषां सहाय्यं कुर्वन्ति। गावः महिषयश्च दुग्धमपि ददति। अनेन कृषकाणां ग्रामीणानां वा बालकाः संपुष्टाः बलिष्ठाः च भवन्ति। ग्रामेभ्यः दुग्धं नगरेषु अपि आनयते, तत्र तस्य वितरणं विविधमाध्यमेन भवति।

वस्तुतः ग्रामीणानां जीवनं अतीव कठिनं परिश्रममयं च वर्तते, किन्तु कठिनपरिश्रमं करणेऽपि ते सर्वे प्रसन्नवदनाः भवन्ति। कृषकास्तु प्रायः मध्याह्ने सायंतने च स्वेषु स्वेषु क्षत्रेषु

एव भोजनं कुर्वन्ति,वृक्षाणां छायायां स्थित्वा । अनेकश: रात्रौ अपि क्षेत्रेषु एव स्वपन्ति,क्षेत्रे स्थितानां शस्यानां रक्षार्थम् । ग्रामीणेषु पारस्परिक -प्रेमभावना -सहयोगभावना च भवति। अनेन अस्माकं ग्रामेषु अतीव आनन्ददायकं शान्तं च वातावरणम् अस्ति।

अद्यत्वे नगरेषु यादृशं प्रदूषणं दृश्यते तादृशं ग्रामेषु न अस्ति। अनेन तत्र सर्वे जना: विशुद्धां जलवायुं सेवन्ते । ग्रामेषु प्राय: सर्वे जना: शीतोष्णबाधां विहाय स्वेषु कार्येषु संलग्ना: भवन्ति । तत्र नगरसदृशा: भोगसाधनानि न सन्ति । अनेन ग्रीष्मकाले ते वृक्षाणाम् आश्रयं गृह्णन्ति। शीतकाले च अग्निं प्रज्वाल्य उष्णतां लभन्ते।

ते शैत्याधिक्ये माघमासेऽपि शस्यरक्षणार्थं स्व क्षेत्रेषु स्वपन्ति तथा आतपाधिक्ये ज्येष्ठे मासेऽपि आतपे तत्र खलु कार्यं कुर्वन्ति । ग्रीष्मे तेषां शरीरेभ्य: श्रमकणानि बहूनि प्रवहन्ति,किन्तु तेऽस्य चिन्तां परित्यज्य मनोयोगपूर्वकं कार्यं सम्पादयन्ति।

कृषका: प्राय: स्वभावेन सरला: छलछद्मरहिता:विनम्राश्च भवन्ति , किन्तु अस्माकं देशे व्यापारिण: प्राय: तेषां लुण्ठनं कुर्वन्ति। कृषकस्य शस्यस्य मूल्यं कदापि उचितरूपेण न मिलति । व्यापारिजना: तेषां शस्यं अल्पमूल्येन क्रीत्वा उच्चमूल्येन विक्रीणन्ति । अनेन सारल्येन एते ग्रामीणा: सदैव हानिं लभन्ते ।यद्यपि अद्यत्वे सर्वकार: अनेकप्रकारेण विषयेऽस्मिन् प्रयत्नं करोति,तथापि अधुनापि अधिक: प्रयत्न: करणीय: अस्ति। वस्तुत: ग्रामीणजना: अस्माकं हृदयानि आर्थिकदृष्ट्या रीढस्य अस्थिनि , अत: अस्माभि: सदैव तेषां आदर: करणीय:,समये-समये च तेषां सहायता कर्तव्या ।

◆◆◆

पुस्तकालय:

पुस्तकानाम् आलय:,इति पुस्तकालय: कथ्यते ।यस्मिन् स्थाने बहूनि पुस्तकानि एकत्रीकृत्य विविधविषयाणां,तेषां संरक्षणं,सर्वेषां पाठकानां कृते पाठनव्यवस्था क्रियते तत् स्थानं 'पुस्तकालय:'इति नाम्ना कथ्यते । पुस्तकालय: विद्यालयस्य महाविद्यालयस्य नगरस्य ग्रामस्य देशस्य वा भवितुं शक्यते। विद्यालयस्य महाविद्यालयस्य पुस्तकालये तस्यैव विद्यालयस्य महाविद्यालयस्य वा छात्रा: अध्येतुं शक्यन्ते,किन्तु नगरस्य देशस्य वा पुस्तकालये सर्वे नागरिका: पठितुं शक्यन्ते । ते सर्वे तस्य सदस्यतां ग्रहीत्वा तस्मिन् प्रवेष्टुं अर्हन्ति,अध्ययनं च कर्तुं पारयन्ति । केचन जना: पुस्तकालयस्य आजीवनसदस्यो भूत्वा तत्र पुस्तकानि आप्नुवन्ति पठन्ति च।

पुस्तकालयेषु विविधानां विषयाणां पुस्तकानि संग्रहीतानि भवन्ति । तत्र बहूनि समाचारपत्राणि अपि आयान्ति ।बहूनां पत्रिकानाम् अपि तत्र पठनव्यवस्था भवति । नियमितसमये गत्वा तत्र पाठका: अध्येतार: वा नाना पत्रपत्रिका: विविधविषयाणां च पुस्तकानि पठन्ति ।केषुचित् पुस्तकालयेषु निर्धारितं शुल्कं दत्वा पुस्तकानि गृहम् अपि नेतुं शक्यते ।

निर्धारित समयावधिपर्यन्तं तानि पुस्तकानि गृहेऽपि पठितुं शक्नोति कोऽपि जनः। पुस्तकालये जनानां ज्ञानवर्धनं मनोरञ्जनं च भवति।

शिक्षायाः प्रचारे पुस्तकालयानांमहत्त्वपूर्णंस्थानं विद्यते।निर्धनाः जनाः, छात्र- छात्राश्च तत्र गत्वा बहूनि बहुमूल्यानि पुस्तकानि पठितुं शक्नुवन्ति। अनेन तेषां महान् उपकारः सहयोगश्च भवति। अनुसंधातारोऽपि पुस्तकालयेषु गत्वा स्वविषयसम्बन्धिनी पुस्तकानि पठन्ति। पुस्तकालयेषु समाचारपत्राणि पठित्वा नागरिकाः देशविदेशयोः समाचारान् सरलतया जानन्ति। कस्यापि विद्यालयस्य महाविद्यालयस्य वा स्तरस्य अनुमानं तस्य पुस्तकालयेन सहजैव भवति।

अस्माकं देशे सम्प्रति बहवः पुस्तकालयाः सन्ति। पुरा अपि 'तक्षशिला नालन्दा' इत्या-ख्योः विश्वविद्यालययोः सम्पन्नौ पुस्तकालयौ आस्ताम्। श्रूयते एतत् यत् मुगलैः आक्रमणसमये तयोः पुस्तकालयोः अग्निदाहः कृतः। येन बहूनि पुस्तकानि ज्वलितानि विनष्टानि च। तत्र भूयसी संख्या पुस्तकानाम् आसीत्।वर्तमानसमयेऽपि अस्माकं देशस्य बहवः पुस्तकालयाः अतीव सम्पन्नाः मन्यन्ते। तेषु गुरुकुलकांगडीविश्वविद्यालयस्य, हरिद्वारे, सम्पूर्णानन्दसंस्कृत-पुस्तकालयस्य ,वाराणस्यां तत्रैव हिन्दू विश्वविद्यालयस्यापि ,दिल्ली विश्वविद्यालयस्य,दिल्ली नगर्यां,कलकत्ता नगरे,पूना नगरे,बडौदा नगरे,मुम्बई नगर्यां च उल्लेखनीयाःसन्ति।

अस्माकं देशे सम्पन्नाः जनाः पुस्तकालयानां महत्त्वं जानन्ति। अनेनैव ते पुस्तकालयानां निर्माणाय भूयसीं धनराशिं दानं कुर्वन्ति। तेषां विश्वासः यत् अनेन पुस्तकालयेन अस्माकं देशवासिनः सर्वे शिक्षिताः ज्ञानिनश्च भविष्यन्ति। तेन विश्वे भारतवर्षस्य गौरवं प्राचीनं पुनः वर्धिष्यति। अस्माकं सर्वकारः अपि पुस्तकालयानां स्थापनाय तेषां संवर्धनाय संरक्षणाय व्यवस्थायाः कृते च बहुधनं ददाति। अनेनैव तेषां पुस्तकालयानां स्थितिः सम्पद्यते। पुराकाले भारतस्य नृपैः अपि स्वराज्ये राजभवने वा सम्पन्नानां पुस्तकालयानां व्यवस्था कृता आसीत्। तेषु जोधपुरस्थितः पुस्तकालयः उदयपुरे ,जयपुरे भरतपुरे,कोटा नगरे च स्थितानां पुस्तकालयानां नामोल्लेखः विशेषरूपेण कार्यः।

◆◆◆

वसन्तर्तुः

अस्मिन् जगति भारतवर्षस्य महत्त्वपूर्णं स्थानम् अस्ति।यतोहि भारतवर्षं ऋतुप्रधानं राष्ट्रम् अस्ति।यादृशी सुषमा अत्र दृश्यते प्रकृतेः तादृशी सर्वस्मिन् विश्वे सुदुर्लभास्ति। सम्पूर्णे वर्षे अत्र षड्-ऋतवः भवन्ति ,क्रमेण च तेषां ईदृशी स्थितिः-वसन्तः,ग्रीष्मः,वर्षा,शरद्,हेमन्तः शिशिरश्च इति। यद्यपि एषु सर्वेषु सर्वे एव ऋतवः रमणीयाः सन्ति,किन्तु वसन्तःऋतुः

सर्वोत्कृष्टत्वं भजते। अनेनैव ऋतुरयं ऋतुराज: कथ्यते।

ऋतुराजस्य अस्य अन्यानि नामानि कुसुमाकर:,मधुमासश्चापि सन्ति। वस्तुत: असौ ऋतु: अन्येभ्य: सर्वेभ्य: ऋतुभ्य: आकर्षक:,सुन्दर: मनोहरश्च अस्ति। वसन्तर्तु: शिशिरऋतो: पश्चात् आगच्छति। शिशिर-ऋतौ सर्वेषां वृक्षाणां वनस्पतीनां वा पत्राणि पीतानि भूत्वा भूमौ पतन्ति। सर्वे वृक्षा: दिगम्बरा: इव प्रतीयन्ते,किंवा शोकार्ता भवति प्रकृति:।

किन्तु ऋतुराजवसन्तस्य आगमने सर्वे वृक्षा: लताश्च नूतनपल्लवसम्पन्ना: भवन्ति। उद्यानेषु मयूरा: प्रसन्ना: भूत्वा नृत्यन्ति। वृक्षाणां शारवासु पक्षिण: इतस्तत: प्रसन्ना: इव मधुरं गायन्ति । कोकिलानां कृते तु ऋतुरयं महोत्सव: इव भवति।ते सर्वे आम्रवृक्षेषु पुन: पुन: उड्डीय 'कुहू' 'कुहू'इति मधुरं ध्वनिं कृत्वा पुरुषाणां स्त्रीणां च मनांसि हरन्ति। एवं वस्तुत: ऋतुरेष: सर्वेषां जनानां प्राणीनां वा आकर्षणमस्ति । कथितं सम्यगेव केनचित् कविना-

न तज्जलं यन्न सुचारु पङ्कजं,
न पङ्कजं तत् यदलीन षटपदम्।
न षट्पदोऽसौ कलगुञ्जितौ न य:
न गुञ्जितं तन्न जहार यन्मन:।।

अस्मिन् ऋतौ सर्वे तडागा: कमलसम्पन्ना: दृश्यन्ते।तेषु भ्रमरा: मधुरं गुञ्जन्ति, स्वप्रियया सह तेषां पुष्पाणां रसपानं कुर्वन्ति। पलाशवृक्षा: अस्मिन् समये पुष्पिता: रक्तवर्णा: भवन्ति। एवमेव कर्णिकार -पुष्पाणां पीताभा सर्वेषां जनानां मनांसि हरति। कुन्दपुष्पस्य सुगन्धिस्तु अतिदूरादेव जनानां चेतांसि आकर्षयति। वस्तुत: सम्पूर्णे वातावरणे मन्द: मन्द: सुगन्धित: वायु: प्रवहति। एतत् सर्वम् अवलोक्य एव सम्भवत: कविना उक्तम्-

नवकिसलयरागरञ्जितोऽयं रसाल:,
हरति मदकलानां कोकिलानां मनांसि।।
बकुलमलिकुलानां गुञ्जितेनाकुलं तत्,
मृदुलसुरभिगन्धिं गन्धवाहं करोति।।

अस्मिन् ऋतुराजे आम्रमञ्जर्य: विकसन्ति।वृक्षाणानां पुष्पिता: शाखा: पुष्पै: भरिता: प्रणमन्त्य: इव प्रतीयन्ते।वस्तुत: अस्मिन् काले सम्पूर्णा एव प्रकृति: सर्वत्र खलु प्रफुल्लिता इव आभाति।अस्मिन् ऋतौ सूर्यस्य आतप: सुखदायक: भवति।दिवसा: समशीतोष्णा: भवन्ति। अत: सर्वे ग्रामवासिन: नगरवासिनश्च प्रतिक्षणं नवनवताम् अनुभवन्ति। महाकविकालिदासेन ऋतुसंहारे नाम गीतिकाव्ये वसन्तर्तो: वर्णनम् अतीव मनोहरं कृतं विद्यते,य: सहृदयानां चेतांसि सहजेनैव हरति-

द्रुमा: सपुष्पा: सलिलं सपद्मं,
स्त्रियं सकामा: पवन: सुगन्धि:।
सुखा: प्रदोषा दिवसाश्च रम्या:,
सर्वं प्रिये चारुतरं वसन्ते।।

अस्मिन् ऋतौ एव रङ्गानाम् उत्सव: 'होलिका' इति भवति। उत्सवोऽयं सर्वान् जनान् प्रीणाति। होलिकावसरे जना: स्त्रियश्च मिलित्वा परस्परं विविधै: रागै: क्रीडन्ति, नृत्यन्ति, गायन्ति हसन्ति च । अस्मिन् ऋतौ सर्वेषु स्नेहस्य संचार: भवति ।वस्तुत: वसन्तकाले सर्वत्र नवीनता, उत्साह:, स्फूर्ति: प्रसरति ।अस्य ऋतो: वैशिष्ट्यं विचिन्त्य एव सम्भवत: श्रीकृष्णोऽपि गीतायां स्वस्योपमा ऋतुराजेन सह करोति–

''ऋतूनां कुसुमाकरोऽस्मि''

अस्मिन् समये प्रात:कालिकं भ्रमणम् अतीव स्वास्थ्यकरं हितकरञ्च मन्यते ।यतोहि प्रकृतिप्रदत्तानि सर्वाणि गुणानि ऋतौ अस्मिन् प्रात:काले वातावरणे विद्यन्ते ।अनेन खलु आयुर्वेदशास्त्रे वसन्तभ्रमणं पथ्यकरं कथितम्–

''वसन्तेभ्रमणं पथ्यम्''

वस्तुत: मानवस्य जीवने तस्य बाल्यावस्था यथा सुखमयी आनन्ददायिनी च भवति तथैव सम्पूर्णे वर्षे कालोऽयं सर्वेभ्य: प्राणिभ्य: सुखम् उल्लासम् आनन्दञ्च ददाति। अस्मिन् काले जगत: सर्वेषु प्राणिषु मादकता समायाति ,प्रसन्नताया: नूतन: संदेश: प्रददाति ऋतुरेष: । प्रतीयते यत् परमेश्वर: सृष्टे: रमणीयतमं स्वरूपम् अस्मिन् ऋतौ वै प्रदर्शयति। अनेनैव मानिनीनां मानमपि ऋतौ अस्मिन् विनष्टं भवति । मानापगमे प्रिया–प्रियतमयो: विलासव्यापार: निर्बाधरूपेण प्रसरति,न केवलं मानवानां अपितु सर्वेषां प्राणिनां समूहा: शृङ्गारस्य रसस्यताम् अनुभवन्ति। आर्याणां सौरवर्षोऽपि वसन्तर्तौ एव प्रारभ्यते तथा च चन्द्रवर्षस्य आरम्भोऽपि अस्मिन् ऋतौ खलु भवति। प्राय: सर्वै: कविभि: अस्य ऋतो: वर्णनम् स्वकाव्येषु कृतम्। महाकवि: माघ: कथयति वसन्तविषये–

नवपलाशपलाशवनं पुर:
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरै: ॥

◆◆◆

ग्रीष्मर्तु:

वसन्तर्तो: अनन्तरं ग्रीष्मस्य आगमनं भवति । ग्रीष्मकाले सूर्य: प्रचण्डवेगेन तपति। ग्रीष्मस्य तीक्ष्णेन आतपेन सर्वे मानवा: पशु–पक्षिणश्च संतप्ता: व्याकुलाश्च भवन्ति। सर्वे च ते जलं प्रति धावन्ति । श्रान्ता: पथिका: वृक्षाणां छायां सेवन्ते । ग्रीष्मे तडागा: शुष्का: भवन्ति। नद्य: सूक्ष्मा: अल्पतोयाश्च भवन्ति ।

ग्रीष्मर्तौ प्रखरातपेन संत्रस्ता: सर्वे जना: मुहुर्मुहु: 'आह,ओह ,उफ 'इतिशब्दानि

बहुविधानि कुर्वन्ति। अस्मिन् काले पक्षिण: सर्वाधिका: व्याकुला: प्रतीयन्ते,यतोहि स्व गलदण्डम् अतिवेगेन चालयन्त: ते निदाघप्राबल्यं सङ्केतयन्ति। अस्य ऋतो: वर्णनं महाकविकालिदासेन ऋतुसंहारे गीतिकाव्ये अतीव सुन्दरं कृतम्-

र वेर्मयूखैरभितापितो भृशं
विदह्यमान: पथि तप्तपांसुभि।
अवाङ्मुखो जिह्मगति: श्वसन् मुहु:
फणी मयूरस्य तले निषीदति॥

ऋतु: एष: प्राणिनां वैरभावमपि स्वाभाविकं दूरीकरोति,तदैव तु मयूर: परस्परवैरभावं विस्मृत्य स्व आश्रितं सर्पं छायाशान्तिं सुखं च ददाति। कीदृशं सुन्दरं मनोहारि च वर्णनम् अस्ति। निदाघेऽस्मिन् वनवासिन: प्राणिन: सिंहा:, गजा:,मृगाश्च सर्वे आतपेन संतप्य तरूणां घनपल्लव-छायासु उपविश्य नेत्राणि निमील्य स्व स्व वैरं विस्मरन्ति। शिरीषकुसुमानि अस्मिन् ऋतौ एव विकसन्ति।

अस्मिन् ऋतौ शीतलेन जलेन स्नानं अतीव रोचते।गृहकार्येषु कार्यालयेषु च संलग्ना: जना: विद्युत्व्यञ्जनै: काञ्चित् शान्तिं लभन्ते, किन्तु कृषका: प्रखरे निदाघेऽपि स्वक्षेत्रेषु कार्याणि कुर्वन्ति। तेषां शरीरेभ्य: श्रमस्वेदकणानि निरन्तरं प्रवहन्ति, ते अस्य चिन्तां विहाय स्व देशस्य राष्ट्रस्य कृते परिश्रमं कठोरं कुर्वन्ति।वस्तुत: सूर्यस्यप्रखरतरै: किरणै: संतप्ता: अपि ते कृषका: दु:खानि अनुभूय सर्वान् जनान् सुखिन: कुर्वन्ति।ग्रीष्मतौ दिवसा: परिणामे रमणीया: भवन्ति।

एवमेव छात्रा: स्ववार्षिकपरीक्षानन्तरं ग्रीष्मावकाशं प्राप्य स्व-स्वग्रामेषु सम्बन्धिनां गृहेषु वा गच्छन्ति,तत्र मनोविनोदपूर्वकं स्वकालं नयन्ति।स्वपरीक्षाफलं प्रतीक्ष्यमाणा: ते ग्रीष्मेऽपि प्रचण्डे सन्तप्ता: समये समये ''अतीव उष्णता वर्तते अद्य तु ''इति उक्त्वा कथं कथमपि स्वदिवसान् यापयन्ति। ये धनिन: सन्ति ते कार्यानेन स्वपरिवारजनै: सह तीर्थस्थानेषु नदीषु वा गत्वा आमोदं प्रमोदं च कुर्वन्ति। एवं ऋतुरेष: वस्तुत: अतीव कष्टप्रद: सर्वेषां प्राणिनां कृते , तथापि महाकविकालिदासेन अभिज्ञानशाकुन्तले ग्रीष्मवर्णनं अतीव मनोहरं कृतं विद्यते-

सुभगसलिलावगाहा: पाटलसंसर्गिसुरभि: वनवाता:।
प्रच्छायसुलभनिद्रा दिवसा: परिणामरमणीया:॥

◆◆◆

वर्षर्तु:

ग्रीष्माद् अनन्तरं वर्षर्तो: आगमनं भवति। ऋतुषु अयं तृतीय: ग्रीष्मकालस्य सूर्यस्य किरणै: सन्तप्ता: जना: प्राणिनश्च अस्मिन् ऋतौ चिरशान्तिं लभन्ते। वस्तुत: ऋतु: एष:

जीवनदायी वर्तते। ग्रीष्मे यज्जलं नदीषु तडागेषु वा शुष्यति अस्मिन् ऋतौ तत् पुनः मेघैः परिपूर्यते। सर्वत्र हरीतिमा प्रसरति। नभः मेघैराच्छन्नः भवति। अस्मिन् काले बाहुल्येन वर्षा भवति। मेघानां परस्पर-संघट्टनेन विद्योतते विद्युत्, प्रचण्डः शब्दः च जायते, तत् मेघानां गर्जनमिव आभाति।

वर्षाकाले यदा कदा जलबिन्दवः शनैः शनैः पतन्ति, कदाचित्तु प्रबल-रूपेण वृष्टिः भवति। अस्मिन् ऋतौ सर्वे जलाशयाः जलेन परिपूर्णाः जायन्ते, जलं खलु धूलकणैः मलिनं भवति। नदीषु जलं क्षेत्राणां मार्गाणां पर्वतानां च मृदां गृहीत्वा वेगेन प्रवहति। ग्रीष्मकाले प्रचण्डातपैः संतप्ताः सर्वे वनवासिनः प्राणिनः ऋतौ अस्मिन् उल्लासं अनुभवन्ति, इतस्ततः धावन्ति कूर्दन्ति च। मयूराः नृत्यं कुर्वन्ति।

वर्षर्तौ प्रकृत्याः स्वरूपं मनोहारि रमणीयञ्च अतीव भवति। दिग्दिगन्तव्यापिनी श्यामलतां विलोक्य सर्वेषां प्राणिनां मनांसि प्रसीदन्ति। अस्मिन् काले प्रकृतिः विविधरूपा भवति। कदाचित् शीतलः पवनः प्रवहति, कदाचित्तु झञ्झावातः आयाति। येन बहवः वृक्षाः धराशायिनः भवन्ति। एवमेव कदाचित् जलकणानि मन्दं-मन्दं वर्षन्ति, कदाचित्तु प्राबल्येन वृष्टिः भवति, तेन नदीषु तडागेषु च जलस्तरः वर्धते। अतिवृष्ट्या अनेकशः जलप्लावोऽपि भवति। येन मार्गाः अवरुद्धाः जायन्ते, भूमिश्च पङ्किला भवति। दूषिते वातावरणे अनेके रोगाः भवन्ति।

अस्मिन् ऋतौ आकाशे कदाचित् इन्द्रधनुषस्यापि दर्शनं भवति। सप्तरङ्गी इन्द्रधनुषः सर्वेषां मनांसि हरति। मेघेषु दीपिता विद्युत् दूरं यावत् दृश्यते, अग्रिमे खलु क्षणे अन्तर्धानं भवति। मेघगर्जनं बालेषु स्त्रीषु च भयं उत्पादयति।

सूर्यदर्शनं ऋतौ अस्मिन् सुदुर्लभमेव भवति। श्यामवर्णाः अम्बोदाः तं आच्छादयन्ति। आकाशे मेघैः सह सूर्यस्य मल्लयुद्धः इव भवति, यस्मिन् मल्लयुद्धे मेघानां विजयः भवति। अस्मिन् समये पृथिव्यां प्रसुप्ताः मण्डूकाः बहिरागच्छन्ति, उल्लासेन च तडागकूपादिषु 'टर्र-टर्र' ध्वनिना गीतं गायन्ति, मोदन्ते च। वीथिषु बालकाः क्रीडन्ति। वृक्षेषु चातकाः, विलेषु झिल्लिकाः, ध्वनिं मनोभाविनीं कुर्वन्ति कूजन्ति वा।

वृष्टिविरामे सर्वेपक्षिणः स्व-स्व नीडेभ्यः निसृत्य आकाशे उड्डीयन्ते, मधुरञ्च कलरवं कुर्वन्ति। वर्षाकालस्तु कृषकानां कृते तेषां जीवनमेव भवति। मुदिताः कृषीवलाः ग्रामेषु स्व-स्व क्षेत्रेषु गत्वा कृषिकार्यं कुवन्ति। कर्षणयन्त्रेण (हलेन) क्षेत्राणि कर्षन्ति, बीजानि च वपन्ति। ऋतुः अयं श्रावणमासे भवति। अतः बालिकाः वृक्षेषु दोलाम् उद्दोलयन्ति मुदिताः भूत्वा। आदिकविना महर्षि वाल्मीकिना अस्य ऋतोः वर्णनम् एवम् कृतं विद्यते-

वहन्ति वर्षन्ति नदन्ति भान्ति,
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घनाः मत्तगजाः वनान्ताः,
प्रियाविहीनाः शिखिनः प्लवंगाः।।

वस्तुतः मनोहरोऽयं वर्षाकालोऽस्ति। सुखकरी कल्याणकरी च अयं वर्षाऋतुः सर्वेभ्यः लोकेभ्यः रोचते। अनेनैव सर्वे प्राणिनः अस्मिन् काले मुदिताः प्रसन्नाश्च दृश्यन्ते। कामदेवः

अस्मिन् ऋतौ प्राबल्यम् आवहति । अनेनैव सकामा: युवतय: अभिगन्तुकामा: भवन्ति । प्रवासिन: जना: स्वदेशं प्रति गन्तुम् उत्कण्ठिता: भवन्ति । वनवाता: शीतलजलकणै: संयुक्ता: सुरभिराप्लाविता: भवन्ति ।

वर्षाऋतु: वस्तुत: अस्यां पृथिव्यां सर्वेषां जीवानां आधार: ।अनेन विना प्राणिन: जीवितुं न शक्नुवन्ति ।अनेनैव देशेऽस्माकं अस्मिन् काले स्थानेषु सर्वेषु उत्सवा: भवन्ति । वैदिके साहित्येऽपि विषयेऽस्मिन् प्रार्थना कृता विद्यते–

''निकामे निकामे न: पर्जन्य: वर्षतु ।
फलवत्यो न ओषधय: पच्यन्ताम् । ।''

◆◆◆

शरद्ऋतु: वर्णनम्

वर्षा ऋतो: अनन्तरम् शरद्ऋतु: आगच्छति । अस्मिन् ऋतौ आकाश: स्वच्छो भवति । धरा च शस्यशालिनी मनोहारिणी भवति ।नदीजलाशयानां वर्षाकाले मलिनं जलं अस्मिन् ऋतौ निर्मलं सञ्जायते । रात्रौ निशाकरस्य कौमुदी जनानां मनोभ्य: आह्लाददायिनी भवति । अनया परिपूरिता: सर्वा खलु दिश: परमानन्दम् आवहन्ति ।

ग्रामेषु, नगरेषु, वनेषु, उपवनेषु, सरोवरेषु, पर्वतेषु सर्वत्रैव अस्मिन् काले नवनवा सुषमा दृश्यते । अपगते वर्षाकाले मार्गा: पङ्कहीना: स्वच्छताम् आवहन्ति । सर्वाणि अवरुद्धानि कार्याणि अस्मिन् ऋतौ सञ्चारितानि भवन्ति । जलाशयानां निर्मले जले नवदलानि कमलानि विकसन्ति । भ्रमरा: तेषु गुञ्जारं कुर्वन्ति, आमोदं च अनुभवन्ति ।

चन्द्रमस: चारुचन्द्रिकाया: यादृशं स्वरूपम्, अनुभवं च अस्मिन् शरदि नैव तादृशं अन्यस्मिन् कस्मिन्नपि ऋतौ प्रतीयते । अस्मिन् ऋतौ विविधेषु स्थलेषु कासानां समृद्धि: अतीव आकर्षयति जनानां चेतांसि । मराला: वर्षाकाले मानसरोवरं गच्छन्ति । खिन्नमानसा:, किन्तु शरदि ते पुन: आयान्ति तेषां समागमनेन सरोवराणां सुषमा पुन: वर्द्धते ।

प्राचीनकाले राजान: स्वविजययात्रां वर्षाकाले स्थगयन्ति स्म , किन्तु शरदृतौ ते पुन: विजयार्थं प्रयाणं कुर्वन्ति स्म । अत: तेषां कृते ऋतु: अयम् अतीव महत्त्वपूर्ण: आसीत् , यतोहि तेषु उत्साहं वर्धयति स्म ऋतुरसौ । केनापि कविना अस्य ऋतो: शोभनं वर्णनं कृतम्–

समुल्लसत्पङ्कज जलोचनेन
विनोदयन्ती तरुणानशेषान् ।
शुद्धाम्बरा गुप्तपयोधरश्री:
शरन्नवोढेव समाजगाम । ।

वस्तुत: शरद्ऋतु: शुद्धाम्बरा नवोढा इव आभाति ।य: अशेषान् तरुणान् मनांसि आलोडयति । अस्या: नवोढाया: लोचनानि पङ्कजानि सन्ति । एवमेव अन्येन कविना अस्य

ऋतो: उपमा नववधूना सह प्रदत्ता ,तत्र सा वधू: काशांशुका कथिता अस्ति ।तस्या: पादौ हंसरवनूपुराणि सन्ति-

काशांशुका विकचपद्ममनोज्ञवक्त्रा,
सोन्मादहंसरवनुपूरपादरम्या ।
आपक्वशालिरुचिरा तनुगात्रयष्टि:,
प्राप्त: शरद् नववधूरिव रम्यरूपा ।।

अस्य ऋतो: वर्णनं महाकवि-कालिदास-वाल्मीकि-माघ-भारवि-श्रीहर्ष-भास-विशाखदत्तादीनां काव्येषु दृश्यते । अस्मिन् ऋतौ कासानां पुष्पाणि चतुर्दिक्षु विकसितानि सर्वेषां जनानां मनांसि सहजेनैव हरन्ति । हंसानां मधुरा वाणी वातावरणे मादकताया: सञ्चारं करोति । पक्वानि पीतानि धान्यानि सर्वेषां मन:सु आह्लादं उत्पादयन्ति ।

महाकविभासेन स्वप्नवासवदत्तम् नाम नाटके अस्मिन् ऋतौ स्वच्छे निर्मले आकाशे सारसानां पंक्ति: कीदृशी प्रतीयते,अस्य वर्णनम् अतीव आकर्षकं मनोरमं च कृतम्-

ऋज्वायतां च विरलां नतोन्नतां च,
सप्तर्षिवंश कुटिलां च निवर्तनेषु ।
निर्मुच्यमान भुजगोदरनिर्मलस्य,
सीमामिवाम्बरतलस्य विभज्यमानाम् ।।

वस्तुत: कुमुद-काश-पुण्डरीक-शेफालिकादीनां पुष्पै: पुष्पिता सज्जिता एषा नटी'शरद्' आबालवृद्धानां नारीणां च हृदयेषु मादकताया: सञ्चारं करोति ।अस्माभि: सदैव अन्येषां ऋतूणां तुल्य: अस्यापि ऋतो: स्वागत: आदरश्च खलु कर्तव्य: प्रसन्नमनसा ।

◆◆◆

प्रात:काल:

निशाया: अवसाने पूर्वस्यां दिशि भगवान् भुवनभास्करस्य उदिते प्रभातवेला भवति ।प्रात:काले सर्वप्रथमं आदित्यस्य सारथि: अरुणस्य प्रकाश: आयाति , तदनन्तरं सूर्यस्य दर्शनं भवति । आदित्यस्य रक्तरञ्जितै: किरणै: सम्पूर्ण:संसार:मनोहर: प्रतीयते । पुराणेषु कथ्यते यत् भास्करस्य रथे सप्त-अश्वा: संयुक्ता: सन्ति । ते सर्वे हरितवर्णा: विद्यन्ते । उरूरहित: अरुण: अस्य सारथि: कथ्यते ।

प्रात:काले सर्वे जना: शय्यां परित्यज्य स्वेषु कार्येषु संलग्ना: भवन्ति ।पशुपक्षिणोऽपि निद्रां विहाय स्वक्रियासु व्यापृता: भवन्ति । सरोवरेषु काननेषु विविधानि पुष्पाणि विकसन्ति, सुगन्धिं च सर्वासु दिक्षु प्रसारयन्ति ।अस्मिन् काले तृणोपरि स्थिता: जलबिन्दव: मुक्तानि इव आभान्ति ।वस्तुत: समयोऽयं मनोहरो भवति ।इदानीं शीत:सुगन्धित: च पवन: मन्दं मन्दं प्रवहति ।

अस्मिन्नेव समये बहव: जना: शय्यां परित्यज्य भ्रमणार्थं नदीतटेषु सरोवरेषु वा गच्छन्ति। प्रात:कालिकं भ्रमणं अतीव स्वास्थ्यकरं भवति।कृषीवला: प्रात:काले एव उत्थाय क्षेत्रेषु गच्छन्ति। तत्र गत्वा क्षेत्रकर्षणं बीजवपनं,क्षेत्रेषु जलप्रदानादिकं च अनेकानि कार्याणि कुर्वन्ति। इदानीं पक्षिणां कलरवम् अतीव मधुरं कर्णप्रियं च भवति। प्रमुदिता:भ्रमरा: पुष्पेषु गुञ्जन्ति रसपानं च कुर्वन्ति ।

जना: प्रात:काले उत्थाय स्नानार्थं जलाशयेषु नदीषु वा गच्छन्ति ।तत्रैव प्रात: ईशवन्दनमपि कुर्वन्ति। स्नानानन्तरं भगवान् भास्कराय जलदानमपि क्रियते तै: ,अनेन ते यशस्विन: भवन्ति। अनन्तरमेव ते स्वेषु-स्वेषु कार्येषु निमग्ना: जायन्ते ।

प्रभाते गोपाला: गोदोहनं कुर्वन्ति,पश्चात् तान् वनं नयन्ति। तत्र ता: गाव: स्वेच्छानुसारं हरितानि तृणानि शष्पाणि वा भक्षयन्ति। मध्याह्ने वृक्षाणां छायायां स्थित्वा चर्वण-कार्यं कुर्वन्ति। सायंतने काले पुन: स्व-स्व-स्थानेषु निवर्तन्ते।

वेदपाठिन: ब्राह्मणा: प्रात:काले एव उत्थाय वेदपाठं,यज्ञं च कुर्वन्ति।विद्यार्थिन: स्वपाठं स्मरन्ति, स्वाध्यायं च कुर्वन्ति। होमधेनव: पुण्यतमे ऽस्मिन् समये स्ववत्सेन सह चरन्ति। आश्रमेषु शङ्कारहिता: मृगा: स्वेच्छानुसारं विचरन्ति। ब्रह्मचारिण: समिध: आहरणाय वनेषु गच्छन्ति। आश्रमेषु स्थिता: स्त्रिय: बालिका: वा पूजनार्थं पुष्पाणि चिन्वन्ति।

धार्मिकजना: प्रात:काले एव सन्ध्यावन्दनं कुर्वन्ति।वस्तुत: कालोऽयं सर्वेषां प्राणिनां कृते हिताय खलु भवति ,अनेनैव समयोऽयम् 'अमृतवेला'इति नाम्ना अपि कथ्यते। अस्मिन् समये यदपि कार्यं क्रियते तत् अवश्यमेव सफलं भवति। अत: विद्यार्थिन: इदानीमेव पठन्ति। अस्मिन् काले योऽपि पाठ: पठ्यते स: सहजेनैव स्मर्यते छात्रै:।

इदानीं पर्वतानां दृश्यम् अतीव मनोहरं भवति।पर्वतारोहिणां कृते प्रभातकाल: अतीव अनुकूल: भवति पर्वतारोहणाय। अस्मिन् समये क्लान्ति: अपि न भवति। संस्कृतकाव्येषु प्राय: प्रभातस्य मनोरमं वर्णनं कृतं विद्यते । महाकविकालिदासेन अभिज्ञानशाकुन्तले कथितम् इमं कालम् अधिकृत्य-

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरस्सर एकतोऽर्क:।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां,
लोको नियम्यत इवात्म दशान्तरेषु।।

वस्तुत: प्रात:कालिकी सुषमा अतीव मनोहारिणी प्रमोदिनी हृदयाकर्षका च भवति। अत: अस्माभि: सदैव प्रात:काले शय्यां परित्यज्य स्वेषु कार्येषु संलग्न: भवितव्य:। भगवत्स्मरणम् इदानीम् अत्यावश्यकम् , अनेन सम्पूर्णे दिवसे आत्मविश्वास: वर्धते,शरीरे च ऊर्जाया: सञ्चार: जायते। प्रात:काले उत्थाय अस्माभि: सदैव गुरुजना:पितरश्च अवश्यमेव नम्या: अभिवादनीयाश्च। अनेन अस्माकं सर्वेषु कार्येषु सिद्धि: सफलता वा भवति।

◆◆◆

हिमालयः

हिमस्य आलयः हिमालयः,अनया व्युत्पत्त्या शब्दोऽयं निष्पद्यते । एषः पर्वतानां राजा कथ्यते। अनेनैव अस्य अन्यत् नाम 'नगाधिराजः'अपि अस्ति। भारतवर्षस्य सर्वेषु पर्वतेषु असौ प्रधानः पर्वतः अस्ति। देशस्य उत्तरस्यां दिशि स्थितोऽयं भारतमातुः शुभ्रःकिरीटः इव आभाति । पर्वतराजोऽयं प्रहरी इव अस्माकं राष्ट्रस्य रक्षामपि करोति।

हिमालयः दिव्यानाम् औषधीनां आकरोऽस्ति,मृगेन्द्राणां क्रीडास्थली ,वनस्पतीनां निधानम् ,पर्यटकानां च स्वर्गमस्ति। रामायणे लिखितम् यत् रामरावणयोः युद्धे मेघनादस्य शक्त्या मूर्छितः लक्ष्मणः अस्मिन् पर्वते स्थितया संजीवनी नाम दिव्यौषधी द्वारा एव पुनर्जीवितो अभवत्। औषधीः एषा रामभक्तेन हनुमता आनीता एकस्यां रात्रौ एव।

पर्वतोऽयं हिमाच्छादितोऽस्ति ।अस्य शिखराणि अतीव उच्चानि सन्ति । अत्र खनिजपदार्थाः बाहुल्येन प्राप्यन्ते ।विविधानि स्वादूनि फलानि अपि अत्रैव जायन्ते । वृक्षेषु 'देवदाराः'अत्र समधिकरूपेण उपलभ्यन्ते। नगाधिराजेऽस्मिन् उत्पन्नानि,फलानि,काष्ठानि, पुष्पाणि, रत्नानि च अस्माकं देशस्य लाभाय एव खलु सन्ति। अद्यापि अत्र स्थितासु गुहासु बहवः योगिनः साधनारताः विद्यन्ते।

प्रतिवर्षं अत्र स्वदेशीयाः विदेशीयाश्च पर्वतारोहिणः आगत्य स्व लक्ष्यं पूर्णं कुर्वन्ति। पर्वतराजोऽयं बहूनां नदीनाम् उद्गमस्थानम् अस्ति। गंगा-यमुना प्रभृतयः नद्यः हिमालयात् एव निर्गच्छन्ति , भारतभूमिं च सिञ्चन्ति स्व पावनेन जलेन।

महाभारते पुराणेषु च हिमालयस्य अतीव महिमा वर्णितः अस्ति । युधिष्ठिरादयः पाण्डवाः अत्र आगत्य खलु मोक्षं प्राप्तवन्तः ,इति कथा महाभारते उल्लिखिता वर्तते । महाकविकालिदासेन स्वकुमारसम्भवे महाकाव्ये अस्यैव हिमालयस्य वर्णनम् अनेन प्रकारेण कृतम्-

अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य,
स्थितः पृथिव्याः इव मानदण्डः॥

वस्तुतः नगाधिराजोऽयं उत्तरदिशि स्थितः देवतातुल्योऽस्ति ।सर्वेषु पर्वतेषु श्रेष्ठत्वं भजते अनेन 'नगाधिराजः' सञ्जातः। न केवलं एतत् अपितु स्व स्थितिः कारणेन पर्वतोऽयं पृथिव्याः मानदण्डः इव प्रतिभाति ।अस्य स्थितिः अतीव महत्त्वपूर्णा अस्ति।

कथ्यते यत् देवानां वासः अत्रैव अस्ति। शिवः स्व -गणैः सह अस्मिन्नेव पर्वते योग-साधना-लीनः भवति ।पर्वतेऽस्मिन् बहवः जलप्रपाताः सन्ति ।उत्तुङ्ग शिखराद् जलपातेन महानादो भवति,वातावरणे शीतानिजलकणानि व्याप्तानि भवन्ति ।दृश्योऽयं अतीव मनोहरो भवति। अत्र पक्षिणां मधुरं कलरवमपि सदैव श्रूयते।

प्रातःकाले देवदारूणां मध्यात् निर्गत्य भुवनभास्करस्य किरणानि पर्वतीयानां नदीनां जले पतन्ति, तदानीं तेषां बहूनि प्रतिबिम्बानि तारकगणा इव मनोहरानि प्रतीयन्ते ।वस्तुतः हिमालयोऽयं अस्माकं कृते देशस्यार्थे च गौरवसदृशः अस्ति।

◆◆◆

राष्ट्रभाषा

कस्यापि प्रभुतासम्पन्नराष्ट्रस्य एका भाषा भवति । यस्यां भाषायां तस्य राष्ट्रस्य सर्वाणि राजकार्याणि निष्पाद्यन्ते । सा खलु तस्य 'राष्ट्रभाषा'भवति । यद्यपि कस्मिन् अपि राष्ट्रे बहूनां भाषानां प्रयोगोऽपि सम्भाव्यते,किन्तु ताः सर्वाः 'राष्ट्रभाषा'पदं वोढुं न शक्नुवन्ति।

परतन्त्रतायाः समये भारतवर्षस्य आङ्गलभाषा प्रमुखा भाषा आसीत् ।अनेन तस्मिन् काले अस्याः स्थानं 'राष्ट्रभाषा' रूपेण आसीत् ।देशस्य स्वतन्त्रे सति अस्य देशभक्तैः नेतृभिः चिन्तितम् अस्य राष्ट्रस्य 'राष्ट्रभाषा' विषये , तैः निश्चितं यत् स्वतन्त्रराष्ट्रस्य कापि स्वतन्त्रा राष्ट्रभाषा भवितव्या । अतः सम्यक् विचार्य तैः स्वतन्त्रतायाः पश्चात् हिन्दीभाषा राष्ट्रभाषारूपेण घोषिता। अनेनैव सम्प्रति अस्माकं देशस्य राष्ट्रभाषा हिन्दी वर्तते।

यद्यपि अस्माकं देशे बहूनां भाषाणां प्रयोगः भवति,किन्तु आसु सर्वासु हिन्दी भाषा सर्वाधिकेषु प्रान्तेषु प्रयुज्यते । अतः देशस्य अस्य बहुसंख्यकाः जनाः हिन्दीभाषाम् एव वदन्ति । वस्तुतः 'हिन्दी'अन्यया भाषयापेक्षा सरला सुबोधगम्या च वर्तते ,अस्याः सम्भाषणेऽपि किमपि काठिन्यं नास्ति। अनेनैव सम्भवतः अस्माकं देशभक्तैः नेतृभिः हिन्दी भाषा राष्ट्रभाषारूपेण स्वीकृता आसीत्।

किन्तु विषयेऽस्मिन् महती विडम्बना एव प्रतीयते यत् राष्ट्रभाषा पदं वहन्त्याः अपि अस्याः भाषायाः प्रयोगः पूर्णरूपेण राजकार्येषु न भवति । अस्माकं राष्ट्रस्य अधिकाधिकं राजकार्यं विदेशीयाम् आङ्गलभाषायाम् एव प्रचलति। अस्य कारणमिदं यत् स्वतन्त्रतायाः पश्चात् अस्माकं देशस्य आङ्गलभाषानुरागिणः एव सचिवस्तरीयाः अधिकारिणः प्रशासने संयुक्ताः आसन्।ते जनाः हिन्दीभाषां हीनदृष्ट्या पश्यन्ति। अतः अस्यां भाषायां राजकार्याणि कर्तुं न वाञ्छन्ति।

अस्मिन् राष्ट्रे अनेके नेतारोऽपि एतादृशाः निवसन्ति , येषां हृदि स्वतन्त्रे भारते निवसितेऽपि अंग्रेजीभाषां प्रति तेषां महत् प्रेम विद्यते। अतः तैः अधीनस्थाः कर्मचारिणः प्रायः आङ्गल भाषायाः प्रयोगाय प्रेरयन्ते ।

अन्यं च दक्षिणभारतीयैः बङ्गप्रान्तीयैश्चापि प्रायः हिन्दीभाषायाः विरोधः क्रियते ।अस्य कारणं तेषां संकुचिता दृष्टिः विद्यते,किन्तु इदं तेषां कृते शोभनीयं नास्ति।

सम्पूर्णेऽपि विश्वे ईदृशः कोऽपि नैव देशोऽस्ति ।यत्र तस्य राष्ट्रभाषायां सम्पूर्ण

राजकार्यं न प्रचलति,किन्तु भारतदेश: एक: अपवादस्वरूपोऽस्ति। अत्र हिन्दीभाषा राष्ट्रभाषा भूते सति अपि सम्पूर्णं राजकार्यं अस्यां भाषायां नैव भवति ।वस्तुत: कस्मिन् अपि देशे सर्वाधिका: जना: यां भाषां भाषन्ते सा खलु भाषा राष्ट्रभाषा रूपं गृह्णाति।

पारतन्त्र्यधिय: अंग्रेजीभाषाप्रेमिण: जना: वस्तुत: एतत् न जानन्ति , यत् उच्चारण-नियमरहिताया: आङ्गलभाषाया: ज्ञानाय योऽपि परिश्रम:विधीयते,तस्य अपेक्षया अल्पाल्पश्रमेणैव हिन्दीभाषाया: सफलं ज्ञानं भवति। स्वभाषां परित्यज्य विदेशीया: भाषाया: अध्ययनं प्रयोग: वा अस्माकं स्वाभिमानाय अपि न श्रेयस्करं विद्यते।

वस्तुत: हिन्दीभाषाया: विरोध: कैश्चित् जनै:राजनीतिकदृष्ट्या क्रियते विशेषत: दक्षिणे भारते,किन्तु तटस्थरूपेण निष्पक्षभावेन चिन्तिते सति तथ्यमेतत् अस्माकं सम्मुखम् आयाति यत् हिन्दी भाषा भारतव्यापिनी ,अत: सा खलु राष्ट्रभाषाया: पदे स्थातुं समर्था ।

अत: स्वार्थान् सर्वान् विहाय अस्यामेव भाषायां स्व सर्वाणि कार्याणि करणीयानि जनै:। अनेन अस्य राष्ट्रस्य अस्माकं स्वाभिमानस्यापि च रक्षा भविष्यति। एवञ्च देशोऽयं अधिकाधिकां उन्नतिं करिष्यति। भारतीयाणामपि सर्वेषां एतत् प्रमुखं कर्तव्यमस्ति यत् हिन्दी राष्ट्रभाषाया: रूपे सम्यक्तया प्रयुज्या स्यात् । अस्माकं देशे ईदृश: प्रयत्नो विधेय:, दृढसङ्कल्पाश्च वयं भवेम ,यत् वयं हिन्दीभाषायां एव सर्वाणि कार्याणि करिष्याम: प्रेरयिष्या-मश्च । अनेन खलु अस्माकं राष्ट्रीय एकता सुस्थिरा भविष्यति। केनापि हिन्दी कविना सम्यक् एव उक्तम्-

''निजभाषा उन्नति अहें सबै उन्नति को मूल।''

◆◆◆

दीपावली

'दीपानाम् अवलि:'इति दीपावली कथ्यते।पर्वमेतत् भारतीयानां विश्वख्यातं वर्तते। अस्य अन्यत् नाम 'दीपमाला'अपि अस्ति।दीपानां माला: अवल्य: वा यस्मिन् पर्वणि प्रदीप्यन्ते पर्वं तत् 'दीपावली' उच्यते।

अस्माकं देशे सर्वासु जातिषु सर्वेषु सम्प्रदायेषु यथाकाले विविधानाम् उत्सवानाम् आयोजनं भवति। उत्सवै: जना: स्वव्यावहारिके जीवने सर्वाणि कष्टानि विस्मरन्ति, आनन्द-निमग्नाश्च भवन्ति। अनेनैव उत्सवानां परम्परा सृष्टे: आरम्भादेव वर्तते। अस्माकं पुरातने वैदिके साहित्येऽपि महोत्सवानां वर्णनं दृश्यते । पुराणेषु अपि उत्सवानां विस्तृतं वर्णनं सञ्जातम्। अनेनैव सम्यग् उक्तं महाकविना कालिदासेन-

'उत्सवप्रिया: खलु मानवा:'

भारतीयानां उत्सवेषु दीपमालिकाया: महत्त्वपूर्णं स्थानं विद्यते ।भारतीयसंस्कृते: वैशिष्ट्यम् एतत् यदत्र सर्वे खलु उत्सवा: धर्मदृष्टिम् अभिलक्ष्य वै प्रवर्तिता: सन्ति। दीपमालिका

विषयेऽपि एतत् कथ्यते यत्-रघुकुलमणिः भगवान् रामचन्द्रः युद्धे रावणं निहत्य, लङ्कां विजित्य च स्वकीयाम् अयोध्यानगर्याम् आगच्छत्। तदैव अयोध्यावासिनः अतीव प्रसन्नाः सञ्जाताः,प्रसन्नैश्च तैः श्रीरामस्य स्वागते स्वेषु गृहेषु मार्गेषु च मङ्गलसूचकाः दीपकाः मालिकारूपेण प्रज्वालिताः आसन्।तस्मादेव कालाद् अद्यावधिपर्यन्तं परम्परा इयं भारतवासिभिः निर्बाधरूपेण परिपाल्यते।

दीपावलीपर्वं कार्तिकमासे अमावस्यायां तिथौ समायाति।अस्मिन् पर्वणि जनाः लक्ष्मीपूजनं कुर्वन्ति,किन्तु बङ्गप्रदेशे अस्मिन् दिने दुर्गापूजायाः परम्परा वर्तते।लक्ष्मीपूजनम् अभिलक्ष्य किंवदन्ती अन्यापि श्रूयते यत् समुद्रमन्थनावसरे भगवती महालक्ष्मीः अस्मिन्नेव दिने सागरमध्यात् निसृता आसीत्।अस्याः कथायाः प्रामाणिकता पुराणैः शास्त्रैरपि भवति।

केचित् जनाः दीपावलीपर्वं नववर्षरूपेणापि मन्यन्ते।अनेन व्यापारिणः स्ववार्षिकं आर्थिकं लेखनम् अस्माद् एव दिनाद् आरभन्ते।जैनसम्प्रदायस्य संस्थापकस्य भगवतः महावीरस्य, स्वामिदयानन्दस्य च निर्वाणोऽपि अस्मिन्नेव दिने अभवत्। अन्यञ्च कथ्यते यत् आयुर्वेदाचार्यो धनवन्तरिरपि अस्मिन्नेव दिवसे प्रकटितः। अनेन सर्वैः भारतीयैः दिवसोऽयं समृद्धिदायकरूपेण मन्यते।

अनेनैव ते अस्मिन् पर्वणि लक्ष्मीपूजां कृत्वा स्वजीवनस्थितिं उच्चतरां कर्तुं प्रयतन्ते। एवमेव वैश्यजनाः व्यापारे परमं लाभं प्राप्तुं महता समारोहेण इमम् उत्सवं सम्पादयन्ति। अस्मिन् दिने गृहाणि संशोध्यन्ते,नानाविधैः चित्रैः पताकातोरणादिभिः विभूषयन्ते। प्रदोषकाले जनाः गणेशेण सह महालक्ष्म्याः अर्चनं सोल्लासं कुर्वन्ति। पूजनानन्तरं स्व-स्वगृहाणि दीपमालिकाभिः समलङ्कृतानि क्रियन्ते तैः।बालकाश्च लाजान् मोदकान् मिष्टान्नानि च खादित्वा प्रसन्नाः भवन्ति।रात्रिकाले ते स्फोटक पदार्थैः निर्मितान् 'पटाखा'इत्याख्यान् पदार्थान् अग्निसात् कृत्वा स्व मनोरञ्जनं कुर्वन्ति। कदाचित् तेभ्यः स्फोटकेभ्यःमहती हानिरपि भवति।

एवं अस्मिन् पर्वणि सर्वेजनाः आबालवृद्धाः,युवकाः युवतयश्च प्रसन्नमनाः दृश्यन्ते। आपणे विविध-वस्तुभिः प्रपूरिताः हट्टाःबलादेव दर्शकानां चेतांसि आकर्षयन्ति। मिष्टान्नानां हट्टास्तु अतीव मनोहराः प्रतीयन्ते। अस्मिन् दिवसे केचित् जनाः समृद्ध्यर्थं द्यूतमपि क्रीडन्ति,किन्तु इयं प्रथा सर्वथा अनिष्टकारी वर्तते।अनेन जनानां चरित्रं पतितं कलङ्कितं च भवति।

वस्तुतः पर्वणि अस्मिन् सर्वत्रापि आनन्दसागरः उच्चैः तरंगैः उल्लसति।मन्दिराणि, मार्गाणि,गृहाणि च सर्वत्र दीपानां पंक्तिः अतीव मनोहारिणी प्रतिभाति।अद्यत्वे जनाः विद्युत् दीपानि प्रज्वालयन्ति ,अनेन ते सौख्यं अनुभवन्ति। अस्मिन्नेवावसरे जनाः नूतनानि वस्त्राणि अपि धारयन्ति। पर्वमिदं जनेषु उत्साहस्य सञ्चारं करोति।धार्मिकदृष्ट्या स्वास्थ्यदृष्ट्या च महोत्सवस्य अस्य महत्त्वं सर्वविदितमेव अस्ति।यदि वयं सूक्ष्मदृष्ट्या विचारयामः तर्हि पर्वमिदं अंधकारे प्रकाशस्य,अज्ञाने ज्ञानस्य विजयरूपोत्सवः, अस्मान् सर्वान् धर्मस्य आचरणाय ज्ञानस्य उपार्जनाय च प्रेरयति। इति।

◆◆◆

विजयादशमी

अस्माकं जीवने महोत्सवानाम् अतीव महत्त्वं विद्यते ।यतोहि एषु महोत्सवेषु मानव: विश्रान्तिम् अनुभूय पुन: नूतनाम् ऊर्जां लभते ।मनुष्यस्य मानसिकस्थिति: यन्त्रवत् भवति ।यथा यन्त्रं निरन्तरचलनेन उष्णतां भजते,किंचित् कालं विश्राम्य तैलादिना तत् पुन: पूर्ववत् प्रचलति। तथैव निरन्तरं कार्यं कुर्वन् मानवोऽपि श्रान्त: भवति विश्रान्तिलाभाय पुन: शक्त्या: अर्जनाय च स: स्वस्थं मनोरञ्जनं वाञ्छति ।महोत्सवा: तस्मै मनोरंजनरूपाम् ऊर्जां ददति। अनेनैव अस्माकं देशे प्राचीनकालादेव महोत्सवा: प्रचलिता: सन्ति।

तेषु महोत्सवेषु 'विजयादशमी'नाम उत्सव: परमं वैशिष्ट्यं भजते। अस्य अन्यत् नाम 'दशहरा'अपि अस्ति। हिन्दूनां महासमारोहरूप: दिवसोऽयं सम्पूर्णे भारतवर्षे रावणस्योपरि रामस्य महाविजय-उपलक्ष्ये सम्पद्यते। अत: पर्वमिदं क्षत्रियाणां मन्यते। आश्विन् मासस्य शुक्लपक्षे दशमी तिथि: 'विजयादशमी'इति मन्यते ।श्रूयते यत् अस्मिन् दिने भगवता रामचन्द्रेण रावणस्य विनाशाय वानरै:सह विजयार्थं प्रस्थानं कृतम्। रामायणे कथितम्-

''अथ विजयदशम्यामाश्विने शुक्लपक्षे
दशमुखनिधनाय प्रस्थितो रामचन्द्र: ॥''

अस्या: खलु परम्पराया: पालनं कुर्वन्त: पूर्वकाले राजान: अपि स्वसीमोल्लंघनं कुर्वन्ति स्म अस्यां तिथौ ।अस्मिन् दिवसे सर्वे क्षत्रिया: स्वशास्त्रान् पूजयन्ति ।इदं पर्व भारतस्य विविधेषु प्रान्तेषु विविधरूपेण सम्पद्यते ।विजयादशमीत: दशदिनात् पूर्वमेव भारतस्य नगरे-नगरे ग्रामे-ग्रामे च रामलीलाया: प्रदर्शनं आरभ्यते ।अन्तिमे अस्मिन्नेव दिवसे अहंकार-अधर्म-दुर्वृत्ताणां प्रतीकभूत: रावण: अग्निसात् क्रियते।

रामलीला माध्यमेन जना: सदाचारं लोकाचारं च शिक्षन्ते ।लीला एषा आबाल-वृद्धानां मनोरंजनं करोति सन्मार्गे च सर्वान् प्रेरयति। एषु दिवसेषु प्राय: विद्यालयेषु महाविद्यालयेषु च दीर्घकालीन: अवकाश:भवति। अस्मिन् काले बहव: जना: नवरात्रिपर्यन्तं उपवासं कुर्वन्ति ,दुर्गादेव्या: च पूजां सम्पादयन्ति। अन्ये केचित् वाल्मीकि रामायणं नाम महाकाव्यं पठन्ति ।अन्ये च बहव: मनुष्या: स्वगृहे पण्डितान् समाहूय रामायणस्य कथां कारयन्ति।

अस्मिन् दिवसे केषुचित् गृहेषु जना: इक्षुदण्डमपि पूजयन्ति ,कर्णयो: हरितानि धान्यानि च धारयन्ति। विजयादशम्या: अवसरे 'नीलकण्ठ'नाम पक्षिण: दर्शनं सौभाग्यप्रदं श्रेयष्करं च मन्यते ।क्षत्रिया: अस्मिन्नेव दिने नूतनानि कार्याणि कुर्वन्ति।

विशेषत: बङ्गप्रान्ते अस्या: विजयदशम्या: महत्त्वम् अधिकं भिन्नञ्च वर्तते ।तत्र अयं महोत्सव: दुर्गापूजारूपेण प्रचलितोऽस्ति ।यतोहि बङ्गभूमौ भगवत्या: आद्याशक्ते: महान् प्रभाव: दृश्यते। यद्यपि समस्तेऽपि भारते जना: एषु दिवसेषु 'दुर्गासप्तशत्या:'पाठं कुर्वन्ति तथापि बंगप्रान्ते अष्टम्यां सरस्वती-महालक्ष्मी सहिताया: दुर्गा-देव्या: प्रतिमाया: पूजनं

प्रतिगृहे सम्पद्यते।दशम्यां तिथौ तासां सर्वासां प्रतिमानां विसर्जनं तडागेषु नदीषु वा सोत्साहं सोल्लासपूर्वकं सोत्सवं च क्रियते जनैः।

अनेन प्रकारेण अस्मिन् काले महोत्सवाः विविधरूपेण सम्पाद्यन्ते ।एषु दिवसेषु आपणानि विविधविक्रयवस्तुभिः परिपूरितानि भवन्ति ।बालकाः क्रीडनकानि मिष्टान्नानि क्रीणन्ति।अस्मिन्नेवावसरे प्रायः सर्वत्र मेलापकाः आयोज्यन्ते। तेषु गत्वा सर्वे जनाः बालकाः युवतयश्च आनन्दसमुद्रे निमग्नाः भवन्ति।

केषाञ्चित् विदुषां मते रावणेन सह रामस्य महासंग्रामात् पूर्वं शक्तिसञ्चयनार्थं नवरात्रेऽस्मिन् भगवतीदुर्गा समाराधिता श्रीरामचन्द्रेन। रामस्य भक्तिभावेन प्रसन्नया दुर्गया तस्मै वरः प्रदत्तः,अनेनैव सः रावणस्य विनाशाय समर्थोऽभवत्। अनेनैव अवसरेऽस्मिन् मातादुर्गा जनैः आराध्यते। कथ्यते यत् भगवतीदुर्गायाः पूजनेन जनस्य कुत्रापि पराजयः न भवति।

राजस्थानप्रान्ते उत्सवोऽयं विशेषेण प्रचलति। यतोहि भूमिरेषा राज्ञां वीराणां चास्ति। ते सदैव शक्तेः आराधकाः आसन्। अनेनैव वीरतामयोऽयम् पर्वोऽत्र विशेषतया परिचाल्यते श्रद्धया विशेषेणोत्साहेन च।

◆◆◆

होलिकोत्सवः

अस्माकं भारतवर्षे चत्वारि पर्वाणि मुख्यतां भजन्ते-रक्षाबन्धनं,विजयादशमी, दीपावली, होलिकोत्सवश्च इति। यद्यपि भारतीयाः एतान् सर्वान् एव महोत्सवान् महता प्रमोदेन सम्मानयन्ति,किन्तु तेषु सर्वेषु होलिकोत्सवः परमं वैशिष्ट्यं भजते।

अपगते हेमन्ते फाल्गुनमासे वसन्तकाले उत्सवोऽयं भवति। कालोऽयम् अतीव रमणीयः विद्यते। समशीतोष्णाः दिवसाः भवन्ति एषु दिवसेषु। वायुरपि मन्दं- मन्दं प्रवहति यथा सर्वे जनाः स्व-ऊर्णवस्त्राणि परित्यजन्ति तथैव वनस्पतयोऽपि नूतनानि पल्लवानि धारयन्ति। वृक्षाः लताश्च नानाविधैः कुसुमैः फलैश्च आव्रियन्ते। आम्रवृक्षेषु मञ्जर्यः विकसन्ति। वनेषु उपवनेषु भृङ्गाः पुष्पेषु रसपानं कृत्वा मदमत्ताः भवन्ति ।अस्मिन्नेव मादकतासम्पन्ने काले होलिकायाः उत्सवः आगच्छति।

कथ्यते यत् प्राचीनकाले खलु राक्षसराजहिरण्यकशिपुः नाम नृपः आसीत्। तस्य एकः प्रह्लाद-नामकः पुत्रः अभवत्।सः विष्णुभक्तः सञ्जातः, किन्तु तस्य पिता सदैव एतद् एव प्रयत्नम् अकरोत् यत् पुत्रः मम विष्णुभक्तः न स्यात्। अतः तेन अनेकशः सः प्रह्लादः विष्णुभक्तितः वारितः,किन्तु बारम्बारं वारितोऽपि सः न विरराम।

अनन्तरं हिरण्यकशिपुना तस्य प्रह्लादस्य वधाय एका योजना निर्मिता ।तया योजनानुसारं तेन होलिकानाम्नीं स्वभगिनीं आहूय कथितम् यत् -प्रह्लादेन सह त्वया

अग्निमध्ये प्रवेष्टव्यम्। वरप्रभावेन त्वं न ज्वलिष्यसि, किन्तु अस्य प्रह्लादस्य दाहो भविष्यति। तया एवं कृते सति विष्णुकृपया अग्निना सा होलिका भस्मीभूता कृता ,प्रह्लादस्य कृते तु अग्नि: चन्दनवत् शीतल: संभूत:। तस्मादेव कालाद् भारतवर्षे सर्वेषु स्थलेषु प्रतिवर्षं होलिका-दहनस्य प्रथा आरब्धा।

फाल्गुनमासस्य पूर्णिमाया: तिथौ रात्रिकाले सर्वे जना:तृणसमूहानि काष्ठानि च शुष्कानि एकत्री कुर्वन्ति। स: काष्ठतृणसमूह: एव 'होलिका' इत्यनेन शब्देन कथ्यते।प्रथमं स्त्रय: तस्या: होलिकाया: पूजनं कुर्वन्ति। अनन्तरं निश्चिते मुहूर्ते तस्या: दाह: क्रियते। तां परित: सर्वे जना: नृत्यं कुर्वन्ति गायन्ति च।

अग्रिमे दिवसे चैत्र प्रतिपदा भवति। अस्यां तिथौ प्रात: कालादेव जनै: होलिकाया: भस्मं धारयित्वा परस्परं रङ्गक्रीडा क्रियते ,हर्षनिर्भराश्च ते नृत्यन्ति,गायन्ति,हसन्ति, आमोदप्रमोदञ्च कुर्वन्ति। होलिकादहनविषये केचित् जना: मन्यन्ते यत् तृणकाष्ठादिभि: सह अस्माकं सर्वेषां रागद्वेषादिनां दाहो भवति। वयं स्व कलुषितान् भावान् विस्मृत्य सौहर्देन परस्परं कण्ठग्रहालिङ्गनेन मिलाम:। अनेन उत्सवोऽयं सौहार्दस्य खलु वर्तते।

अस्माकं कविभि:होलिकोत्सवस्य वर्णनं अतीवाकर्षकं स्वाभाविकञ्च कृतं स्व-काव्येषु। अत्र 'नागानन्दं'नाम नाटके प्रयुक्त: एक: श्लोक: प्रस्तूयते महाकवि श्रीहर्षेण होली-क्रीडनावसरे जनानां भावानां चित्रणम् अतीव आकर्षकं मनोरमञ्च कृतम्-

धारायन्त्रविमुक्तसतत्-पय: पूरप्लुते सर्वत:,
सद्य: सान्द्रविमर्दकर्दमकृत क्रीडे क्षणं प्राङ्गणे।
उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणे:,
सैन्दूरी क्रियन्ते जनेन चरणन्यासै: पुर: कुट्टिमम्।।

वस्तुत: उत्सवोऽयं हर्षोल्लासस्यैव अस्ति।अस्मिन्नेवावसरे रङ्गस्नाता: गुलाललिप्ता: स्त्रिय: पुरुषा: आबालवृद्धा: सर्वे हासं प्रहासं कुर्वन्त:,विविधवर्णान् गुलालचूर्णान् परस्परं मुखेषु लेपयन्ति,कण्ठालिंगनं च कुर्वन्ति। काश्चित् प्रमदा:बालकाश्च जलयन्त्रै: अन्यान् जनान् आर्द्रयन्ति, आत्मत्राणाय ते इतस्तत: धावन्ति। अन्ये रङ्ग-प्लाविताङ्गा: जना: मृदङ्गशब्देन सह नृत्यन्ति गायन्ति कूर्दन्ति च। नानाविधानि व्यञ्जनानि मिष्ठान्नानि भोजयन्ति भुज्यन्ते च। वस्तुत: दिनेऽस्मिन् सर्वा दिश: गुलालपुञ्जै: पिञ्जरितानि भवन्ति। अत: अतीव आनन्ददायकोऽयम् उत्सव: अस्ति।

अस्मिन् दिवसे सर्वे जना: स्व उच्चनीच भेदान् पूर्णत: विस्मरन्ति, परस्परं कण्ठेन आलिङ्गनं कुर्वन्ति च।अत: उत्सवोऽयं परस्परसौहार्दं च वर्धयति।

◆◆◆

स्वतन्त्रतादिवस:

स्वतन्त्रता मानवस्य स्वभावोऽस्ति। अल्पाल्पवयस: बालकोऽपि कस्यापि नियन्त्रणे

वसितुं न वाञ्छति। प्राचीनसमये अंग्रेजजना: व्यापारव्याजेन भारतवर्षे आगच्छन्। अनन्तरं च स्वकुटिलनीत्या अस्य देशस्य उपरि अधिकारं कृतवन्त:। परस्परविवादेषु निमग्ना: भारतीया: तेषाम् आङ्गलजनानां दास्यशृङ्खलासु निबद्धा: सञ्जाता:। किञ्चिद् कालानन्तरं एभि: भारतवासिभि: स्वत्रुटिं विचिन्त्य दास्यश्रृङ्खलां त्रोटयितुं प्रयत्नानि आरब्धानि कृतानि।

पुनीतेऽस्मिन् कार्ये झांसीइति रियासतस्य रानी'लक्ष्मीबाई'द्वारा महती भूमिका प्रारब्धा १८५७ ईस्वीये वर्षे। तदा प्रभृति स्वतन्त्रताया: संघर्षोऽयं भारतीयै: प्रारम्भ: कृत:। संघर्षेऽस्मिन् आबालवृद्धा: युवक-युवतय: सर्वे एव सम्मिलिता: अभवन्। कांग्रेस नाम्नि संस्थाया: अपि स्थापना कृता भारतीयै: नेतृभि:। इमां संस्थां महात्मागान्धिमहाभागेन नेतृत्वं प्रदत्तं।

आङ्गलै: स्वप्रभुत्वरक्षणार्थं स्वतन्त्रतासंघर्षस्य अस्य दमनं प्रबलतया कृतम् आसीत्। ते सर्वेभ्य: देशभक्तेभ्यश्च यातनां महतीं दत्तवन्त:। किन्तु यातना: एता: सोढ्वा अपि देशभक्ता: भारतीया: स्वतन्त्रतासंघर्षात् विमुखा: न अभवन्। संघर्षेऽस्मिन् क्रान्तिकारिण: देशभक्ता: अपि महत् योगदानं कृतवन्त:। शनै: शनै: अंग्रेजशासका: भारतीयानां स्वातन्त्र्यसंघर्षे पराजिता: अभवन्।

अत: तै: १९४७ ईस्वीये वर्षे भारतं स्वतन्त्रं कृत्वा स्वदेशे अर्द्धरात्रिसमये प्रस्थानं कृतम्। देशभक्तानां दीर्घकालिकं प्रयत्नं सफलं सञ्जातम्, भारतमाता मुक्ता जाता पारतन्त्र्य-शृङ्खलाभि:। तदानीं समये देशेऽस्माकं गृहे-गृहे जनै: दीपा: प्रज्वालिता:। मन्दिरेषु भक्तजनै: भगवन्तं प्रति धन्यवादस्वरूपिणी प्रार्थना कृता। विद्यालयेषु गुरुजनै: मिष्ठान्नानि वितरितानि। तदानींतने समये सर्वेषां भारतीयानां 'भारतदेश अमर रहे' इति ध्वनिना सम्पूर्णं नभोमण्डलं व्याप्तं सञ्जातम्।

तदाप्रभृति अस्माकं स्वतन्त्रे भारते अगस्तमासस्य पञ्चदश तारिकायां प्रतिवर्षे 'स्वतन्त्रता दिवस:'सोल्लासं सम्पद्यते। अस्मिन् दिवसे सम्पूर्णेऽपि भारते देशे प्रात:काले 'ध्वजारोहणं', प्रभातफेरी', 'भाषणानि', 'मिष्ठान्नवितरणञ्च' प्रभृतीनि कार्याणि क्रियन्ते। यद्यपि अवसरेऽस्मिन् मुख्यालयेषु जिलाधीशमहोदयै: पर्वम् एतत् सोत्साहं आयोज्यते, किन्तु दिल्ली नगर्याम् अस्य आकर्षणं विशेषतां भजते।

तत्र पर्वम् एतत् 'लालकिला'इत्यस्मिन् स्थाने सम्पद्यते।देशस्य प्रधानमन्त्री 'लालकिला 'इति नाम स्थानस्य प्राचीरादेव देशवासिनां कृते संदेशं ददाति। अस्मिन्नवसरे सर्वे जना: तान् देशभक्तान् श्रद्धया स्मरन्ति, येषां प्रयत्नै: अस्माभि: स्वतन्त्रता प्राप्ता। तत्र प्रधानमन्त्री ध्वजारोहणं च करोति।

वस्तुत: एतत् अस्माकं सौभाग्यमेव अस्ति। यत् अस्माभि: स्वतन्त्रे भारते जन्म लब्धम्। बहुवर्षाणां साधनानन्तरं स्वर्णावसरोऽयं प्राप्त: अस्माभि:। अत: अस्माकं सर्वेषां पावनं कर्तव्यम् अस्ति, यत् देशस्य स्वतन्त्रतां रक्षितुं मनसा, वाचा, कर्मणा प्रयत्नो विधेय:, परस्परं प्रेमभाव: प्रसारयितव्य:। जागरुको भूत्वा ग्रामे-ग्रामे, नगरे-नगरे राष्ट्रभक्तिभावनाया: प्रचार: प्रसारश्च कर्तव्य:। येन विषमता दूरीभूयात्। अनेनैव अस्या: अमूल्यस्वतन्त्रताया: रक्षा भविष्यति।

◆◆◆

गणतन्त्रदिवसः

जनवरी मासस्य षड्विंशति तारिका अस्माकं सर्वेषां भारतीयानां कृते अतीव महत्त्वपूर्णा वर्तते। यतोहि दिवसेऽस्मिन् अस्माकं राष्ट्रीयपर्वः सम्पद्यते। दिवसोऽयं भारतस्य इतिहासे अतिमहत्त्वपूर्णः अस्ति। स्वतन्त्रतायाः प्राप्त्यनन्तरं १९५० ईस्वीये वर्षे जनवरी मासस्य २६ तारिकायां स्वतन्त्रभारतराष्ट्रस्य स्वकीयं संविधानं स्वकीया शासनप्रणाली च प्रवृत्ता। अस्मिन् दिवसे एव भारतराष्ट्रं गणतन्त्रम् उद्घोषितम्।

अतः अस्य महत्त्वपूर्णस्य दिवसस्य स्मृतौ प्रतिवर्षं दिनम् एतत् राष्ट्रियपर्वरूपेण सम्भाव्यते। अस्मिन्नेव दिने सर्वेषु मुख्यालयेषु राजकीयकार्यालयेषु प्रमुखेषु नगरेषु च राष्ट्रियध्वजस्य आरोहणं क्रियते। राजकीयभवनानि विद्युत्दीपैः दीप्यन्ते। अनेकेषु स्थलेषु अस्मिन् दिने मेलापकाः आयोज्यन्ते।

विशिष्टः समारोहस्तु देशस्य राजधान्यां दिल्लीनगरे आयोज्यते, तत्र तु जनवरी मासस्य पञ्चविंशतितारिकायाः रात्रौ एव बहवः जनाः 'इण्डिया गेट' इति स्थानस्य समीपे एकत्रिता भवन्ति। अग्रिमे दिने गणतन्त्रदिवसो भवति। अतः प्रातःकालं यावद् अत्र लक्षशो जनाः अस्य राष्ट्रियपर्वस्य शोभाम् अवलोकयितुं एकत्रिताः भवन्ति।

प्रातःकाले अस्माकं देशस्य राष्ट्रपतिमहोदयस्य शोभायात्रा विजयपथि प्रचलति। इदानीमेव राष्ट्रपतिमहोदयः एकत्रिंशत् तोपानां अभिवादनेन सम्मान्यते, अनन्तरमेव तस्य रथः अग्रे चलति। भारतीयसेनायाः जलस्थलवायुसैनिकाः तस्य अनुसरणं कुर्वन्ति। अस्मिन्नेव अवसरे राष्ट्रपतिमहोदयः सेनायाः त्रिभ्यः अङ्गेभ्यः अभिवादनं स्वीकरोति। अनन्तरं तेन शौर्यादि प्रदर्शनाय विशिष्टेभ्यः सैनिकेभ्यः पदकानि दीयन्ते।

तत्पश्चात् भारतवर्षस्य सर्वेषां प्रदेशानां संस्कृतिसूचकानि सज्जितानि यानानि राजमार्गे प्रदर्शितानि भवन्ति। एतेषां सर्वेषां एषा शोभायात्रा विजयपथस्य चतुष्पथाद् आरभ्य दिल्ल्याः प्रमुखमार्गेषु प्रचल्य 'लालकिला' पर्यन्तं गच्छति। शोभाम् एतां द्रष्टुं वैदेशिकाः अतिथयः अपि अस्मिन्नवसरे दिल्लीं राजधानीम् आगच्छन्ति। तैः अस्य राष्ट्रियपर्वस्य शोभा द्विगुणा भवति।

अस्मिन्नेवावसरे देशस्य बहूनां शिक्षणसंस्थानां विद्यार्थिनः पथसञ्चलनं कुर्वन्ति। एभिः कार्यक्रमैः दर्शकानां मनोरंजनं महत् जायते, ते हर्षेण गौरवेण च प्रफुल्लिताः भवन्ति। अतः तेषां करतलध्वनिना राजपथं सम्पूर्णं गुञ्जितं भवति। अनेन कार्यक्रमेण सर्वेषां जनानां हृदयेषु राष्ट्रभक्तिभावना प्रादुर्भूता भवति। ते अस्मिन्नेव क्षणे स्वदेशसेवायाः प्रतिज्ञां कुर्वन्ति।

अस्य कार्यक्रमस्य अन्यत् आकर्षणं वायुयानैः आकाशात् पुष्पवृष्टिः भवति। इदानीं वायुयानानि गर्जनं कृत्वा भारतवर्षस्य जयघोषमिव कुर्वन्ति। कार्यक्रमस्य समाप्त्यनन्तरं सर्वे जनाः स्व-स्वगृहेषु प्रस्थानं कुर्वन्ति। तस्मिन् समये तेषां सर्वेषां हृदि तेषां देशभक्तानां कृते

आदरभावना भवति , येषां प्रयत्नै: देशोऽयं स्वतन्त्र: सञ्जात: ।

वस्तुत:गणतन्त्रदिवसोऽयं अस्माकं सर्वेषां भारतीयाणां राष्ट्रियदिवस: खलु । अस्मिन्नवसरे अस्माभि: स्वभेदभावं विस्मृत्य अस्या: स्वतन्त्रताया: रक्षणार्थं प्रतिज्ञा करणीया। अस्य देशस्य लोकतन्त्रस्य सफलता तदैव भविष्यति यदा जनेषु राष्ट्रियभावनाया: विकास: भवेत्। यया भवनया अस्माभि: स्वातन्त्र्यं प्राप्तम्। अत: सदैव एतदर्थं सर्वै: प्रयत्नो विधेय: ।

◆◆◆

गुरोर्महिमा

मानवजीवने गुरो: स्थानं अतीव महत्त्वपूर्णम् अस्ति ।अनेनैव सर्वेषु शास्त्रेषु तस्य महिमा वर्णित: । मनुष्य: जन्मना शूद्र: भवति,संस्काराद् द्विज: उच्यते,एते संस्कारा: तया गुरुकृपया एव प्राप्यन्ते । आचार्य यास्केन स्व निरुक्ते आचार्य पदस्य व्युत्पत्ति: कृता वर्तते। तस्मिन् कथितम् तेन–

''आचार्य: कस्मात्? आचारं ग्राह्यति इति।।''

वस्तुत: आचार्य: खलु ईदृश: जन: य: ,' केन प्रकारेण व्यवहार: कर्तव्य: समाजे',इति शिक्षांददाति सर्वेभ्य: जनेभ्य: । अनेनैव गुरु: सदैव पूज्य: श्रद्धेय: च भवति। अस्माकं शास्त्रेषु गुरो: स्थानं भगवत: उपरि कथितम्। यथा–

गुरुर्ब्रह्मा गुरुर्विष्णु: गुरुर्देवो महेश्वर: ।
गुरु: साक्षात् परं बह्म तस्मै श्री गुरवे नम: ।।

प्राचीनकाले अस्माकं समाजे ईदृशी व्यवस्था आसीत् ,यत् कोऽपि जन: बाल्यावस्थायां ज्ञानार्जनाय कस्यापि गुरो: शरणौ समित्पाणि: भूत्वा गच्छति स्म । तत्रैव आश्रमे सदाचारपूर्वकं उषित्वा,आश्रमस्य दैनिककार्याणि कुर्वन् गुरो: सेवां च श्रद्धया करोति स्म। भिक्षाटनं कृत्वा यानि खाद्यवस्तूनि आनयति स्म, तानि सर्वाणि प्रथमं स्वगुरो: समक्षे प्रस्तौति स्म। गुरु: यदपि अददत् तेनैव संतोषेण स: स्व क्षुधाया: शान्तिं करोति स्म।

ईदृशेभ्य: योग्य–विनम्र–सेवाभावी– शिष्येभ्य: एव गुरुणा वेद–वेदाङ्गानां सरहस्यं ज्ञानं दीयते स्म। गुरुणा प्रदत्तेन एकाक्षरस्य अपि ज्ञानेन मानवस्य जीवनं सफलं भवति,स: तस्य गुरो: ऋणी भवति। एतत् अस्माकं धर्मशास्त्रेषु अपि प्रतिपादितम् अस्ति–

एकमप्यक्षरं यस्तु गुरु: शिष्ये न्यवेदयेत् ।
पृथिव्यां नास्ति तद् द्रव्यं यं दत्त्वाऽनृणी भवेत् ।।

वस्तुत: गुरो:ज्ञानम् अमूल्यं भवति। य: शिष्य: गुरुकुले निवसन् भक्तिभावेन स्वगुरो: सेवां करोति , तस्य विद्या अवश्यमेव सफला भवति ।अद्यत्वे अस्माकं समाजे गुरुकुलानाम् अभाव: एव,किन्तु यत्रापि विद्यालयेषु महाविद्यालयेषु वा गुरव: पाठयन्ति,तान् प्रति श्रद्धा – सेवाभावना वा कर्तव्या छात्रै: अवश्यमेव। अनेनैव छात्राणां विद्यार्थिणां वा जीवनं अध्ययनं वा

सफलं भविष्यति। विषयेऽस्मिन् मनुना अपि उक्तम्-

'गुरुशुश्रूषया त्वेवं ब्रह्मलोकं महीयते'

अर्थात् यदि जन: गुरुसेवां करोति, तया सेवया स: ब्रह्मलोकम् अधिगच्छति। गुरु: खलु अज्ञानान्धकारे निपतितस्य शिष्यस्य उद्धारकोऽस्ति ज्ञानप्रकाशेन , स: वै तस्य शारीरिकं ,मानसिकं,आध्यात्मिकं,नैतिकं च विकासं करोति। गुरु: शिष्याय न केवलं पुस्तकीयज्ञानं ददाति,अपितु तस्मै आचारस्य शिक्षाम् अपि प्रयच्छति। एतत् एव तस्य आचार्यस्य आचार्यत्वं विद्यते।

यदि कोऽपि गुरु: एकवर्षपर्यन्तमपि सद्शिष्याय विद्यां न ददाति,अस्माकं शास्त्रानुसारेण स: पापभाक् भवति। स: वृक्षत्वम् आप्नोति।उक्तञ्च-

स आम्रवृक्ष: विप्रोऽभूत् विद्वान् वै वेदपारग:।
विद्या न दत्ता शिष्येभ्यस्तेन स तरुतां गत:।।

अत: न केवलं शिष्यस्य कर्तव्यं गुरो: सेवा,अपितु गुरो: अपि शिष्याय विद्यादानं कर्तव्यमस्ति। अस्माकं शास्त्रेषु गुरुसेवाया: गुरुभक्तेश्च बहूनि उदाहरणानि सन्ति। तेषु गुरुभक्तस्य आरुणे: नाम अग्रणी वर्तते। गुरुणा आदिष्टेन तेन क्षेत्रे जलनिस्सरणस्थानं शीतरात्रौ अपि स्वशरीरं पातितम् , रात्रिपर्यन्तं च तत्रैव स्थितोऽभवत्। प्रात:काले अन्विष्यन् यदा गुरु: धौम्य: तत्र आगच्छत्, तर्हि तस्य गुरुभक्तिं प्रति नतवान्। संतुष्टेन खलु तेन सर्वेषां वेदानां शास्त्राणां च ज्ञानं सहजेनैव तस्मै प्रदत्तम्।

एवमेव अन्येन 'एकलव्य' नाम शिष्येन स्वगुरुद्रोणाचार्याय स्व अंगुष्ठमेव दक्षिणारूपेण दक्षिणहस्तस्य प्रदत्तम्। सोऽपि गुरुप्रसादेन अप्रतिम: धनुर्धर: सञ्जात:। हिन्दीभाषायामपि गुरुमहिमा कविना कबीरेण इत्थं वर्णित:-

''गुरु गोविन्द दोऊ खडे काके लागूं पायं।
बलिहारी गुरु आपणो जिन गोविन्द दियो बताय।।''

इत्थं गुरुगरिमा अस्माकं समाजे शास्त्रेषु च पदे-पदे दृश्यते। अत: यदि वयं श्रेयं वाञ्छाम: ,तर्हि परया भक्त्या श्रद्धया च गुरुसेवा मातृपितृवत् करणीया ,कदापि गुरुद्रोह: न कर्तव्य:। निरुक्तकारेणापि एतदुक्तं वर्तते-

''यद् गुरौ मातृपितृवदाचरेन्न कदापि द्रुह्येदिति।।''

◆◆◆

छात्राणां कर्तव्यानि

छात्रावस्था मानवजीवनस्य महत्त्वपूर्णा जीवननिर्मात्री अवस्था अस्ति। अस्याम् अवस्थायां यादृशमपि जन:करोति तादृशमेव आजीवनं आचिनोति। अतएव सर्वे जना:

स्वबालकानाम् अस्याम् अवस्थायाम् विशेषरूपेण ध्यानं ददति। ते तै: सह अस्मिन् समये विशेषपरिश्रमं कुर्वन्ति । ते वाञ्छन्ति यत् अस्माकं बालक: बालिका वा सम्यक्रूपेण पठेत्, श्रेष्ठतरं च पदं प्राप्नुयात्। चिकित्सक:भवेत्, अभियान्त्रिक: वा स्यात् अथवा प्रशासने उच्चं पदं लभेत्।

स्व पित्रो: कामनां पूर्त्यर्थं किंवा स्व स्वप्नान् साकारं कर्तुं कस्यापि बालकस्य छात्रस्य वा कानिचित् कर्तव्यानि सन्ति। तेषां पालनेनैव स: स्वे जीवने सफलीभवितुम् अर्हति। अल्पवयसानां छात्राणां बुद्धि: अपरिपक्वा भवति,अनेन स्व भविष्यविषये ते सम्यक्तया विचारयितुं समर्था: न भवन्ति।

अत: ते प्राय:स्वगुरुजनानां मातृपितृणाम् वा मार्गदर्शनं अनुशासनं परं दु:खदायकं मन्यन्ते। यद्यपि तेषां कथनं मार्गदर्शनम् अनुशासनं प्रताडनादिकं प्रत्यक्षरूपेण कष्टप्रदमिव प्रतीयते तथापि परिणामे सर्वम् एतत् अतीव सुखं उन्नतिदायकं च भवति तेषां कृते। अत: तेषां सर्वप्रथमम् इदमेव कर्तव्यमस्ति यत् स्व मातृपितृणां गुरुजनानां च आज्ञापालनीया , तेषां सर्वेषां सदैव आदर: कर्तव्य:।

छात्राणाम् इयं अवस्था विद्याध्ययनस्य प्रमुखतां भजते। अनेनैव ते विद्यार्थिन: कथ्यतेऽस्मिन् काले। अत: तेषां पुनीतम् अन्यं कर्तव्यं यत् अन्यानि सर्वाणि कार्याणि विहाय केवलम् अध्ययने खलु रत: भवितव्य:। वस्तुस्थिति: अद्यत्वे खलु ईदृशी यत् छात्रा: प्राय: अध्ययनात् विरता: सन्ति। सम्प्रति ते राजनीतौ किंवा अनेकेषु अन्येषु कार्येषु रुचिं गृह्णन्ति। सदैव ते पाश्चात्यपरम्पराया: नेत्राणि निमील्य अनुकरणं कुर्वन्ति। स्वगुरुजनानां उपेक्षां ते स्वातन्त्र्यं कथयन्ति,तान् च अनेन प्रकारेण ते दूयन्ते।

विद्याया: अध्ययनकाल: वस्तुत: तप:कालोऽस्ति । अत: कालेऽस्मिन् लौकिकेभ्य: सुखेभ्य: विरति: भवितव्या , तदैव जीवननिर्माणं भविष्यति। तस्मात् छात्रै: अस्यां अवस्थायां सर्वाणि सुखानि परित्यज्य विद्याध्ययने वै संलग्न: भवितव्य: । केनापि कविना अस्मिन् विषये सम्यग् एव उक्तम्–

क्षणश: कणशश्चैव विद्यामर्थञ्च चिन्तयेत्।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्।।

वस्तुत: विद्यार्थिजीवने समयस्य महत्त्वपूर्णं स्थानं वर्तते। अत: सर्वै: छात्रै: स्वजीवने अमूल्यसमयस्य अधिकाधिक: प्रयोग: कर्तव्य:। अन्यं महत्त्वपूर्णम् एतत् यत् तै: अस्याम् अवस्थायाम् कदापि सुखानाम् अपेक्षा न कर्तव्या। अनेन तेषां जीवननिर्माणं न भविष्यति। ये बालका: स्वछात्रजीवनं कठोरं परिश्रमं कुर्वन्ति ,ते स्वसम्पूर्णे जीवने सुखम् अनुभवन्ति । अनेन सम्यगेव उक्तम्–

सुखार्थिन: कुतो विद्या विद्यार्थिन: कुतो सुखम्।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत् सुखम्।।

विद्यार्थिणां कर्तव्यविषये अस्माकं शास्त्रविद्भि: उचितमेव कथितं यत् विद्यार्थिभि: सदैव विद्याध्ययनविषये काकवत् चेष्टा कर्तव्या। ध्यानं तेषां बकवत् भवितव्यम्,एवमेव तै: अधिकं शयनं कदापि न कर्तव्यं,अपितु तेषां निद्रा श्वानवत् अल्पीयसी भवितव्या। अन्यञ्च

विद्यार्थिना कदापि अधिकमात्रायां भोजनं न कर्तव्यम् ,अनेन स: निद्रालु: भविष्यति। तस्य अध्ययने अरुचि: भविष्यति।

काकचेष्टा बकोध्यानं श्वाननिद्रा तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थिन: पञ्चलक्षणम्॥

विद्यार्थिणां च अन्यमेकं महत्त्वपूर्णं कर्तव्यम्, यत् तै: सदैव अस्मिन् काले ब्रह्मचर्यस्य पालनं कर्तव्यम्। व्यायामेन स्व शरीरनिर्माणं बलिष्ठं पुष्टं च करणीयम् , यतोहि 'स्वस्थे शरीरे स्वस्थं मस्तिष्कं वसति ' छात्रजीवने कदापि आलस्य: न कर्तव्य: । ये छात्रा: आलस्यं कुर्वन्ति ते कदापि स्वजीवने सफला: न भवन्ति।

अध्ययने रतानां छात्राणां कृते स्वस्थशरीरस्य अतीव आवश्यकता अस्ति। ये छात्रा: स्वास्थ्य द्रष्ट्या शरीरस्य उपेक्षां कुर्वन्ति,ते संसारेऽस्मिन् किमपि कर्तुं समर्था: न भवन्ति। अत: छात्रै: सदैव एतेषां कर्तव्यानां सम्यक्रूपेण अनुकरणं पालनं वा कर्तव्यम्।

◆◆◆

अनुशासनम्

अस्माकं जीवने अनुशासनस्य महत्त्वपूर्णं स्थानम् अस्ति। न केवलं मानवजीवने अपितु समाजे, राष्ट्रे,देशे वा अनुशासनस्य महती आवश्यकता वर्तते। यतोहि समाजे यदि जना: अनुशासनं न पालयन्ति , तर्हि अव्यवस्था भवति। अस्मिन् संसारे वस्तुत: अनुशासनमेव ईदृशं वस्तु येन अस्माकं सर्वाणि कार्याणि परिपूर्णानि भवन्ति , सम्यक्तया सहजेनैव च अनुशासनाभावे वयं किमपि कर्तुं न शक्नुम:।

विषयेऽस्मिन् सेनाया: उदाहरणं महत्त्वपूर्णम् अस्ति। कस्यापि देशस्य सैनिकानां शक्ति: तेषां अनुशासने भवति। या सेना यादृशी अनुशासिता सा खलु शक्तिसम्पन्ना भवति। एवमेव यस्मिन् संगठने अनुशासनं कठोरं भवति,तदेव सफलं भवति सदैव समाजे। अन्यञ्च यदि जन: विद्यार्थिजीवने अनुशासित: स्यात् , तर्हि अवश्यमेव स: सफल: भवेत्।

एवमेव कस्मिन् अपि राष्ट्रे अनुशासनस्य परमावश्यकता भवति। अनुशासनविहीन: राष्ट्र: विनष्ट: भवति। यदि बालक: बाल्यकाले अनुशासित: न स्यात् , तर्हि स: युवा-वस्थायां उच्छृङ्खल: भवति। स: कुमार्गगामी भवति। एवमेव स्त्रिय: अपि अनुशासिता: सुगृहिणी भवितुं शक्या:। अनुशासनाभावे सा चरित्रभ्रष्टा भवति,उच्छृङ्खला च जायते।

वस्तुत: भारतवर्षे प्राचीनकालाद् एव अनुशासनस्य महत्ता वर्णिता अस्माकं शास्त्रेषु पदे-पदे। गुरुकुले शिष्य: गुरो: अनुशासनं मन्यते स्म , तस्य विद्यार्थिजीवने सर्वत्र अनुशासनस्य साम्राज्यमेव दृश्यते। यदि वयं महापुरुषाणां जीवनं अवलोकयाम: तर्हि निश्चयमेव तेषां जीवने महत: अनुशासनस्य दर्शनं कुर्म:।

सूक्ष्मदृष्ट्या अवलोकनेन प्रकृतिरपि अनुशासने बद्धा प्रतीयते। यतोहि सूर्य: प्रतिदिनं

पूर्वस्यां दिशि निर्धारिते समये उदेति। षड् ऋतवोऽपि नियमपूर्वकमेव आयान्ति यान्ति च। आकाशे सर्वाणि नक्षात्रि अनुशासने निबद्धानि खलु परिभ्रमणं कुर्वन्ति। वायुरपि आनुशासित: प्रतिदिनं चलति। अनुशासिता: मेघा: नियमेन वर्षन्ति।यदि एते सर्वे सम्यक् रूपेण अनुशासने न भवेयु: तर्हि सर्वा अव्यवस्था स्यात्।

एतां प्रकृतिं दृष्ट्वा खलु मानवैरपि सर्वै: अनुशासनस्य पालनं करणीयम्। य: जन: स्वेच्छाचारी भवति , तस्य समाजे नैव आदरो भवति। तस्य अनेकश: महती हानिरपि जायते। वस्तुत: अस्माकं सर्वेषु क्षेत्रेषु केचित् नियमा: निर्मिता:पूर्वै: जनै:,तेषां नियमानामेव सम्यक्तया पालनमेव अनुशासनं भवति। एतै: नियमै: खलु समाजव्यवस्था सुचारुरूपेण प्रचलति। अनुशासनम् अनेन प्रकारेण न केवलं मनुष्यस्य अपितु मानवताया: कृते च कल्याणकारी अस्ति।

अत: अस्माभि: सर्वै: सदैव स्वकल्याणं दृष्ट्वा समाजकल्याणबुद्धया च सर्वदा अनुशासनम् स्वीकर्तव्यम्। अनेन अस्माकं सर्वेषां उन्नति: भविष्यति। इति।

◆◆◆

समाजसेवा

मानव: खलु सामाजिक: प्राणी वर्तते। अनेन विना तस्य मानवस्य स्थिते: कल्पनापि दु:साध्या अस्ति। यद्यपि अस्मिन् संसारे मानव: सर्वेषां प्राणिनां तुल्यमेव जन्म गृह्णाति म्रियते च , किन्तु मानवस्य जीवने समाजस्य स्थिति: विशिष्टा एव भवति। समाजं विना मनुष्यस्य जीवनं असम्भवमेव प्रतीयते।

वैदेशिकेन एकेन विचारकेन कथितम् विषयेऽस्मिन् सत्यमेव यत् –''समाजाभावे मनुष्य: देव: भवति किंवा पशु: जायते।''यतोहि अस्मिन्नेव समाजे स: जन्म: गृह्णाति,वृद्धिं प्राप्नोति, समुन्नतिं च करोति। तस्य शरीरं पुष्टं बलिष्ठं अत्रैव भवति। अन्तिमे काले स: अत्र खलु लीनतां याति। मृत्यूपरान्ते सामाजिका:एव तस्य अन्तिमं संस्कारं कुर्वन्ति। स्व सन्ततिरूपे मानवस्य स्थिति: मृत्यो: पश्चात् अपि संसारेऽस्मिन् भवत्येव।

एवं मानवजीवने समाजस्य महत्त्वमति स्पष्टमेव स्वत: सिद्धमेव वा। यतोहि बाल्यकालाद् मृत्युपर्यन्तं तस्य सर्वासां चेष्टानाम् आधार: समाज: एव। अत: मनुष्यस्य समाजं प्रति कानिचित् कर्तव्यानि सन्ति। तेषां कर्तव्यानां पूर्ति: एव समाजसेवा कथ्यते। अस्मिन् संसारे प्राय: सर्वे जना: स्वविषये किंवा स्वपरिवारविषये खलु विचारयन्ति,किन्तु नैव समीचीना एषा दृष्टि:। अस्माभि: स्वार्थं विहाय समाजस्य कृते तस्य उन्नत्यर्थं कार्याणि करणीयानि। एतदेव प्रशस्यं भवति।

ये जना: प्रथमं समाजस्य उन्नतिं विचार्य तदनन्तरं स्वसमुन्नतिं स्वीकुर्वन्ति,ईदृशानां जनानां सर्वे जना: आदरं कुर्वन्ति। स: वस्तुत: समाजे मौलिमुकुट इव प्रतिभाति,सुशोभते

वा। विषयेऽस्मिन् अस्माकं देशे बहूनि उदाहरणानि सन्ति। यैः जनैः स्वार्थं विहाय स्वसर्वस्वं समाजस्य कृते प्रदत्तम् । ते खलु देशे अस्मिन् महापुरुषाः जाताः। अद्यापि वयं तेषां नाम अतीव आदरेण गृह्णीमः। अतः समाजसेवायाः महत्ता सुस्पष्टा एव।

ये समाजसेवकाः सन्ति ते सदैव समाजस्य विषये ,अत्र निवसतां प्राणिनां हितार्थं तेषां उन्नत्यर्थम् एव विचिन्तयन्ति। अतः ते खलु समाजे प्रचलितानां कुरीतिनां विनाशाय यतन्ते। तेषां प्रयत्नानि सद्परम्पराणां संस्थापनाय भवन्ति। एतदर्थं ते अनेकान् क्लेशान् अपि सहन्ते। अनेकशः तेषां कैश्चित् सामाजिकैः जनैः अपमानमपि क्रियते , किन्तु ते सदैव एतत् सर्वं पुष्पमालावत् शिरसि धारयन्ति।

वस्तुतः निरन्तर प्रयत्नेन अन्तिमे तेषां एव विजयः भवति। समाजे प्रचलितानां कुरीतिनां समाप्तिं गते सर्वे सामाजिकाः सुखिनः भवन्ति। महापुरुषाणां बलिदानं निरर्थकं न जायते। जनाः ईदृशानां जनानां स्मरणं अतीव सम्मानेन कुर्वन्ति,स्व आदर्शरूपेण तान् मन्यन्ते। अनेन प्रकारेण अस्माकं समाजे किंवा मानवस्य जीवने समाजसेवायाः स्थानं महत्त्वपूर्णं अस्ति।पुराकाले यदा भारते आग्लाः शासकाः आसन्। तदानीं अनेकैः देशभक्तैः स्वदेशस्य स्वतन्त्रतायै प्रयत्नानि बहूनि कृतानि आसन्। एषा खलु समाजसेवा आसीत्। अनेनैव सर्वे ते देशभक्ताः अद्यापि सर्वेषां जनानां आदरपूर्वकं संस्मरणीयाः सञ्जाताः।

अन्यञ्च तस्मिन्नेव समये बङ्गदेशे सतीप्रथायाः प्रचलनम् आसीत् ,पत्युः मृते एकाकिनीं निर्बलाम् अबलां जनाः बलपूर्वकं अग्निसात् कुर्वन्ति स्म। दीना हीना सा तेषां सर्वेषां समक्षे करुण-क्रन्दनं करोति स्म , किन्तु हृदयहीनाःधार्मिकमन्याः भावशून्याः केचित् जनाः दण्डबलेन तां बलात् चितामध्ये ज्वलनाय पातयन्ति स्म।

एतत् सर्वम् अनुचितं दृष्ट्वा 'राममोहन राय' नामकस्य बालकस्य हृदये करुणा जाता। तेन दृढनिश्चयं कृतम्,अस्याः प्रथायाः विनाशाय। यद्यपि अस्मिन् पुण्यतमे कार्ये तस्य समक्षे बहूनि विघ्नानि आगतानि , जनैः तस्य प्रबलः विरोधोऽपि कृतः ,अन्ते तु विजयः राजाराममोहनरायस्य एव संजातः। तेन समाजसेवकेन स्व प्रयत्नेन 'सती-प्रथा' राज्यनियमविरुद्धा कारिता। अनेन प्रकारेण तस्य समाजसेवकस्य प्रयत्नेन बहूनाम् अबलानां प्राणरक्षा संभूता।

एवमेव बालविवाहस्यापि तेन विरोधः कृतः आसीत्। तस्मिन् समये बालविवाहः प्रचलितः आसीत्। कुरीत्याः दोषाणि विचिन्त्य राजाराममोहनेन बालविवाहस्यापि निषेधः प्रयत्नपूर्वकं राज्येन कारितः , ईदृशानि उदाहरणानि अनेकानि सन्ति,अस्माकं देशस्य इतिहासे। बहुभिः महापुरुषैः समाजसेवकैः वा स्व बलिदानेनापि प्रशस्याः समाजसेवा कृता।

न केवलं अनेन प्रकारेणापि समाजसेवा भवति,अपितु क्षुधापीडितानां प्राणिनां कृते अन्नदानमपि समाजसेवा कथ्यते। पिपासितानां पिपासां दूरीकरणाय कृतानि प्रयत्नानि समाजसेवायां गण्यन्ते। धर्मशाला-विद्यालय-जलाशय-मार्गाणां च निर्माणं स्वैः प्रयत्नैः धनैश्च करणमपि समाजसेवा भवति। एवमेव रोगीणां असहाय्यानामपि निस्वार्थभावेन सेवा समाजसेवा खलु कथ्यते।

अत: अस्माभि: सदैव समाजस्य समुन्नत्यर्थं अव्यवस्थाया: विनाशार्थं,सर्वेषां स्वतन्त्रताया: रक्षणार्थं ,पीडितस्य सहाय्यार्थं, सर्वेषां प्राणिनां पोषणार्थं ,समाजसेवा कर्तव्या, समाजं प्रति स्व कर्तव्यपालनाय ।

◆◆◆

भारतीयसंस्कृतौ नारी

भारतीयासंस्कृति: विश्वस्य सर्वासां संस्कृतीनां श्रेष्ठा ज्येष्ठा प्रेष्ठा च वर्तते। यै: गुणै: संस्कृतिरेषा अग्रगण्या तेषु 'नारीणां सम्मानम् 'महत्त्वपूर्णम् अस्ति। वैदिककालाद् आरम्भ इदानीं यावत् भारतीयसंस्कृतौ नारीणां स्थानं महत्त्वपूर्णं विद्यते। जन्मन: प्रारभ्य विवाहकालं यावत् पितु: गृहे निवसन्ती 'कन्या'इति पावनेन शब्देन वाच्याया: अस्या: समाजेऽस्माकं महत्त्वं परमस्ति। भारतीयसंस्कृत्यानुसारं पतिगृहे गता सति सा साम्रज्ञी पदं चालङ्क रोति ।

गृहस्थाश्रमस्य भारतीयसंस्कृतौ उच्चास्थिति:,यत: आश्रमाणां सर्वेषां अन्यानां ब्रह्मचर्य–वानप्रस्थ– संन्यासादीनां च आधारोऽयं आश्रम: । आश्रमेऽस्मिन् नार्या: प्राधान्यं दृश्यते। यतोहि अनया विना नैव गृहस्थाश्रम:सम्भाव्य: । अस्माकं शास्त्रेषु अपि कथितम्–

''न गृहं गृहमित्याहु र्गृहिणी गृहमुच्यते''

भारतीयसंस्कृतौ नारीणां पूज्यतमं स्थानं कथ्यते विद्वद्भि: यत् –यस्मिन् गृहे नारीणां सम्मानं न भवति ,सा दु:खी क्रियते,गृहे तस्मिन् कदापि सुखसमृद्धि: न भवति। तत्र दरिद्रता आयाति । कल्याणानां तत्र अभाव: एव दृश्यते,किन्तु इतरेषु गृहेषु यत्र नार्या: सम्मानं भवति। गृहस्य सर्वै: जनै: नारीणां सुखस्य प्रसन्नतायाश्च चिन्तनं क्रियते तत्र सदैव लक्ष्म्या: वासो भवति। एतादृशेषु गृहेषु सर्वेषां देवानां महती कृपा भवति। तस्य गृहस्य सर्वेषां जनानां क्रिया: सफला: भवन्ति। आचार्यमनुना विषयेऽस्मिन् उक्तम्–

''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ।
यत्रैता: न पूज्यन्ते सर्वास्तत्राफला: क्रिया । ।''

अतएव गृहस्य सर्वै: देवर–ज्येष्ठादिभि: जनै: तत्रस्थानां नारीणां प्रसन्नता भोजनवस्त्रादिभि: सम्यक्तया विचारणीया सम्पादनीया च। प्राचीने भारते नारीणां स्थिति: अतीव श्लाघ्नीया आसीत्। ता: पुरुषवत् सम्मानार्हा: आसन्। लौकिककार्येषु सा पुरुषस्य सहधर्मिणी,सहकारिणी चआसीत्। सा खलु मानवस्य सुखेषु दु:खेषु सहभागिनी अपि दृश्यते स्म ।

'पितृदेवो भव', 'मातृदेवो भव'इत्यादिभिरुक्तिभि: नारीणां स्थानं वैदिककाले स्पष्टमेव आभाति । स्मृतिकारैश्च कथितं यत्–''पितुर्दशगुणा माता गौरवेणातिरिच्यते।'' अनेन वाक्येनापि भारतीयसंस्कृतौ नारीणां स्थानं प्रदर्शयते।

प्राचीने समये नारीणां शिक्षाविषये समाज: अतीव जागरूक: आसीत्। विषयेऽस्मिन् अनसूया–देवहूति–गार्गी–मैत्रेयी–अदिति–सावित्री–कौसल्या–सीता–तारा–मन्दोदरी–

कुन्ती-अहल्यादीनां नारीणां नामानि उदाहरणरूपेण दरीदृश्यन्ते। ताः सर्वाः वैदुष्येण स्वेन सम्पूर्णे संसारे पूजनीयाः जाताः।वस्तुतः भारतीयसंस्कृतौ सा भातृजायारूपेण,पत्नीरूपेण, भगिनीरूपेण,पुत्रीरूपेण च सर्वासु खलु अवस्थासु मानवस्य सहायिका भवति। अतः तस्याः पूज्यतमं स्थानमत्र दृश्यते।

शङ्कराचार्यद् प्रारभ्य स्वामीविवेकानन्दं यावत् सर्वैः महापुरुषैः मातृशक्तिः संस्तुता। स्वतन्त्रतासंग्रामे सर्वैः देशभक्तैः अस्माकं मातृभूमिरपि मातृरूपेण खलु सेविता संरक्षिता च। एवं भारतीयसंस्कृतौ नारीणां महिमा एव पदे-पदे दृश्यते ,किन्तु विषयेऽस्मिन् नैव कस्यचिद्अपि कापि कृपा अस्ति। वस्तुतः नारीशक्तिः स्वगुणग्रामैरिव पूज्यते भारतीयसंस्कृतौ। यतोहि वैदिके काले ताः अनेकेषां वेदमन्त्राणां दर्शनकर्त्र्यः आसन्, ईदृशं तस्याः वैदुष्यम् आसीत्। एवमेव उपनिषद्काले गार्गी-मैत्रेयीप्रभृतीनां नारीणां वाग्वैदग्ध्यं को न जानाति संस्कृतज्ञः। याज्ञवल्क्यसदृशैः ब्रह्मविद्यापारगैः विद्वद्भिः तासां ज्ञानगरिमा स्वीकृता।

अन्यञ्च ब्रह्मविद्याविशारदस्य मण्डनमिश्रमहाभागस्य पत्नी अपि शास्त्रनिपुणा आसीत्। संस्कृतसाहित्ये विश्वविश्रुतायाः विज्जिकायाः नाम को न जानाति ,यस्याः सरसानि पद्यानि सर्वेषां सहृदयानां कण्ठेहारमिव आभान्ति। न केवलं साहित्ये अपितु रणक्षेत्रेऽपि नारीणां कौशलं अस्माभिः दृश्यते। तासु पुराकाले कैकयी प्रभृतीनां वर्तमाने च दुर्गावतीलक्ष्मीबाई इत्यादीनां च नामानि विशेषरूपेण उल्लेखनीयानि सन्ति।

किमधिकेन स्वतन्त्रेऽपि भारते 'पूर्वप्रधानमन्त्री इन्दिरागान्धि महाभागायाः' नाम कस्य मनसि न वर्तते। तया सिद्धम् एतत् यत् नारी अपि राज्यसंचालने कुशला अस्ति। बुद्धिवैभवेन तया सम्पूर्णे विश्वे भारतस्य प्रतिष्ठा संस्थापिता। अतः अनेन पर्यालोचनेन स्पष्टमेतत् यत् भारतीयसंस्कृतौ नारीणां स्थितिः प्रशंसनीया पूजनीया च अस्ति।

◆◆◆

दूरदर्शनस्य लाभाः

अद्यत्वे दूरदर्शनेन सामान्योऽपि जनः अपरिचितः नास्ति। यन्त्रमेतत् वस्तुतः आधुनिकविज्ञानस्य चमत्कारः इव आभाति। मनुष्यः कुत्रापि उपविश्य दूरस्थितानि चित्राणि स्वनेत्रयोः पुरतः घटितानि इव दृश्यते महता आश्चर्येण। महाभारते यथा धृतराष्ट्राय संजयेन दिव्यदृष्टिः प्रदत्ता आसीत् ,तया दिव्यदृष्ट्या तेन सम्पूर्णस्य महाभारतयुद्धस्य समस्तस्य अवलोकनं कृतम् आसीत्,तथैव एतस्यापि दूरदर्शनस्य महिमा वर्तते।

वस्तुतः अस्मिन् आविष्कारे विज्ञानस्य महत्त्वपूर्णं योगदानम् अस्ति। अस्य यन्त्रस्य आविष्कारे नियकाऊ महोदयस्य नाम प्रसिद्धम् अस्ति प्रारम्भिकरूपेण। पश्चात् बेयर्डफार्न्सवर्थ ज्बोरिकिन् इति नामकैः वैज्ञानिकैः दूरदर्शनस्य वर्तमानस्वरूपं विनिर्मितम्। तस्मादेव कालाद् इदानीं यावत् अस्य यन्त्रस्य अधिकाधिकं विकसितं रूपं दृश्यते। वैज्ञानिकैः

अनेका: परिष्कारा: कृता: क्रियन्ते च निरन्तरं यन्त्रेऽस्मिन् ।

यदि सूक्ष्मदृष्ट्या विचारयाम: ,तर्हि दूरदर्शनेऽस्मिन् विद्युत्तरङ्गाराणां चमत्कार: खलु दृश्यते । सर्वप्रथमं क्रमवीक्षणपद्धत्या: किरणपुञ्जानां सहाय्येन दूरदर्शनप्रेषकयन्त्रै: चित्राणि आकाशे प्रेष्यन्ते । विद्युत्तरङ्गाणां कार्येऽस्मिन् महती भूमिका अस्ति । अनन्तरं तानि चित्राणि संग्रहियन्त्रमाध्यमेन दूरदर्शनस्य चित्रपटे प्रदर्शयन्ते ।

आधुनिके समये दूरदर्शनस्य उपयोगिता सर्वविदिता अस्ति । विशेषत: शिक्षाक्षेत्रे महद् उपयोगित्वम् अस्य यन्त्रस्य । यतोहि कोऽपि जन: केवलं पुस्तकेन भाषणादिना वा ईदृशं ज्ञानम् अधिगन्तुं न शक्यते ,यादृशं स्वनेत्रयो: समक्षं तस्य विषये सजीवचित्रं दृष्ट्वा प्राप्तुं शक्नोति । अत: महतोऽपि अर्थान् विषयान् वा सम्यग् तया आत्मसात् कारयितुं अतीव प्रभावी यन्त्रमेतत् विद्यते ।

अनेन दूरदर्शनयंत्रेण मानव: एकान्ते गृहे उपविष्ट: सम्पूर्णे विश्वे , किं किं घटते,तत्क्षणमेव जानाति । समाचारकेन्द्रै: प्रसारितानि चित्राणि विस्तृतविवरणानि च विषयेऽस्मिन् उदाहर्तव्यानि सन्ति । न केवलं समाचाराणि अत्र प्रस्तूयन्ते प्रसारयन्ते वा, अपितु अनेकानि मनोरमाणि नृत्यानि,आह्लादकानि रूपकाणि च अत्र विशालं जनसम्मर्दं परिहृत्य एकान्ते गृहे शय्यायां स्थित्वा ,सुखासीनो भूत्वा वीक्षितुं पारयन्ति जना: ,एष: खलु दूरदर्शनयन्त्रस्यास्य एव महिमा अस्ति ।

वर्तमाने अतिव्यस्तसमये अनेन माध्यमेन शासनस्य किंवा अन्यस्य विचारान् विशालोऽपि जनसमूह: क्षणेनैव सुखपूर्वकं श्रोतुं समर्थोऽस्ति , नैव विषयेऽस्मिन् कापि बाधा वर्तते । अद्यत्वे 'डिस्कवरी' इति दूरदर्शनकेन्द्रात् प्रसारितानि चित्राणि अतीव शिक्षाप्रदानि सन्ति , विद्यार्थिवर्गे च चैनलोऽयम् अतीव लोकप्रिय: अस्ति । एवमेव बहव: कार्यक्रमा: विविधेषु चैनलेषु प्रसारयन्ते,एवमेव व्यावहारिकीं शिक्षामपि माध्यमेनानेन प्राप्नोति जनसमुदाय: । तेषु अनेकानि पारिवारिकसीरियलानि उल्लेखनीयानि सन्ति ।

किन्तु श्रूयते यत् केषु शुभपदार्थेषु अपि केचित् दोषा: भवन्ति एव । संसारेऽस्मिन् निर्दुष्ट: कोऽपि पदार्थो नास्ति । अनया उक्त्या एव खलु अस्मिन् दूरदर्शने अपि केचन दोषा: दृश्यन्ते । यथा अस्य यन्त्रस्य अतीव दर्शनं नेत्राभ्यां हानिकारक म् अस्माकं च ज्योति: अपहारकं अस्ति । बहुबारं अस्मिन् यन्त्रे ईदृशानि चित्राणि प्रसार्यन्ते यानि स्वपरिवारस्य सदस्यै: सह न दृष्टव्यानि भवन्ति । तै: चित्रै: अस्माकं बालकानां चरित्रं दूषितं भवति ।

दूरदर्शनस्य वीक्षणं किञ्चिद् दूरादेव कर्तव्यम् ,किन्तु सर्वेषां जनानां गृहेषु एतादृशी स्थिति: नास्ति ,ते समीपत: एव पश्यन्ति । अनेन च तेषां नेत्रज्योति: क्षीयते । अनेन यन्त्रेण अस्माकं समाजे सामाजिकता विच्छिन्ना जायते ,यतोहि मनुष्य: स्वगृहेष ु स्थित्वैव दूरदर्शनं प्रतिक्षणं पश्यति समाजे किं भवति तं प्रति कानि कर्तव्यानि इत्यस्मिन् विषये स: नैव चिन्तयति । अनेन स: समाजेऽस्मिन् एकाकी भवति । अनेन समाजोऽस्माकं विच्छिन्न: भवति । पुनरपि सावधानेन प्रयुक्तं यन्त्रमेतत् निश्चितरूपेण अस्माकं सर्वेषां कृते मानवताया:कृते च उपकाराय एव । अत: अस्य यन्त्रस्य सदुपयोग: एव करणीय: ।

◆◆◆

चलचित्रम्

अस्मिन् संसारे सर्वेषु प्राणिषु मानव: खलु विवेकेन सर्वश्रेष्ठत्वं भजते । ये जना: विवेकिन: सन्ति, श्रमार्ते सति ते खलु सर्वे मनोविनोदाय प्रयत्नानि कुर्वन्ति । ईदृशानां तेषां जनानाम् आवश्यकतां पूर्त्यर्थं वैज्ञानिकै: अनेके आविष्कारा: कृता: वर्तन्ते। तेषु आविष्कारेषु चलचित्रमपि एक: उत्कृष्ट: आविष्कारोऽस्ति । अनेन जना: विश्रान्तिकाले मनोरञ्जनं कुर्वन्ति। अनेनाविष्कारेण शिक्षापि दीयते।

प्राचीनकाले भगवता ब्रह्मणा भरताचार्यं प्रति मानवानां मनोरंजनार्थं श्रवणसुखदस्य नयनाभिरामस्य नाटकस्य उपदेश: प्रदत्त:। अनेनैव नाट्यशास्त्रे लिखितम् आचार्यभरतेन अस्मिन् विषये–

दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।
विश्रामजननं लोके नाट्यमेतद् भविष्यति ।।

प्रारम्भिके समये नाट्यस्य अस्य अभिनेय: जनै: अनेकै: मञ्चे क्रियते स्म समाजे, किन्तु वैज्ञानिके युगेऽस्मिन् अस्य खलु नाटकस्य अभिनय: चलचित्रमाध्यमेन क्रियते । विधिरेषा अतीव लोकप्रिया अपि सञ्जाता। नाट्यगृहे मञ्चनापेक्षया चलचित्रमाध्यमेन नाटकानांतेषां प्रदर्शनं सौख्यकरं उत्कृष्टं मनोरञ्जनकरं च वर्तते।

यदि वयं चलचित्रस्य आविष्कारविषये दृष्टिर्निक्षेपं कुर्म: ,तर्हि ज्ञायते यत् सर्वप्रथमं १८८९ ईस्वीये वर्षे श्रीमता एडसिसमहाभागेन अमेरिकादेशे मूकचलचित्रस्य आविष्कार: कृत: आसीत्। तदानीं चित्रेषु वाण्याभावो दृश्यते स्म, केवलं सङ्केतेनैव सर्वाणि पात्राणि स्व अभिप्रायं प्रकटयन्ति स्म। १९१२ ईस्वीये वर्षे भारतेऽपि मूकचलचित्रस्य निर्माणं सञ्जातं सफलतया। तदनन्तरं अनेकेषां वैज्ञानिकानां प्रयासेन मूकचलचित्रे ध्वनिरपि संयोजिता। ध्वनिसंयुक्तस्य चलचित्रस्यापि आविष्कार: अमेरिकानगरे अभवत् सर्वप्रथमम्, किन्तु भारतवर्षे एतत् १९२३ ईस्वीये वर्षे विनिर्मितम् आसीत्।

अस्माकं देशे प्राय: सर्वेषु नगरेषु ग्रामेषु च चलचित्रगृहाणां स्थिति: प्रतीयते । तत्र बहव: नागरिका: चलचित्रं प्रतिदिनं पश्यन्ति । एकस्मिन् दिवसे प्राय: चतु:बारं चलचित्रं चाल्यते चलचित्रगृहे । अनेन प्रकारेण अतीव लोकप्रियम् एतत् सञ्जातम् भारते मनोरंजनसाधनम् । अस्य कारणमिदं यत् चलचित्रेषु सर्वेषु नृत्य–गीत–वाद्य–हास्य–अभिनय–सग्रामादय: सर्वेऽपि क्रियाकलापा: यथार्थरूपेण प्रदर्श्यन्ते। अनेनैव अद्यत्वे एतत् मनोरंजनसाधनेषु महत्त्वपूर्णं सञ्जातम्। अस्य आविष्कारस्यानन्तरं नाट्यगृहेषु नाटकानां अभिनयं प्रति जानानां अरुचि: सञ्जाता ।

चलचित्रमिदं न केवलं मनोरञ्जनाय, अपितु शिक्षाया: प्रचाराय प्रसाराय चापि कल्पते। अधुना सर्वकारेण अनेन माध्यमेन शिक्षाया: प्रसार: क्रियते। एवमेव सूचनाविभागेषु सूचनाया: प्रसारणार्थम् अपि अस्य साधनस्य उपयोगो भवति। स्वास्थ्यविभागोऽपि अस्मिन् विषये विशेष–प्रयत्नवान् दृश्यते।

एतदतिरिक्तं अस्य चलचित्रस्य उपयोगिता महती वर्तते, बालानां कृते तु। यतोहि ते अपरिपक्वबुद्धय: भवन्ति। अत: माध्यमेन अनेन अध्ययनविषये तेषां रुचिं अधिकां उत्पादने समर्था: भवितुं शक्नुम: वयं। अद्यत्वे समाजेऽस्माकं प्रौढशिक्षाया: प्रचार: अधिक: क्रियते। अत: अल्पधिया: ग्रामवासिन: अनेन माध्यमेन सहजतया शिक्षां अपेक्षितां गृहीतुं सक्षमा: सन्ति। अनेन प्रकारेण चलचित्रेण खलु सर्वेषां जनानां महान् लाभो भवति।

किन्तु प्रसंगेऽस्मिन् चिन्ताया: एक: विषयोऽस्ति। यत् केचित् जना: अधिकं धनार्जनं करणाय चलचित्रगृहेषु अश्लीलचित्राणां प्रदर्शनं कुर्वन्ति। तेषु चित्रेषु बहूनि तु नग्नानि एव भवन्ति। ईदृशानि लज्जाकराणि चित्राणि अवलोक्य अस्माकं देशस्य निर्मातार: युवका: कुमार्गगामिन: भवन्ति। ईदृशान् दृश्यान् विलोक्य अल्पमतिबालका: चरित्रभ्रष्टा: जायन्ते। तेषां चरित्रस्य संरक्षणम् अस्माकं महत् कर्तव्यम्। अत: सर्वकारेण प्रयत्नो विधेय: यत्, अस्मिन् विषये अश्लीलचित्राणां प्रदर्शनं केनापि प्रकारेण चलचित्रगृहेषु, चलचित्रेषु वा न स्यात्। तदैव अस्य आविष्कारस्य सम्यक्रूपेण लाभ: भविष्यति।

◆◆◆

विज्ञानं वैज्ञानिका: आविष्काराश्च

'विशिष्टं ज्ञानं विज्ञानम्' इत्युच्यते। श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन ज्ञानस्य महती प्रशंसा कृता, तेन तु ज्ञानं संसारे सर्वाधिकं पवित्रं कथितम्-

'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते'।

यदि श्रीकृष्णसदृशेन महापुरुषेण ज्ञानस्य ईदृशी प्रशंसा कृता, तदा विज्ञानस्य किंवा विशिष्टं ज्ञानस्य का कथा? वस्तुत: अस्माकं प्राचीने साहित्ये विज्ञानशब्द: आत्मज्ञानाय प्रयुक्त: दृश्यते, किन्तु अद्यत्वे शब्दोऽयं विशेषाभिप्रायं अभिव्यनक्ति। अस्य शब्दस्य अभिप्रायोऽयं इदानीम् -''कस्यापि पदार्थस्य सर्वेषां सूक्ष्मतमानामपि गुणानां सम्यक्तया परीक्षणं कृत्वा तेषां उपयोग: मानवहितार्थं करणमेव विज्ञानं भवति।''

वैज्ञानिके युगेऽस्मिन् विज्ञानस्य महत्ता सर्वै: जनै: विदिता अस्ति। यतोहि सम्प्रति सर्वेषु अपि क्षेत्रेषु विज्ञानस्य साम्राज्यं दृश्यते। द्युलोके भूलोके, पाताले, समुद्रे, स्थले, पर्वते, भूगर्भे च सर्वत्रैव विज्ञानस्य गति: अस्ति। मानव: अनेन विना नैव किमपि कार्यं साधयितुं समर्थ: अस्ति। किमधिकं स: खलु अद्य विज्ञानस्य दासत्वमेव प्राप्तमिति प्रतीयते।

विज्ञानस्य अस्य साम्राज्यविस्तरणे वस्तुत: वैज्ञानिकानां महत्त्वपूर्णं योगदानम् अस्ति। विश्वस्य अनेकै: वैज्ञानिकै: अनेकेषां आविष्काराणां कृते सर्वस्वं अर्पितम्। कस्मिंश्चित् काले तु तेषां सम्पूर्णं जीवनं एव एकस्य आविष्कारस्य कृते आहुतं भवति। तेषां कल्पनाशक्ति: तर्कशक्ति: विचारशक्तिश्च अतीव तीक्ष्णा: भवन्ति। ते प्रतिक्षणस्य उपयोगं कुर्वन्ति

स्वजीवनस्य । दिवारात्रौ ते एकस्मिन् एव आविष्कारे दत्तचित्तेन समर्पणभावनया कार्यं कुर्वन्ति , तदैव ते आविष्कारं कमपि कर्तुं सक्षमा: भवन्ति ।

यदि वयं विज्ञानस्य आविष्कारविषये विचारयाम: तर्हि एकं विज्ञानपुराणमेव विरचितुं शक्ये ,किन्तु अत्र तेषां आविष्काराणां दिग्दर्शनमात्रमेव प्रस्तूयते । प्रथमं तु वयं पश्याम: यत् वैज्ञानिकै: जलान्तराद् विद्युत्शक्ति: निर्गृहीता । अनया शक्त्या मानवस्य अनेकानि कार्याणि सहजेनैव भवन्ति । किम् अधिकं वस्तुत: मानवजीवनस्य किमपि क्षणम् ईदृशं नास्ति यस्मिन् क्षणे विद्युत्शक्त्या: प्रयोगो न भवति । प्रात:कालादारभ्य रात्रौ शयनपर्यन्तं सर्वाणि कार्याणि अनया शक्त्या खलु सम्पाद्यन्ते ।

विद्युत्सहयोगेनैव यातायातक्षेत्रे विज्ञानेन द्रुतगमनशीलं रेलयानं निर्मितम् । एवमेव वायुयानस्य आविष्कारेण आकाशेऽपि गमनं सम्भाव्यं जातम् । जलयानेन च दुस्तरेऽपि सागरे तरितुं समर्थ: मानव: , अन्यञ्च राकेट –यानेन तु अस्य मानवस्य अन्येषु ग्रहमण्डलेषु अपि गति: सञ्जाता ।

अस्मिन् वैज्ञानिके युगे चलचित्रेण मानवस्य मनोरंजनं महत् भवति 'टेलीविजन' नामकस्य यन्त्रस्य आविष्कारेण तु जगति क्रान्ति: एव संभूता एकान्ते स्थाने स्वगृहे एव स्थित्वा मानव: अनेन यन्त्रेण सम्पूर्णविश्वस्य समाचारान् सहजेनैव जानाति,तेषां समाचाराणां दृश्यम् अपि स्वाभाविकरूपेण द्रष्टुं समर्थ: अस्ति ।

दूरभाषयन्त्रस्य आविष्कारोऽपि अस्माकं सर्वेषां लाभाय कृत: एव वैज्ञानिकै: ,अनेन यन्त्रेण सर्वे जना: समक्षेस्थितान् जानान् इव वार्तालापं इष्टजनै: सह कुर्वन्ति । एस.टी.डी. माध्यमेन तु एषा व्यवस्था अतीव सरला सञ्जाता ।चिकित्साक्षेत्रेऽपि विज्ञानस्य महान् प्रभाव: दृश्यते ,अस्माकं वैज्ञानिकै: सर्वेषां जनानां प्राणिनां वा कृते रोगाणां विनाशाय अनेका: चिकित्सापद्धतय: आविष्कृता: सन्ति । ताभि:पद्धतिभि:असाध्या: रोगा: अपि दूरी भवन्ति ।

एवमेव एक्सरेयन्त्रस्य आविष्कारेण शरीरे स्थितानां गूढ–रोगाणां अपि सहजेनैव ज्ञानं भवति । अनेनैव यन्त्रेण भूगर्भे स्थितानां पदार्थानामपि ज्ञानं सरलतया जायते । कृषिक्षेत्रेऽपि विज्ञानस्य प्रभाव: स्पष्टमेव दृश्यते । तत्रापि बहूनि यन्त्राणि आविष्कृतानि विज्ञानेन । तै: यन्त्रै: स्वल्पेनैव कालेन बहूनि असाध्यानि अपि कार्याणि सम्भवन्ति । एवमेव युद्धक्षेत्रे, मौसम–विज्ञानक्षेत्रे ,मुद्रणक्षेत्रे सर्वेषु अपि क्षेत्रेषु विज्ञानस्य आविष्कारा: मानवस्य महतीं सेवां कुर्वन्ति ।

इदानीं तु 'कम्प्यूटर' इत्याविष्कारेण सम्पूर्णे जगति क्रान्ति: खलु विहिता, प्रत्येके क्षेत्रे अस्य प्रयोग: भवति । अनेन पर्यालोचनेन स्पष्टमेव भवति ,यत् वैज्ञानिका: आविष्कारा: नित्यं नूतना: भवन्ति तथा मानवस्य सेवां सम्यक्तया कुर्वन्ति , किन्तु अस्मिन् प्रसङ्गे वैज्ञानिकानाम् आविष्काराणां विध्वंसिनीं शक्तिं प्रति न अस्माभि: उपेक्षा करणीया ।

परमाणुशक्त्या आविष्कारोऽपि कृत: वैज्ञानिकै: । यद्यपि अस्या: शक्त्या: शान्त्यर्थमेव प्राय: प्रयोग:क्रियते,किन्तु यदि अस्या: शक्त्या:विनाशाय कदापि प्रयोग: भविष्यति ,तर्हि मानवताया: विनाश: अवश्यं भाव्य: जापानदेशस्य 'हीरोशिमा नागासाकी' इति नगरे द्वे अस्य उदाहरणे स्त: । अत: अस्माभि: सदैव वैज्ञानिकानां आविष्काराणां प्रयोग: मानवताया:

हिताय एव करणीय: । विषयेऽस्मिन् अतीव सावधानताया: आवश्यकता विद्यते ।

◆◆◆

पर्यावरणस्य रक्षणोपाया:

परित: आवृणोति ,इति पर्यावरणम् ,अनया व्युत्पत्या: 'पर्यावरण' शब्दो निष्पद्यते। मनुष्य: यत्रापि निवसति,यत्रापि खेलति,खादति,वस्त्राणि धारयति,पिबति ,वायोश्च सेवनं करोति,एतत् सर्वं पर्यावरणे निलीयते । पर्यावरणम् एतत् अस्मत् प्रकृत्या प्रदत्तं वर्तते । यत् अस्माकं सर्वेषां प्राणतत्त्वस्य रक्षां करोति ।

सर्वेषां प्राणिनां विकासाय अस्य पर्यावरणस्य शुद्धि:आवश्यिकी अस्ति । यतोहि स्वस्थं पर्यावरणं अस्माकं सर्वेषां जीवनस्य आधारोऽस्ति । सर्वे हरिता: वृक्षा: लताश्च आक्सीजनं दत्वा पर्यावरणस्य शुद्धिं कुर्वन्ति । ते खलु मानवै: वातावरणे परित्यक्तानि सर्वाणि दूषणानि उदरस्था: कुर्वन्ति । यतोहि एते वृक्षा: 'कार्बनडाई आक्साइड'नामकं तत्त्वं वायुत: गृह्णन्ति'आक्सीजनं'नामकं तत्त्वं विसृजन्ति । अनेन प्रकारेण अस्माकं पर्यावरणं स्वस्थं भवति ।

एवमेव सागरा: पर्वता:,वनानि,नद्य:,सरांसि,सर्वाणि एतानि जगत: प्राणिनां सर्वेषां कृते सुखानि संवर्धयन्ति । अस्मिन् संसारे ये प्राणिन: जीव-जन्तवश्च सन्ति , सर्वेऽपि ते अस्माकं पर्यावरणे सन्तुलनं स्थापयितुं भगवता निर्मिता:,किन्तु अद्यत्वे मानवै: स्वसुखाय अनेका: आविष्कारा:कृता: विद्यन्ते,तै: पर्यावरणम् अस्माकं प्रदूषितं क्रियते । यथा सम्प्रति तैलचलितानि यानानि स्वकीयै: धूमै: स्वस्थमपि वायुमण्डलम् अत्यधिकं प्रदूषयन्ति । अत: अस्माकं वायुमण्डले प्रतिक्षणं प्रदूषणं वर्धते । वनानि विच्छिद्य मानव: स्वगृहनिर्माणं करोति । अत: वृक्षाणाम् अभावे वातावरणम् अस्माकं दूषितं भवति ,एवमेव अस्त्राणाम् परीक्षणै: समुद्रस्य वातावरणं प्रदूष्यते ।

वस्तुत: मानवा: स्वस्य अल्पलाभाय अज्ञानवशात् स्वकीयं बहु विनाशं कुर्वन्ति । वनप्राणिनां स्वमनोविनोदाय किंवा धनलाभाय हिंसा करोति मनुष्य: । अनेन प्रकारेण जले स्थले वने गगने सर्वत्रैव प्रदूषणं वर्धते । अनेन अस्माकं सर्वेषां जीवनं असुरक्षितं सञ्जायते । मलमूत्रप्रणालीनां तैलशोधक रसायनानां प्रदूषितेन जलेन कूपनदीतडागादीनां जलराशि: विषयुक्ता सञ्जाता ,तेन जलेन मानवेषु अनेका: रोगा: जायन्ते ।

अत: स्वहिताय अस्माभि: स्वपर्यावरणस्य शुद्धिं प्रति जागरूक: भवितव्य: । अस्य पर्यावरणस्य शुद्धिकरणाय केचित् उपाया: कर्तव्या: । तेषु एते प्रमुखतां भजन्ते । जनै: कदापि यत्र तत्र ष्ठीवनं मलमूत्रप्रक्षेपणं न कर्तव्यम् । अस्माकं गृहेषु बहिश्च स्थित्या: प्रणाल्य:स्वच्छा: भवेयु: ,सर्वै: जनै: यत्रापि रिक्तं स्थानं तत्र वृक्षारोपणम् अधिकाधिकं करणीयम् । ये जना: वृक्षान् छिन्दन्ति तेषां कृते दण्डव्यवस्था भवितव्या । महानगरेषु मार्गाणां मध्ये हरितवृक्षाणां लतानां च विकास: कर्तव्य: । यतोहि एते पुष्पफलानाम् औषधीनां च दातार: भवन्ति । ते

अस्माकं आक्सीजन नामकं जीवनदायकं तत्त्वं ददति।

प्राचीनकाले अस्माकं पूर्वजा: पर्यावरणस्य शुद्धतायै उपवनानां आरोपणं कुर्वन्ति स्म। वातावरणस्य च शुद्धिकरणाय तै: यज्ञानाम् अनुष्ठानमपि क्रियते स्म। अत: अस्मभि: अपि ता: एव सरणि: स्वीकरणीया। वृक्षाणाम् अभावे अपेक्षिता वृष्टि: न भवति। अनेन अनावृष्टि: जायते, या सर्वेषां कृते हानिप्रदा अस्ति, यतोहि अनावृष्ट्या कृषिकार्यं बाधते।

अन्यञ्च अस्माभि: तैलचलितानां यानानां प्रयोग: अल्पाल्परूपेण कर्तव्य: ,यतोहि तै: प्रदूषणम् सर्वाधिकं वर्धते। वायो: शुद्ध्यर्थं सर्वै: जनै: हवनादिकम् अपि प्रात: सायंतने च काले करणीयम्। अस्माकं सर्वेषां समीपे यदपि प्रदूषणं तत् प्रयत्नपूर्वकं दूरीकर्तव्यम्। अनेन प्रकारेणैव अस्माकं पर्यावरणस्य शुद्धि: भविष्यति, वयं च सर्वे स्वस्था: भविष्याम:।

◆◆◆

उद्यानम्

'उद्यानम्' इत्यनेन शब्देन कस्य मन: आह्लादं न अनुभवति। यतोहि अनेन शब्देन ता: मधुर-क्षणानां स्मृतय: स्मृतिपथे आयान्ति, यानि बाल्यकाले स्वमित्रै: सह उद्याने क्रीडता अस्माभि: व्यतीतानि सन्ति। अस्माकं समाजे सर्वे खलु जना: उद्यानानां महत्त्वं जानन्ति, तदैव नगरेषु, ग्रामेषु, महानगरेषु च सर्वत्रैव उद्यानानि अनेकानि भवन्ति।

उद्याने बहव: वृक्षा: भवन्ति, तेषु केचन फलान्विता: ,केचन च केवलं पुष्पान्विता: । केषुचित् स्थलेषु उद्यानं परित: परिखा एका निर्मीयते। अनया पशव: उद्याने प्रविष्टा: न भवन्ति। उद्यानेऽस्मिन् पक्षिण: वृक्षेषु मधुरं कलरवं कुर्वन्ति। भ्रमरा: पुष्पेषु गुञ्जन्ति स्व प्रियया सह प्रात:काले ,यदा अस्मिन् पुष्पाणि विकसन्ति तेषु मधुपानं च कुर्वन्ति।

बहव: जना: अस्मिन्नेव समये सायंकाले च स्वास्थ्य-लाभाय उद्यानमध्ये भ्रमणार्थं आगच्छन्ति। केचित् आध्यात्मिका: जना: अत्र आगत्य एकान्ते भगवत् ध्यानं कुर्वन्ति। अत्र अनेकेषां वृक्षाणां छाया अतीव सघना वर्तते ,अनेन सा ग्रीष्मकाले रम्या सुखदायिनी च भवति। बहव: पथिका: अस्मिन् उद्याने मध्याह्नकाले विश्राममपि कुर्वन्ति।

अस्माकं नगरमध्येऽपि एकम् उद्यानम् अस्ति। तस्य उद्यानस्य नाम 'उपाध्याय उद्यानम्' वर्तते। तस्मिन् जम्बीर-आम्र-द्राक्षा-अमृतफल-निम्बादीनां विविधश्रेणीनां वृक्षा:सन्ति। तत्र एकं जलयन्त्रमपि विद्यते। तस्मात् जलयन्त्रात् जलधारा: निरन्तरेण प्रवहन्ति। दृश्योऽयं अतीव मनोरम: प्रतीयते। ग्रीष्मकाले अस्य परित: अनेके जना: स्थित्वा शीतलतां आह्लादकताम् अनुभवन्ति।

अस्मिन् उद्याने स्थाने-स्थाने कोमलानि शष्पाणि विस्तृतानि। अस्योपरि स्थित्वा

जना: परमसुखम् अनुभवन्ति। उद्यानेऽस्मिन् एक: कूपोऽपि वर्तते। तस्मादेव कूपात् अस्मिन् सर्वेभ्य: वृक्षेभ्य: जलसेचनं क्रियते। अस्य उद्यानस्य रक्षणाय एक: मालाकारोऽपि अत्र नियुक्तोऽस्ति। स: खलु अस्य परिरक्षणं,संरक्षणं च करोति। स: प्रात:कालाद् रात्रिपर्यन्तं अस्मिन् कार्यं करोति। स: कमपि जनं अस्माद् उद्यानात् पुष्पचयनार्थं अनुमति: न ददाति। अस्य उद्यानस्य एक: एव प्रवेशद्वार: वर्तते। वस्तुत: उद्यानमेतत् अस्माकं नगरस्य शोभा अस्ति।

प्राचीनकालेऽपि राजान: स्वप्रसादेषु उद्यानं नियोजयन्ति स्म।तत्र ते स्व परिजनै: सह मनोरंजनं कुर्वन्ति स्म। एतत् राजोद्यानम् कथ्यते स्म। सर्वेषां जनानां प्रवेश: अत्र निषिद्धि: आसीत्। यतोहि तानि सार्वजनिकानि उद्यानानि न भवन्ति स्म।

एतै: उद्यानै: अस्मत्कृते बहव: लाभा: सन्ति। सर्वप्रथमं तु एतानि अस्मत्कृते परिशुद्धं वायुं ददति। अनेन एतेषां उद्यानानां पर्यावरणस्य शुद्धयर्थं महत्त्वपूर्ण योगदानं वर्तते। एतेभ्य: वृक्षेभ्य: दैन्योपयोगिनी काष्ठानि फलानि च प्राप्यन्ते। पूजनकार्येषु पुष्पाणि उपलभ्यन्ते। फलानि खलु वयं प्रीतिपूर्वकं एतेषां खादाम: , छायायां च परमशान्तिम् अनुभवाम:।

किं बहुना एतानि उद्यानानि सर्वप्रकारेण खलु अस्मत्कृते लाभाय एव भवन्ति। अनेनैव केनचित् कविना एतेषां उद्यानानां प्रशंसा विषये मनोरमं पद्यमेतत् विरचितम्-

वहन्ति वाता: सुमनोज्ञगन्धा:,
पिबन्ति पुष्पेषु मधुद्विरेफा:।
खादन्ति वृक्षेषु खगा: फलानि-
छायासु पान्था: अपि संविशन्ति।।

◆◆◆

महाराणा प्रताप:

सिसोदिया कुलभूषणस्य परमदेशभक्तस्य महाराणाप्रतापस्य नाम को न जानाति अस्मिन् जगति। अनेन परमवीरेण स्वजन्मभूमिं पारतन्त्र्य-पाशेभ्य: मोक्तुं प्राणपणेन प्रयत्नानि कृतानि।

महाराणाप्रतापस्य पिता उदयसिंह : आसीत्। अस्य मातु: नाम जयवन्तीबाई आसीत्। राणा संग्रामस्य पौत्रोऽयं बाल्यकालादेव निर्भीक: साहसी च आसीत्। अस्य पिता उदयसिंह: अतीव भीरू: आसीत्। तदैव अनेन मुगलशासकस्य अकबरस्य आक्रमणस्य अवसरे चित्तौड़गढ राज्यस्य रक्षणार्थं पत्ताजयमलयो: नियुक्तिं कृत्वा पलायनं कृतम्।

परिणामस्वरूपं चितौड़राज्ये अकबरस्य शासनं सञ्जातम् । अस्मिन् समये संघर्षोपरान्ते महाराणाप्रतापेन वनं पलायनं कृतम् । तस्य प्रतिज्ञा एषा आसीत् , यद् अहं चित्तौड़राज्यं मुगलशासकात् अकबरात् यावत् न ग्रहीष्यामि,तावत् प्रासादेषु न निवसिष्यामि , सुवर्ण-रजतपात्रेषु भोजनं न गृहिष्यामि ,पर्यंकेषु शयनं न करिष्यामि ।

स्व अन्तिमं क्षणं यावत् तेन प्रतिज्ञा एषा धारिता पालिता च । अस्मिन् काले स: एकस्मात् वनात् अन्यं वनं अभ्रमत् । वने च तेन घासस्य रोटिका: अपि खादिता:, किन्तु मुगलशासकस्य अकबरस्य समक्षे स्वशिर: नमनं न कृतम् । वस्तुत: स: दृढव्रती,धैर्यशाली, बलशाली,नीतिज्ञश्च आसीत् । स्वमातृभूमिं प्रति तस्य अगाधश्रद्धा आसीत् । अनेनैव तेन आजीवनं वनेषु निवसिते अपि मुगलशासकेन अकबरेण सह युद्ध: कृत: ।

तेन संकटकालेऽपि स्वकर्त्तव्यस्य पालनं कृतम् । क्षुधापीडितं स्वपरिवारजनान् दृष्ट्वा अपि स: स्वमातृभूरक्षाव्रतं अपालयत् । कदापि कस्मिन्नपि क्षणे स: धैर्यस्य परित्याग: न कृतवान् , अपितु साहसपूर्वकं प्रबलपराक्रमेण कर्तव्यमार्गे खलु अतिष्ठत् ।

सम्राट् अकबरोऽपि तस्य युद्धकौशलेन,पौरुषेण,साहसेन,धैर्येण च प्रभावित: आसीत् । अनेन स: तस्य नाम अतीव आदरेण गृह्णाति स्म । महाराणाप्रतापस्य समीपे 'चेतक'नामक: एक: स्वामीभक्त: अश्व: आसीत् । तस्य वेग: वायु:इव अतितीव्र: अभवत् । अस्य साहसस्यापि गाथा अस्माकं इतिहासग्रन्थेषु प्राप्यते । एकेन हिन्दी कविना तस्य वेगस्य प्रशंसा एवं कृता-

रणबीच चौकड़ी भर-भरकर,चेतक बन गया निराला था ,
राणा प्रताप के घोड़े से,पड़ गया हवा का पाला था । ।

अनेन 'चेतक'नामअश्वेन महाराणाप्रतापस्य स्वजीवनस्य अन्तिमं क्षणं यावत् सहाय्यं कृतम् । वस्तुत: स: उत्कृष्ट: स्वामीभक्त: आसीत् ,तदैव तेन महाराणाप्रतापस्य प्राणान् स्वजीवनमपि दत्त्वा रक्षिता: ।

एकदा महाराणाप्रताप: वने स्वपरिवारस्य सदस्यै: सह भोजनं करोति स्म । भोजने घासस्य रोटिका: आसन्,तस्य बालक: तां रोटिकां खादति स्म । तदैव तत्र कापि मार्जारिका आगता । तस्य बालकस्य च हस्तात् रोटिकां गृहीत्वा पलायिता । बालक: रोदितवान् उच्चस्वरेण । एतत् दृष्ट्वा प्रतापस्य हृदयं विदीर्णं जातम् । तेन संन्ध्यर्थं अकबरं प्रति पत्रमेकं प्रेषितम् ।

किन्तु सम्राट् अकबरस्य सभायां एक: सभासद: प्रतापं प्रति अतीव श्रद्धावान् आसीत् । तेन प्रतापस्य पत्रस्य व्याख्या सभायां अन्यरूपेण कृत्वा महाराणा प्रतापस्य हृदयपरिवर्तनपि कृतम् । परिणामे च तेन पुन: सम्राजा अकबरेण सह मृत्युपर्यन्तं युद्धस्य प्रतिज्ञा कृता । मृत्युसमये तस्य मनसि आसीत्-काश ! मम वंशजा: अपि अस्य देशस्य रक्षां कुर्यु: । वस्तुत: तस्य देशभक्तस्य देशभक्ति: अस्मान् सर्वान् भारतीयान् अद्यापि प्रेरिका वर्तते

◆◆◆

शङ्कराचार्यः

'अम्ब ! अहं संन्यासं ग्रहीतुं वाञ्छामि', एतानि शब्दानि विश्वविश्रुतस्य श्रीमत्छंकराचार्यस्य बाल्यकाले सप्तवर्षीय अवस्थायां स्वमातरं प्रति आसन्। अस्य विदुषः जन्म भारतवर्षस्य दक्षिणप्रान्ते 'कालटी'नामके ग्रामे अभवत्। अस्य मातुः नाम 'सुभद्रा',पितुः नाम शिवगुरुः आसीत्। जनैः कथ्यते यत् शंकराचार्यस्य जन्म अस्य पित्रोः वृद्धावस्थायां भगवान्शङ्करस्य कृपया अभवत्। यदा एषः त्रिवर्षीयः आसीत्, तदैव पिता अस्य पञ्चतत्त्वं गतवान्।

जनन्या सुभद्रया पञ्चमे वर्षे अस्य बालकशङ्करस्य यज्ञोपवीतः कारितः। तदनन्तरं अनेन सकलाः वेदविद्या अधीता,विदुषां मध्ये परम प्रसिद्धिः च प्राप्ता। वस्तुतः बाल्यकालादेव बालोऽयं तीक्ष्णबुद्धिः आसीत्। अनेनैव एकवर्षीयः एषः बालकः स्पष्टरूपेण मातृभाषां वदति स्म। द्विवर्षीयः अयं मातृकथितां पुराणानां कथानां सर्वासां सम्यक्रूपेण स्मरणं अकरोत्।

सप्तवर्षीयेण अनेन संन्यासग्रहणाय स्वमातरं प्रति अनुमतिः याचिता, किन्तु ममत्वप्रतिमूर्त्या तया संन्यास-आश्रयणाय स्वीयां स्वीकृतिः न प्रदत्ता। एकदा सः मात्रा सह नद्याम् एकस्यां स्नानम् करोति स्म। तदैव ग्राहेण एकेन तस्य पादः ग्रस्तः। शङ्करः स्वमातरं प्रति अवोचत् -

'अम्ब ! यदि त्वं मह्यं संन्यासग्रहणाय अनुमतिं दास्यसि,तर्हि ग्राहोऽयं मां त्यक्ष्यति।'' विवशया मात्रा स्वपुत्रस्य प्राणत्राणाय संन्यासस्य आज्ञा प्रदत्ता ,किन्तु मात्रा कथितम् -'मम मृत्युकाले आगन्तव्यं त्वया मत्समीपम्' इति।

मातुः आज्ञां प्राप्य सः नर्मदायाः तीरं गत्वा श्रीमत्गोविन्दपादाचार्यं गुरुं विधाय अष्टवर्षीयाम् अवस्थायां संन्यासं गृहीतवान्। बाल्यकाले अस्य नाम शङ्करः आसीत्। संन्यासानन्तरं गुरुणा अस्य 'भगवत्पूज्यपादाचार्यः'नाम कृतम्। अत्रैव अनेन श्रुतिशासितं अद्वैतमतं वर्षत्रयं यावत् अधीतम्।

पश्चात् गुरोः आज्ञया श्रीविश्वनाथस्य वाराणसीं नगरीं समधिगत्य ब्रह्मसूत्रश्रीमद्भगवद्गीतोपनिषत्सु प्रामाणिकं भाष्यं विरचितम्। तत्रैव भगवतः वेदव्यासस्य कृपया पुनः षोडषवर्षात्मकं कालं प्राप्य तस्य आज्ञया वेदान्तप्रचारे सनातनधर्मस्य च प्रतिष्ठार्थं संलग्नो जातः। अस्मिन् काले अनेन काशी-कुरुक्षेत्र-बदरिकाश्रमतः दक्षिणे भारते रामेश्वरं यावत् यात्रा कृता प्रचारार्थमेव।

प्रयागे त्रिवेण्याः तटे अयं मीमांसकाचार्येण कुमारिलभट्टेन सह शास्त्रार्थमपि गतवान्,किन्तु तदानीं सः अन्तिमाम् अवस्थायाम् आसीत्। अतः तस्य आज्ञया एषः मण्डनमिश्रेण सह शास्त्रार्थाय माहिष्मतीं नगरीं अगच्छत्। तत्र मीमांसाशास्त्रेषु निपुणस्य मण्डनमिश्रस्य विदुषीं पत्नीं माध्यस्थरूपेण निधाय तं विजितवान्।

किन्तु तस्मिन् एव समये अर्धाङ्गरूपया पत्न्या कामशास्त्रीयप्रश्नेषु पृष्टेषु

ब्रह्मचर्यवशात् मौनं स्वीकृतवान् खलु सः। पुनः षाण्मासिकं अवधेः अनुमतिं गृहीत्वा अनेन योगबलेन दिवङ्गतस्य अमरुकभूपतेः मृते शरीरे प्रविश्य काम-कला कौशलं प्राप्तम्। अस्मिन् काले शङ्कराचार्येण 'अमरुकशतकम्'नाम शृङ्गारिकस्य मुक्तककाव्यस्य संरचना कृता आसीत्।

अनन्तरं शास्त्रार्थे पराजिते सः मण्डनमिश्रस्य धर्मपत्नीं भारतीं ,आचार्यमण्डनमिश्रं च शिष्यरूपेण गृहीतवान् ,अस्य नाम शङ्कराचार्येण सुरेश्वराचार्यः इति कृतः। एतदभिधानं गृहीत्वा सः तेन सह वैदिकस्य मतस्य प्रचारार्थे भारतभुवः भ्रमणम् अकरोत्।

स्वजीवनकाले श्रीमताशङ्कराचार्येण बहूनां ग्रन्थानां संरचना कृता। तेषु ब्रह्मसूत्र-गीतोपनिषदानां भाष्यानि महत्त्वपूर्णं स्थानं भजन्ते। आचार्यप्रवरेण पुरी-द्वारिका-शृङ्गेरी-ज्योतिर्मठ-इत्यादिषु स्थलेषु पीठानां स्थापना कृता , एकैकः शिष्यः च तेषु पीठेषु धर्मरक्षणाय नियुक्ती कृतः।

केदारनाथस्य निकटे द्वाविंशति-अवस्थायां काश्मीरक्षेत्रे शारदामन्दिरे सः अमुं भौतिकशरीरं परित्यक्तवान्। तस्य प्रधानशिष्येषु पद्मपादाचार्यः, सुरेश्वराचार्यः च मुख्यतां भजेते। अल्पीयस्याम् अवस्थायां श्रीमता शङ्कराचार्येण बहूनि कार्याणि कृतानि। अतः अस्माभिः तस्य नाम श्रद्धया ग्रहणीयम्।

◆◆◆

महर्षि दयानन्दः

असारे खल्वस्मिन् संसारे बहवः जनाः जन्म गृह्णन्ति म्रियन्ते च ,किन्तु तेषामेव वस्तुतः जीवनं 'जीवनं' भवति ये स्वकीयैः महत्त्वपूर्णैः कार्यैः योगदानै र्वा सदैव यशः शरीरेण जीवन्ति। ईदृशाः जनाः महापुरुषाः कथ्यन्ते। तेषां सम्पूर्णमेव जीवनं जनकल्याणाय सर्वेषां प्राणिनाम् उद्धाराय च भवति।

विषयेऽस्मिन् धन्या इयं भारतभूमिः यत्र सङ्कटापन्ने जनानां कृते सन्मार्गं प्रदर्शयितुं अनेके महापुरुषाः काले-काले जन्म अलभन्त। भारतस्य पारतन्त्र्यकाले जनाः धर्मतत्त्वं विस्मृत्य बाह्याडम्बरमेव स्वीकर्तुम् आरभन्ते स्म। तदानीं सत्यमार्गं परित्यज्य सामाजिकाः अन्धविश्वासैः अस्पृश्यता-बालविवाहादिषु-कुरीतिषु पतिताः आसन्। स्त्रीणां दुर्दशा आसीत्। ईदृशीषु परिस्थितिषु समाजे प्रचलित्याः कुरीत्याः विनाशाय अवतरितः महर्षिदयानन्दः अस्माकं सर्वेषां पदप्रदर्शकः अभूत्।

स्वनामधन्यस्य तस्य दयानन्दस्य जन्म गुजरातप्रान्ते काठियावाडजनपदे 'टङ्कार' नाम्नि ग्रामे १८२४ ईस्वीये वर्षे अभवत्। अस्य पितुः नाम 'श्रीकर्षण'आसीत्। सः च परमशिव-भक्तोऽभवत्। दयानन्दस्य जन्म नाम मूलशङ्करः जातः। एकस्मिन् दिवसे शिवरात्रि- पर्वे पितुः आज्ञया अनेन बालकेन उपवासः कृतः। पित्रा सह शिवमन्दिरे रात्रौ सः

शिवपूजायां निमग्नः आसीत्।

तदैव अनेन बालकेन शिवलिङ्गस्य उपरि कूर्दन् तत्र मिष्टान्नं भक्षयन् एकः मूषकः दृष्टः। एतत् दृष्ट्वा मूलशङ्करः अतीव निराशः अभवत्। अनेन चिन्तितम्-यत् यः शङ्करः स्वरक्षायाम् असमर्थः सः कथं जगतः प्राणिनां रक्षां करिष्यति। अतः नैव शिवलिङ्गम् एतत् वास्तविकः परमेश्वरः।

अतः तस्याम् अवस्थायाम् एव एषः बालः मूलशङ्करः परमात्मानम् अन्वेष्टुम् गृहं त्यक्त्वा संन्यासी अभवत्। बहुषु स्थलेषु सः अनेकैः पण्डितैः सह मिलितवान्। अनेकानि च पुस्तकानि पठितानि, किन्तु नैव शान्तिं प्राप्तवान्। ततश्च स्वामी-पूर्णानन्द-सरस्वती-महाभागस्य समीपम् अगच्छत्, तत्रैव च नर्मदातीरे संन्यासदीक्षा गृहीता अनेन, तस्मादेव कालाद् 'दयानन्द सरस्वती' जातोऽयं मूलशङ्करः बालकः।

तदनन्तरं अयम् प्रज्ञाचक्षोः गुरु विरजानन्दस्य शिष्यःअभवत् मथुरायाम्। तस्मात् एव पाणिनीयं व्याकरणम् पठित्वा अनेन पूर्णब्रह्मचर्यं धारितम्। वर्षत्रय-अनन्तरं विद्यायाः समाप्तिः सञ्जाते, गुरुणा आदिष्टोऽयं दयानन्दः-वत्स! गच्छ, भारतवर्षे अज्ञानग्रस्ताः जनाः अनेकान् क्लेशान् सहन्ते, तेषां उद्धारं कुरु। समाजे प्रचलितान् कुरीतिजालान् छिन्धि। एषा खलु मम दक्षिणा भविष्यति।

गुरोः आदेशं स्वीकृत्य तेन समाजे प्रचलितानां पाखण्डादीनां विनाशाय दृढनिश्चयः कृतः। तदाप्रभृतिः अनेन स्वसर्वं जीवनं वेदप्रचारे, देशात् अज्ञानं दूरीकरणाय समर्पितम्। क्रमेऽस्मिन् सर्वप्रथमं उद्घोषितं यत् वैदेशिकशासनस्य समाप्त्याभावे भारतीयाः सुखिनः न भविष्यन्ति। एतदर्थं एषः जनेषु भेदविहीनस्य संघटनस्य आवश्यकतां अनुभूतवान्। एतेन चिन्तितम् यत् अन्धविश्वासानां विनाशेन, कुप्रथानां च उन्मूलनेनैव भारतीयानां सर्वेषां चरित्रनिर्माणं भविष्यति।

अतः अस्मिन् क्षेत्रे अनेन सर्वाणि कार्याणि कृतानि। सत्यस्य अर्थस्य प्रकाशाय अनेकेषां ग्रन्थानां अध्ययनं कृत्वा तेन 'सत्यार्थ प्रकाशः' इति नाम्नः ग्रन्थः विरचितः। अन्याः अपि अनेके ग्रन्थाःविरचिताः, तेषु ऋग्भाष्यं, यजुःभाष्यं च अतीवमहत्त्वपूर्णे स्तः। अनेन वेदानां व्याख्या नूतन-दृष्ट्या कृता। सहैव चरित्रनिर्माणाय 'आर्यसमाज' इति नाम्नि संस्थायाः संस्थापना कृता।

स्वामीदयानन्देन स्त्रीषु शिक्षायाः प्रचारविषये अतीव प्रयत्नः कृतः। यद्यपि अनेन महा-पुरुषेण स्व सम्पूर्णमेव जीवनं स्वदेशजातिराष्ट्रकल्याणाय अर्पितम्, तथापि कैश्चित् दुष्टैः अनेकशः महात्मानमेनं मारणाय प्रयत्नानि कृतानि। तेषु प्रयत्नेषु 'जगन्नाथ' नामकस्य अस्य खलु पाचकस्य एव प्रयत्नः सफलः जातः। वेश्यावशगेन तेन दुग्धे विषं संमिश्र्य एनं दत्तम्। केनापि समीचीनमेव कथितम्-

''द्विषन्ति मन्दाश्चरितं महात्मनाम्''

परिणामतः तत् विषं पीत्वा सः समाजोन्नायकः, कुरीतिनिरोधकः महापुरुषः १८८३ ईस्वीये वर्षे दीपावल्याःदिवसे पञ्चतत्त्वं प्राप्तवान्। वस्तुतः स्वामीदयानन्दः निःस्वार्थसेवकः, सत्यस्य साधकः, धर्मपरायणः, भारतस्योन्नतिकारकः, समाजोन्नायकश्च

आसीत् । अनेन महापुरुषेण यावज्जीवनं देशजातिसमाजस्य उद्धाराय प्रयत्नं कृतम् । क्षमाशीलता तु तस्मिन् ईदृशी आसीत् , यत् विषदातारं जगन्नाथं जानन् अपि सः न केवलं क्षमितवान् , अपितु पञ्चशत् रूप्यकानि प्रदाय तं नेपालदेशं प्रेषितवान्। वस्तुतः सः अस्माकं सर्वेषां मानवानां वन्द्यः पूजनीयः, श्रद्धेयः च वर्तते।

◆◆◆

स्वामीविवेकानन्दः

न केवलं भारते अपितु विदेशेषु अपि भारतगौरवम् उन्नतकारकरस्य स्वामी-विवेकानन्दस्य नाम को न जानाति । अस्य पितुः नाम विश्वनाथदत्तः आसीत् । सः पाश्चात्यसभ्यतायां आस्थावान् अभवत्। तस्य खलु गृहे जनवरी मासस्य द्वादशतारिकायां १८६३ईस्वीये वर्षे एकः बालकः उत्पन्नोऽभवत्। अस्य नाम नरेन्द्रः आसीत्। अनेनैव बालकेन पञ्चविंशति वर्षे कषाय वस्त्राणि धारितानि तथा च भारतीयतत्त्वज्ञानस्य शिक्षा पाश्चात्यजगते प्रदत्ता। अनेन प्रकारेण अल्पीयसी वयसि खलु महान् विश्वगुरुः अभवत्।

बाल्यकालादेव बालके ऽस्मिन् आध्यात्मिक-पिपासा महती आसीत् । १८८४ ईस्वीये वर्षे अस्य पितुः विश्वनाथस्य स्वर्गवासोऽभवत् । अतः परिवारस्य सम्पूर्णानि दायित्वानि अस्य स्कन्धोपरि आगतानि । अस्य बाल्यकालः विपन्नायाम् आर्थिकदशायां व्यतीतोऽभवत् । अभूतपूर्वप्रतिभासम्पन्नेन नरेन्द्रेण बाल्यावस्थायामेव सर्वेषां दर्शनानाम् अध्ययनं कृतम्।

जिज्ञासुः बालकः नरेन्द्रः स्वजिज्ञासायाः शान्त्यर्थं इतस्ततः अभ्रमत् । अनेकेषां पण्डितानां समीपम् अगच्छत् । किन्तु सर्वत्र समाधानम् अप्राप्य खलु व्याकुलोऽभवत् । तस्मिन्नेव समये अस्य साक्षात्कारः स्वामी रामकृष्णपरमहंसेन सह सञ्जातः । कथ्यते यत् अनेनैव बालकं नरेन्द्रं आत्मदर्शनं अकारयत्। अतः सः खलु अस्य गुरुः अभवत्।

संन्यासग्रहणे कृते अनेन पदाति खलु सम्पूर्णस्य भारतवर्षस्य यात्रा कृता एवञ्च नरेन्द्रात् स्वामी विवेकानन्दः सञ्जातः । १८९३ ईस्वीये वर्षे 'शिकागो' इति नगरे आयोजितायां विश्वधर्मपरिषदि भारतस्य प्रतिनिधिरूपेण अनेन सहभागिता कृता आसीत्। आरम्भे तु अस्यां परिषदि प्रवेशस्य अनुमतिः अपि न प्राप्ता विवेकानन्दम् ,यतोहि सर्वेषां वैदेशीयानां विचारः आसीत् ,यत् पराधीनस्य भारतस्य जनः कीदृशः धर्मोपदेशः दास्यति ? यतोहि ते भारतस्य नाम्ना वै घृणां कुर्वन्ति स्म इति, किन्तु एकस्य अमेरिकन प्रोफेसरमहाभागस्य प्रयासेन अनुमतिः प्राप्ता, किञ्चिद् सम्भाषणाय।

१८९३ईस्वीये वर्षे सितम्बरमासस्य एकादशतारिकायां स्वामीविवेकानन्दस्य

संभाषणेन सर्वे वैदेशिका: चमत्कृता: सञ्जाता: । तस्मिन्नेव दिने सर्वै: स्वीकृतम् एतत् यत् भारतवर्ष: सदैव विश्वस्य गुरु: आसीत् ,भविष्यति च । अनेन जनेन वस्तुत: विदेशेषु हिन्दूधर्मस्य पताका प्रसारिता। भारतस्य अद्भुतमेधाया: सम्यक् चित्रं तत्र प्रस्तुतम्।

तेन कथितम्-यत् आध्यात्मविद्यां भारतीयधर्मदर्शनं विना सम्पूर्ण: खलु विश्व: अनाथ:एव अस्ति । स: विदेशे १८९६ ईस्वीयवर्षं यावत् न्यवसत् । तत्र अनेन रामकृष्णमिशनस्य अनेका: शाखा: प्रस्थापिता: । अनेकैश्च अमेरिकनविद्वद्भि: अस्य शिष्यत्वं गृहीतम्। स्वामी विवेकानन्दस्य कथनम् एतत् आसीत् यत्- नाहं तत्त्ववेत्ता नैव च दार्शनिक:, अपितु अहं खलु निर्धन:,निर्धनानां च अनन्यभक्तोऽ स्मि। वस्तुत: स: खलु ईदृश: महात्मा यस्य हृदि निर्धनानां कृते स्नेह : आसीत् ।

१९०२ईस्वीये वर्षे जुलाई मासस्य चतु: तारिकायां अनेन महात्मना पार्थिवशरीरस्य परित्याग: कृत: । वस्तुत: अद्भुतव्यक्तित्वसम्पन्नस्य तस्य हृदये भारतप्रेम घनिष्ठरूपेण आसीत् । स: खलु देशभक्तोऽपि आसीत् । स्वतन्त्रताया: संग्रामेऽपि तेन भारतीययुवकानां देशप्रेम्न: पाठं पाठित: । ईदृश: महान् नायक: अस्माकं सर्वेषां भारतीयानां आदर्शोऽस्ति। अस्माभि: सर्वै: तं प्रति श्रद्धा करणीया।

◆◆◆

लालबहादुरशास्त्री

स्वतन्त्रतासंग्रामसेनानी-श्रीलालबहादुरशास्त्रिण: नाम विश्वस्मिन् जगति को न जानाति । अनेन मनसा वाचा कर्मणा अस्माकं राष्ट्रस्य सेवां कृत्वा देशहिताय स्वबलिदानं खलु कृतम्। अनेनैव जनोऽयं महापुरुषेषु गण्यते। तस्य नाम च अत्यादरेण गृह्यते जनै: ।

अस्य महापुरुषस्य जन्म वाराणसीमंडलस्य 'मुगलसराय'नामके स्थाने अक्टूबर मासस्य द्वितीय दिनाङ्के १९०४ ईस्वीये वर्षे एकस्मिन् सामान्यकायस्थपरिवारे अभवत्। अस्य पितु: नाम शारदाप्रसाद: आसीत्। स: खलु एकस्मिन् विद्यालये सामान्य: अध्यापक: आसीत्। अस्य माता श्रीमती रामदुलारीदेवी एका पतिपरायणा भारतीयमहिला आसीत्।

एवं यदा अयं सार्द्धैकवर्षीय एव आसीत् ,तदैव अस्य पिता पञ्चतत्त्वं प्राप्तवान् । अत: अस्य पालनपोषणं मातामहगृहे अभवत्। यदा अयं वाराणस्यां हरिश्चन्द्रविद्यालये पठति स्म ,तदैव अयं श्रीमत: महात्मागन्धिमहाभागस्य असहयोगान्दोलने सम्मिलितोऽभवत् । तदानीं एष: षोडषवर्षीय: आसीत्। आन्दोलनेऽस्मिन् भागं गृहीत्वा स: कारागारमपि अगच्छत्।

किञ्चित् कालानन्तरं कारागारात् मुक्तो भूत्वा पुन: काशीपीठे अध्ययनं कृत्वा शास्त्रि-परीक्षायाम् उत्तीर्णोऽभवत् । ततश्च स्वतन्त्रतासंग्रामे पुन: संलग्न: जात: । अनेन प्रकारेण स: नव बारं कारावासं अगच्छत्। अनेन कारागारे खलु आत्मकथाया: लेखनम् अपि

कृतम् आसीत्।

श्रीलालबहादुरशास्त्रीमहोदय:बाल्यकालादेव सरलस्वभाव:,निर्भीक:,प्रतिभासम्पन्न ,दृढनिश्चयी ,साहसी,कर्मठश्च आसीत् । अस्य जीवनं अति सरलम् प्रीतिकरं चाभवत्। एकस्मिन् स्थले अनेन स्वयमेव कथितम् यत् –''यदाऽहं ग्राम्रात् वाराणस्यां पठनाय गच्छामि स्म। तदानींतने समये अर्थाभावात् नौकया गङ्गां पारं कर्तुं सक्षमो न आसम्। अनेन तरित्वा खलु गङ्गाया: पारं अगच्छम्। ''वस्तुत: अस्य परिवारस्य आर्थिकस्थिति: अतीव शोचनीया आसीत्।

अनेन राजनीतिक्षेत्रे विविधानि पदानि अलङ्कृत्तानि। १९६४ ईस्वीये वर्षे सप्तविंशति तारिकायां पं.नेहरुमहोदयस्य दिवंगते सति,श्री शास्त्री महाभाग: सर्वसम्मत्या भारतराष्ट्रस्य प्रधानमन्त्री अभवत्। अष्टादशमास पर्यन्तम् अनेन अस्य देशस्य सफलं नेतृत्वं कृतम्।

स्वकार्यकाले महाभागेन अनेन ईदृशानि कार्याणि कृतानि ,यानि दृष्ट्वा सर्वे देशीया: विदेशीया: च नेतार: चकितचकिता: सञ्जाता: । आर्थिकविपन्नतायां अस्य बाल्यकाल: व्यतीत:,अनेन देशस्य निर्धनजनानां विपन्नाम् अवस्थाम् एष: सम्यक्तया जानाति स्म । अत: एतेन स्वदेशस्य आर्थिकसमृद्धयर्थं महान्त: प्रयासा: कृता:।

अस्य प्रधानमन्त्रीत्वे भारतदेशस्य पाकिस्तानदेशेन सह युद्धम् अपि अभवत्। अस्मिन् युद्धे शास्त्री महोदयेन अपूर्वकुशलताया: परिचय: दत्त: । संकटापन्ने देशे अनेन अपूर्व-साहसशौर्ययो: च प्रदर्शनं कृतम्। अत: अस्य सफलनेतृत्वे पाकिस्तानदेश: युद्धे पराजित: सञ्जात:।

किन्तु विश्वस्य शान्तिस्थापनाया: प्रयासेषु स्व योगदानं करणाय अयम् महापुरुष: रूसदेशस्य ताशकन्दनगरं गतवान् ,तत्रैव च अकस्मात् हृदयगत्या: अवरोधनेन असौ प्राणान् अत्यजत्। अस्य मृत्यो: समाचारं श्रुत्वा सर्वे भारतवासिन: शोकनिमग्ना:सञ्जाता:। वस्तुत: अनेन देशभक्तेन शान्त्यर्थं स्व प्राणानाम् अपि आहुति: प्रदत्ता। अद्भुतव्यक्तित्वसंयुक्त: एष: अस्माकं मध्ये अद्य नास्ति,किन्तु अस्य कार्याणि अस्माकं मार्गदर्शनम् अवश्यमेव कुर्वन्ति। एतादृशा: महापुरुषा: यश: शरीरेण जीवन्ति खलु।

◆◆◆

संघे शक्ति: कलौ युगे

अस्या:सूक्त्या: अभिप्रायोऽयं यत् 'आधुनिके काले य: कलिकालो वर्तते,अस्मिन् समये वस्तुत: एकतायामेव शक्ति: विद्यते।'वस्तुत: कलियुगे वै कथं सर्वेषु खलु युगेषु संघे-एकतायां शक्ति: भवति । यतोहि सृष्टिकालादारभ्य एव एकताया: आवश्यकता आसीत्। प्राचीनकालेऽपि मानव: यूथेषु वसति स्म,तेनैव तस्य सुरक्षा सञ्जाता।

वस्तुस्थितिस्त्वेषा यत् मनुष्य: एक: सामाजिक: प्राणी अस्ति। स: एकाकी स्थातुं न

शक्नोति , स्वजीवने सर्वेषु कार्येषु स: अन्येषां जनानां सहाय्यं वाञ्छति । अनेकेषां जनानां यूथ: एव 'संघ:'भवति ।यूथेऽस्मिन् जना: एकं लक्ष्यं गृहीत्वा एकताया: सूत्रे निबध्नन्ति । संसारेऽस्मिन् सदैव संघस्य अतीव महत्त्वं अभवत्,अस्ति भविष्यति च। सहकारिता मानवस्य सर्वोत्तम: गुणोऽस्ति ,अनया सहाय्येन जन: किमपि कठिनं कार्यं कर्तुं शक्यते । एकताया: विषये अस्माकं समाजे एका कथा श्रूयते-

एक: कृषक: आसीत् । तस्य चत्वार: पुत्रा: आसन् । ते सर्वे प्राय: परस्परं विवादं कुर्वन्ति स्म । कृषक: तान् दृष्ट्वा अतीव चिन्तातुर: अभवत् । वृद्धावस्थायां एकदा तेन सर्वे ते पुत्रा: आहूता: , आकार्य च तान् सर्वान् अवदत् युष्माभि: नैव परस्परं विवाद: कर्तव्य: , प्रेम्णा सदैव स्थातव्य: , किन्तु तै: पुत्रै: तस्य कथनं न श्रुतम् ।

तदनन्तरं तेन विवदमानान् स्वपुत्रान् एकताया: पाठं पाठयितुं कानिचित् काष्ठखण्डानि आनीतानि । तेषु पुत्रेषु च एकं पुत्रं आकार्य स: एकं काष्ठखण्डं दत्त्वा तं त्रोटयितुं अकथयत् । तेन पुत्रेण तत् काष्ठखण्डं सहजेनैव त्रोटितम् । अन्यैरपि एकैकं काष्ठखण्डं पृथक्-पृथक् सरलतया त्रोटितम् ।

तत्पश्चात् अनेन कानिचित् काष्ठखण्डानि एकस्मिन् स्थाने बद्धानि,अनेन च ते सर्वे पुत्रा: एतत् काष्ठसमूहं त्रोटनाय कथिता:,किन्तु ते सर्वे मिलित्वा अपि तत् काष्ठसमूहं त्रोटयितुं समर्था: न अभवन् , अनन्तरं स: तान् सर्वान् प्रति अवदत्-''एतानि काष्ठखण्डानि भवद्भि: पृथक्-पृथक् सरलतया खंडितानि कृतानि,किन्तु एतेषां एकस्मिन् स्थाने बद्धे , यूयम् सर्वेऽपि मिलित्वा त्रोटने असमर्था: अभवन् ।''

एवमेव यदि यूयं भ्रातर: प्रेमपूर्वकं मिलित्वा वसत ,तर्हि नैव कोऽपि जन: युष्मान् जेतुं शक्नोति । यदि पृथक् वसिष्यति तर्हि कोऽपि युष्मान् मारिष्यति । अत: सदैव मिलित्वा खलु वसनीय: । कदापि परस्परं विवाद: न करणीय: ।

वस्तुत: एकस्मिन् तृणे तावती शक्ति: नास्ति यावती बहुषु तृणेषु संघे संजाते भवति । अस्माकं जीवने विषये अस्मिन् अनेकानि उदाहरणानि दृश्यन्ते । यथा -पिपीलिका जगति अस्मिन् अतीव तुच्छ प्राणी अस्ति,किन्तु सा ऽपि परस्परं मिलित्वा विशालमपि कमपि जीवं खादितुं समर्था जायते । एवमेव एकदा तण्डुलकणै: आकृष्टा: कपोता:,लुब्धकस्य जाले बद्धे जाते एकताया: बलेनैव आकाशे उड्डीयन्ते स्म,स्व प्राणान् च रक्षितवन्त: एकताया: बलेन । पश्चात् स्वमित्रस्य मूषकस्य सहाय्येन ते सर्वे छिन्नपाशा: सञ्जाता: ।

एवमेव वयं कदापि एकस्मात् तिलात् तैलं प्राप्तुं न शक्नुम: । एकेन चक्रेण रथस्य गति: कदापि न भवति । एकेन जलबिन्दुना मानव: पिपासाया: शान्तिं कर्तुं न शक्यते । एकया इष्टिकया गृहं न निर्मीयते । एकेन हस्तेन तालिका न वाद्यते यथा , तथैव अस्मिन् संसारे महत्त्वपूर्णानि कार्याणि सम्पादनाय संघस्य आवश्यकता भवत्येव ।

वस्तुत: समूहे संघे वा शक्ति: भवति । वीराणां समूह: सेनारूपं गृहीत्वा दुर्जेयान् अपि शत्रून् सरलतया जयति । एकेन तन्तुना वस्त्रनिर्माणं न जायते,किन्तु तेषां तन्तुनां संघेन वस्त्रं कुशलतया संपाद्यते । एवमेव शरीरे अस्माकं सर्वाणि इन्द्रियाणि मिलित्वा एव कार्यं कर्तुं सक्षमा: भवन्ति । अत: उपर्युक्तेन विवेचनेन सिद्धमेतत् भवति यत्-

''संघे शक्तिः कलौ युगे''

अतः अस्माभिः सदैव स्वार्थभावं परित्यज्य एकतायां विश्वासः कर्तव्यः परस्परं च प्रेमपूर्वकं वसितव्यः। अनेनैव वयं स्वस्य समाजस्य राष्ट्रस्य च उन्नतिं कर्तुं शक्नुमः।

◆◆◆

मदिरापानस्य दूषणानि

असारे खलु अस्मिन् संसारे बहूनि वस्तूनि सन्ति। तेषु कानिचित् ग्रहण-योग्यानि अन्यानि च त्याज्यानि सन्ति। त्याज्येषु वस्तुषु 'मदिरा'अपि खलु ईदृशी। अनेन सेवनेन मनुष्यस्य महती हानिः भवति,किन्तु एतत् जानन्नपि केचिद् अल्पमेधसः जनाः एनां सेवन्ते।

पुराणेषु कथ्यते यत् 'मदिरा'समुद्रमन्थनकाले समुद्रात् उद्धृता ,अस्याः हानिं विचार्य खलु देवैः एषा राक्षसेभ्यः प्रदत्ता। राक्षसाः अपि अल्पधियः आसन्,तैः अस्याः मादकताम् प्रसन्नतापूर्वकं सेविता। अतः अस्माकं समाजेऽपि ये राक्षस-धियाः मानवाः सन्ति ,ते खलु मदिरापानं कुर्वन्ति। मदिरापानेन जनस्य ज्ञानेन्द्रियाणि शिथिलानि जायन्ते। सः स्व-मानसिकं चेतनां त्यजति।

प्रायः जनैः कथ्यते यत् ते स्व कष्टानि दुःखानि वा विस्मरणाय अस्याः मदिरायाः सेवनं कुर्वन्ति,किन्तु अनया सेवनेन कोऽपि दुःखं न विस्मरति ,अपितु कंचित् कालं यावत् तस्य मस्तिकस्य तन्तवः ज्ञानेन्द्रियाणि वा शून्यानि भवन्ति ,अनेन तावत् कालं सः चिन्तने समर्थः न भवति। अनया सेवनेन कदापि आनन्दस्य प्राप्तिः नैव भवति।

वस्तुतः ईदृशानि मादकद्रव्यानि सर्वथा हानिकराणि , अतएव त्याज्यानि सन्ति। मदिरापानं एकं दूषणं अनेन दूषणेन कोऽपि जनः समाजः,राष्ट्रः वा उन्नतिपथम् आरोढुं न शक्यते। अस्माकं देशः एकः निर्धनःदेशः अस्ति। अत्र अशिक्षायाः साम्राज्यं वर्तते। अतः अशिक्षिताः जनाः प्रायः अस्याः मदिरायाः सेवनं कुर्वन्ति।

अस्याः सेवनेन न केवलं शरीरस्य अपितु धनस्य अपि हानिः भवति।अनेकशः जनाः स्वगृहे भोजनाय वस्तूनि न आनयन्ति ,स्वबालकान् पाठशालां न प्रेषयन्ति। स्त्रीणां कृते वस्त्राणि अन्यानि च आवश्यक -वस्तूनि न ददति ,किन्तु मदिरायाः सेवनं अवश्यमेव कुर्वन्ति। अनेन तेषां जनानां गृहेषु सदैव कलहो जायते।

ईदृशाः जनाः कदापि उन्नतिं न कुर्वन्ति। अनेन दुर्व्यसनेन ते समाजे हीनदृष्ट्या अवलोक्यन्ते। तेषां बालकाः खलु किमपि कर्तुं न शक्नुवन्ति। तेषां भविष्यम् अन्धकारमयं जायते। ते सदैव दीनाः हीनाः दृश्यन्ते।वस्तुतः अस्माकं सर्वेषामेव कर्तव्यम् अस्ति , यत् ये जनाः मदिरापानं कुर्वन्ति,तेषां दुर्व्यसनम् एतत् दूरीकरणाय प्रयत्नानि करणीयानि ,विषये ऽस्मिन् शिक्षायाः महत्त्वपूर्णं योगदानं वर्तते । अतः अस्माभिः शिक्षायाः प्रचारःप्रसारश्च

करणीय:। मदिरा-सेवनेन शरीरस्य सर्वाणि इन्द्रियाणि निष्क्रियाणि भवन्ति। शरीरं रोगग्रस्तं जायते। गृहस्य आर्थिकस्थिति: दयनीया भवति।

अनेन प्रकारेण मदिरापानस्य दोषान् कथयित्वा जनेभ्य: एतत् दुर्व्यसनं दूरीकरणीयम् अस्ति। अद्यत्वे दृश्यते यत् न केवलं पुरुषा: ,अपितु स्त्रिय: अपि मदिराया: सेवनं कुर्वन्ति। अनेन तासां सन्ततय: विकलाङ्गा: जायन्ते। अत: ताभि: कदापि मदिराया: सेवनं न करणीयम्।

अस्माकं सर्वकारै: अपि विषयेऽस्मिन् प्रयत्नानि विधेयानि। सर्वप्रथमं तु मदिराया: निर्माणस्य स्वीकृति: खलु न प्रदातव्या सर्वकारेण,किन्तु अतीव चिन्ताया: विषयोऽयं यत् राजस्वप्राप्त्यर्थं अस्माकं नेतार: मदिरानिर्माणे प्रतिबन्धं न युज्यन्ते। अनेकश: अवैधरूपेणापि मदिराया: निर्माणं जनै: क्रियते। तासु च अनेकानि हानिकराणि तत्त्वानि प्रयुज्यन्ते।

ईदृशी मदिरासेवनेन अस्माकं समाजे अनेकश: जना: मृत्युग्रस्ता: अपि भवन्ति। अनेन तेषां गृहानि एव विनश्यन्ति। अनेकबारं मादकपदार्थानां सेवनेन जना: विकलाङ्गा: भवन्ति। अत: यदि वयं स्वसमाजस्य राष्ट्रस्य हितं वाञ्छेम,तर्हि अवश्यमेव अस्य मदिरापानस्य दुर्व्यसनस्य विनाशाय प्रयत्नो विधेय:।

◆◆◆

दानस्य महिमा

'दा' धातुना ल्युट् प्रत्यये करणे 'दान' शब्दो निष्पद्यते। कस्यापि जनस्य स्वकीयस्य पदार्थस्य त्यागपूर्वकं अन्येभ्य: केभ्योऽपि प्राणिभ्य: प्रदानं दानमिति कथ्यते। अस्माकं भारतीये समाजे वस्तूनां त्यागपूर्वकं भोग:प्रशस्य:मन्यते। अत: ये मानवा: स्व-अर्जितस्य धनस्य उपयोगं परेषां हितकरणाय कुर्वन्ति,ते जना: दानिन: कथ्यन्ते। समाजे च तेषाम् अत्यादर: भवति।

अस्माकं देशे प्राचीनकालेऽपि बहव: दातार: अभवन्। तेषां नामानि अद्यापि इतिहासे प्रसिद्धानि सन्ति। महाराजबलि:,येन कपटवेशधारिणं विष्णुं प्रति स्व सर्वस्वं समर्प्य धवला कीर्तिकौमुदी अर्जिता। एवमेव महर्षि दधीचिना स्वानि अस्थीनि अपि देवकार्यार्थे प्रदाय दानीषु अग्रभाव: प्राप्त:।

किं बहुना महाराज्ञ: शिवे: नाम को न जानाति? येन स्व क्रोडागतस्य कपोतस्य कृते स्व मांसखण्डानि स्वयमेव स्व हस्तेनैव प्रदत्तानि। वस्तुत: तस्य शरणागतवत्सलता दानशीलता वा प्रशस्या। ईदृशानि बहूनि उदाहरणानि अस्माकं इतिहासग्रन्थेषु विकीर्णानि सन्ति। येषु दानशीलताया: चरमरूपं द्रष्टुं शक्यते।

अस्माकं प्राचीनेषु ग्रन्थेषु दानस्य महिमा वर्णित: दृश्यते। तैत्तिरीय संहितायां कथितम् ऋषिणा-

श्रद्धया देयम् ।

अश्रद्धया देयम् ।

श्रिया देयम् ।

हिया देयम् ।

भिया देयम् ।

संविदा देयम् ।

वस्तुत: यदि कस्यापि जनस्य समीपे किमपि अतिरिक्तं धनं वर्तते, तर्हि येन केनापि प्रकारेण तस्य दानम् अवश्यमेव कर्तव्यम्। यतोहि यदि जन: स्वस्य धनस्य नैव भोगं कुरुते ,न दानं ददाति ,तर्हि तस्य तृतीया गति: अर्थात् विनाश: एव संजायते । अनेनैव भर्तृहरिणा कथितम्-

दानं भोगो नाश: तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते ,तस्य तृतीया गतिर्भवति ।।

विषयेऽस्मिन् विदुषां मतम् इदम् अस्ति यत् अस्मिन् संसारे ये श्रेष्ठतमा: जना: सन्ति ते स्वस्य धनस्य उपयोगं पर हिताय कुर्वन्ति, किन्तु ये मध्यमा: ते स्वद्रव्यस्य उपयोगं केवलं स्वस्यकृते खलु विदधति ,अधमास्तु न स्वस्मै कुर्वन्ति न परस्मै, अपितु तेषां धनं तु नश्यति एव।

प्रसङ्गेऽस्मिन् 'नागानन्दम्' नाम नाटकस्य नायकस्य जीमूतवाहनस्यापि उदाहरणं उल्लेखनीयं वर्तते। अनेन दानिना शङ्खचूडनामकस्य सर्पस्य रक्षार्थं शरीरं खलु गरुडस्य भक्षणाय प्रदत्तम्। वस्तुत: दानस्य पराकाष्ठा एषा प्रतीयते। ईदृशा: जना: निश्चितमेव परमं धामं लभन्ते।

केचित् जना: विचारयन्ति यत् दानेन अस्माकं धनं न्यूनं भविष्यति । नैव एतत् उचितम्, अपितु सर्वै: प्राणिभि: पानेऽपि सरोवरस्य जलं न्यूनं न भवति ,तथैव दानेकृते सत्यपि द्रव्यं न क्षीयते। वस्तुत: भगवत्कृपया इदं निरन्तरं वर्धते एव। एतत् विचार्य खलु केनापि कथितम्-

अनुकूले विधौ देयं यत: पूरयिता हरि: ।
प्रतिकूले विधौ देयं यत: सर्वं हरिष्यति । ।

यदि जन: दानं करोति ,तर्हि सर्वाणि भूतानि तस्य अनुकूलतां यान्ति। दानस्य खलु: एष: महिमा वर्तते ,यत् शत्रव: अपि वैरभावं विस्मरन्ति। दानेन वै अपरिचिता: अपि परिचिता: भवन्ति, बन्धुत्वं प्राप्नुवन्ति। वस्तुत: दानस्य यावती: प्रशंसा क्रियेत् , ता वै न्यूना। अनेनैव केनापि कविना उक्तम्-

दानेन भूतानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानै-
र्दानं हि सर्वव्यसनानि हन्ति । ।

महाभारतेऽपि दानस्य महिमा अनेकश: कथित: दृश्यते। तत्र दानं महती क्रिया इति कथितम् वर्तते–''दानं हि महती क्रिया''तत्र यशसे दानं न देयम् नैव च भयात् दानं कर्तव्यम् ,इति उक्तम्। यतोहि ईदृशं दानं श्रेयष्करं न भवति–

''न दद्याद् यशसे दानं न भयान्नोपकारिणे''

मनुस्मृतिकारेण ब्रह्मदानस्य वैशिष्ट्यं कथितम्। विद्यादानं सर्वेषु दानेषु विशेष्यताम् आवहति। अत: मनुष्यै: सदैव प्रयत्नं विधेयम् अस्य दानस्य कृते –'सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते। 'एवमेव महाभारते कस्मिन् समये किं किं दानं प्रशस्यं भवति , इत्यस्मिन् विषये कथितम् –

देयमार्तस्य अयनं श्रितश्रान्तस्य चासनम्।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम्॥

अन्यं च उपनिषत्सु अपि दानस्य महिमा त्रिबारं दकारस्य प्रयोगेन तत्र प्रयुक्तायां एकस्यां कथायां दृश्यते। यै: जनै: स्व धनानि अन्येभ्य: दीनेभ्य: प्रदीयन्ते,तेषां न केवलं अस्मिन् लोके सर्वत्र प्रशंसा भवति,अपितु मृत्यो: पश्चात् अपि ते स्वर्गं गच्छन्ति एवं दानं खलु पारलौकिक–सुखसाधनं भवति । अत: अस्माभि: सदैव स्वशक्त्यानुसारं दानं करणीयम्। अनेनैव देवैरपि दानस्य प्रशंसा एवम् कृता वर्तते–

दानेन श्लाघ्यतां यान्ति पशुपाषाणपादपा:।
दानमेव गुण: श्लाघ्य: किमन्यैर्गुणकोटिभि:॥

◆◆◆

महाकवि:भारवि:

संस्कृतसाहित्याकाशे रविरिव भासमानं महाकविभारविं को न जानाति संस्कृतानुरागी जन:। वस्तुत: महाकविकालिदासाद् अनन्तरं एष: एव महाकवि: संस्कृतसाहित्यजगति अतीव लोकप्रिय: सञ्जात:। अनेन 'किरातार्जुनीयम्'नाम एकस्यैव महाकाव्यस्य रचना कृता। अस्या: रचनाया: वैशिष्ट्येन कविरयं विशेषख्यातिं प्राप्तवान्। अस्य कवे: प्रसिद्धि: संस्कृतसाहित्ये अर्थगौरवस्य वैशिष्ट्य–सम्पन्नेन प्रयोगेण जाता। अनेनैव कारणेन साहित्यानुरागीषु सूक्ति: एषा प्रसिद्धा जाता–

'भारवेरर्थगौरवम्'

असौ महाकवि: कदा कस्मिन् देशे च जन्म लेभे,इत्यस्मिन् विषये नैव आधिकारिक–रूपेण किमपि वक्तुं शक्यते ,तथापि समालोचकानां मतमेतत् यत्–एष: महाकवि: दाक्षिणात्य: आसीत्। ऐहोलशिलालेखानुसारेण अस्य महाकवे: काल: ईस्वीया षष्ठ शताब्दी सिद्धी भवति। कथ्यते यत् कवि: अयं पुलकेशि द्वितीयस्य अनुजस्य 'विष्णुवर्धन'नाम राज्ञ:

सभारत्नम् आसीत्।

अस्य महाकवेः जीवनस्य विषये लोकेषु किंवदन्ती एका प्रसिद्धा अस्ति यत् - बाल्यकालादेव एषः मेधावी कविः आसीत्,किन्तु अस्य पिता एनं अधिकाधिकं सुयोग्यं कर्तुं वाञ्छति स्म। अनेन सः सदैव अस्य प्रताडनं तिरस्कारं च करोति स्म। पितुः अनेन व्यवहारेण क्रुद्धः भारविः निश्चयम् अकरोत्,स्वपितुः वधस्य एव।

एकदा भारविः रहसि स्वपितुः वधार्थे प्रयत्नवान् आसीत्। तदैव तेन पितुः कथिता स्व-उन्नतिपरा हितैषिणी च वाणी श्रुता। पिता तस्य जननीं प्रति कथयति स्म यत्-'यद्यपि भारविः अयं अतीव बुद्धिमान् कुशलः कविः च अस्ति,किन्तु अस्य विद्वत्समाजे सुदृढा स्थितिः भवेत्,अनेनैव अहं नित्यं अस्य तर्जनां करोमि।'

एतत् वचनं श्रुत्वा भारविः खिन्नमनः सञ्जातः। सः अतीव पश्चात्तापेन संतप्तः अभवत्, यत् स्व पितरं प्रति मया ईदृशं निकृष्टं चिन्तितम्। अन्ते च तेन अस्य अपराधस्य प्रायश्चित्तं द्वादशवर्षं यावत् श्वसुरगृहे सेवां कृत्वा कृतम्। तत्रैव 'किरातार्जुनीयम्'नाम महाकाव्यस्य संरचनापि कृता।

महाकाव्येऽस्मिन् अष्टादशसर्गाः सन्ति। वीररसप्रधानेऽस्मिन् काव्ये कविना किरातवेशधारिणा शिवेन सह पाण्डुपुत्रस्य अर्जुनस्य संग्रामः मधुरया शैल्या वर्णितः अस्ति। अस्य महाकाव्यस्य कथा विश्वप्रसिद्धस्य महाकाव्यस्य महाभारतस्य वनपर्व-तः गृहीता वर्तते। महाकाव्यम् एतत् 'श्री'शब्देन आरब्धम्। प्रतिसर्गस्य अन्ते च 'लक्ष्मीः' शब्दस्य प्रयोगः दृश्यते।

अस्य महाकाव्यस्य अर्थगाम्भर्यं विचार्य प्रसिद्ध टीकाकारः मल्लिनाथः अतीव पुलकितः सञ्जातः। प्रसन्नेन अनेन किरातार्जुनीयम् उपमा नारिकेलफलेन सह प्रदत्ता-

नारिकेलफलसम्मितं वचो
भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं
सारमस्य रसिका यथेप्सितम्।।

अस्य श्लोकस्य अभिप्रायोऽयम् यत्-नारिकेलस्य फलं यथा बहि र्भागात् कठोरं भवति, तथैव काव्यम् एतद् अपि प्रथमदृष्ट्या क्लिष्टं प्रतीयते,किन्तु सूक्ष्मदृष्ट्या अध्ययनेन सहृदयाः अस्य रसास्वादं कर्तुं पार्यन्ते तथैव, यथा नारिकेलं परिश्रमेण विच्छिन्ने कृते तस्य माधुर्यं आस्वादयन्ति जनाः।

सूक्तिविषये अपि असौ महाकविः वैशिष्ट्यम् आवहति। अस्मिन् महाकाव्ये प्रयुक्ताः सूक्तयः सर्वेषां सहृदयानां हृदयान् आवर्जयन्ति। एताः सूक्तयः सर्वेषां कृते हितकारिण्यः, मधुराः,मार्गप्रदर्शकाः च सन्ति। तासाम् सूक्तीनाम् सङ्केतः अत्र क्रियते-'सहसा विदधीत न क्रियाम्','हितं मनोहारि च दुर्लभं वचः,''व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः,''सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।'

वस्तुतः महाकाव्येऽस्मिन् अनेन प्रयुक्ताः सूक्तयः जगत्प्रसिद्धाः सन्ति। अस्य महाकाव्यस्य अध्ययनेन महाकवेः अनेकशास्त्रनिष्णातत्त्वं आभाति। वस्तुतः महाकविना

वैदिकसाहित्यस्य, दर्शनधर्मशास्त्रस्य,कामशास्त्रस्य,राजनीते:,काव्य-अलङ्कार -नाट्यशास्त्रस्य च गम्भीरम् अध्ययनं कृतम्आसीत्। अस्य महाकाव्यस्य प्रथमे द्वितीये सर्गे च महाकवे: राजनीतिचातुर्यं प्रतीयते।

अयं महाकवि: स्वकृतिविषये स्वयमेव कथयति यत्-अस्मिन् काव्ये भावानां स्पष्टाभिव्यक्ति: वर्तते। अर्थगाम्भर्यादिगुणा: अत्र अनिवार्यत: स्वीकृता: सन्ति-

''स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित्। ।''

◆◆◆

महाकवि: भवभूति:

असारे खलु अस्मिन् संसारे नैव कोऽपि ईदृश: साहित्यानुरागी जन: येन नाटककारस्य महाकवे: भवभूते: नाम न श्रुतम्। यतोहि अस्य महाकवे: कीर्तिकौमुदी अद्यापि निखिलं जगत् स्वगरिम्णा धवलितं करोति। उत्तररामचरितम् नाम नाटकस्य रचयिता असौ कवि: करुणरसस्य परिपाकनिपुण: अस्ति।

यद्यपि अनेन नाटकत्र्याणां संरचना कृता विद्यते,किन्तु तेषु उत्तररामचरितम् नाम नाटकं सामाजिकेषु अत्यधिकं लोकप्रियं सञ्जातम्। स्वरचितेषु त्रिषु एव नाटकेषु अनेन कविना स्ववंशपरिचय: विस्तृतरूपेण प्रदत्त:।तदनुसारम्-एष: महाकवि: दक्षिणभारते पद्मपुर नाम स्थाने वसति स्म।अयम् कृष्णयजुर्वेदस्य तैत्तिरीयशाखाया: पाठिनां ब्राह्मणानां गृहे जन्म लेभे । श्रीभट्टगोपालस्य पौत्रस्य काश्यपगोत्रीयस्य अस्य पितु: नाम श्री नीलकण्ठ:आसीत्।अस्य माता जतुकर्णी सञ्जाता।अस्य बाल्यकालस्य नाम श्रीकण्ठ: अभवत्।

मालतीमाधव नाम नाटकस्य तृतीयाङ्कस्य पुष्पिकायां अस्य उम्बेकाचार्य: इति नाम उल्लिखितं वर्तते।अनेन नाम्ना अस्य पद-वाक्य प्रमाणज्ञताया: प्रतीति: भवति।महाकवि: अयम् भगवत: चन्द्रशेखरस्य महान् भक्त: आसीत् ,अस्य विरचितै: नाटकत्रयै: अपि ज्ञायते यत् एतेषाम् सर्वेषां नाटकानां अभिनय: अवन्तिनगर्यां श्रीमहाकालस्य सान्निध्ये अभवत्।

अनेन महाकविना मालतीमाधवम् -महावीरचरितम्-उत्तररामचरितम् इति त्रीणि नाटकानि विरचितानि। 'मालतीमाधव'नाम नाटके अनेन मालती नाम नायिकाया: माधवेन नाम नायकेन सह प्रणयकथा उपवर्णिता वर्तते। एवं शृंगाररस प्रधाना एषा कृति: विद्यते। केचित् विद्वांस: 'महावीरचरितम्' नाम नाटकं अस्य महाकवे: प्रथमां कृतिं मन्यन्ते। अस्मिन्

उत्तररामचरिते च श्रीरामस्य कथा गृहीता अस्ति। विदुषां मते 'उत्तररामचरितम्' कवेः अन्तिमा कृतिः अस्ति।

वस्तुतः महाकविः अयम् उत्तररामचरितस्य वस्तुविन्यासकौशलेन, रसप्रवणतया, काव्यकौशलेन च विश्वविख्यातः जातः। नाटकेऽस्मिन् कविना भावपक्षस्य अपि कलापक्षेण सह अद्भुतं सम्मिश्रणं कृतं वर्तते। अनेनैव विद्वत्सु सूक्तिरेषा प्रसिद्धा सञ्जाता–

''उत्तरे रामचरिते भवभूतिर्विशिष्यते''

अस्य नाटकस्य तृतीयाङ्कस्य अत्यधिकं महत्त्वपूर्णं स्थानमस्ति। यतोहि अङ्केऽस्मिन् करुणरसस्य परिपाकः सर्वातिशायि दृश्यते। अस्य अङ्कस्य अध्ययनेन पाषाणहृदयस्यापि जनस्य हृदयं विदीर्णं भवति। तस्य चेतांसि करुणार्द्रभावोद्रेकः पराकाष्ठां जायते, नेत्रे च अश्रुपूर्णे भवतः। सीतायाः वियोगे रामस्य दशा अतीव शोचनीया जाता। तस्य दयनीयां स्थितिं दृष्ट्वा तत्रस्थानां ग्रावाणामपि रोदनं भवति स्म–

''जनस्थाने शून्ये विकलकरणैरार्यचरितै–
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।''

वस्तुतः आदिकवि वाल्मीकिना स्वविरचिते 'रामायणम्' नाम महाकाव्ये करुणरसस्य सृष्टिः प्रसारिता आसीत्, तस्याः सृष्ट्याः चरमपरिणतिः विस्तारः वा अस्मिन् उत्तररामचरिते दृश्यते। अस्य नाटकस्य तृतीयेऽङ्के अनेन कविना ''करुणरसोऽपि नाटकस्य कस्यापि अङ्गतां वोढुं शक्यते, न केवलं शृङ्गारः, वीरः वा'' इति सिद्धान्तोऽपि सम्यक्तया प्रस्थापितः। यथा–

''एको रसः करुण एव निमित्त भेदात्
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुद् तरङ्ग मयान् विकारा–
नम्भो यथा सलिलमेव हि तत् समस्तम्।।''

अस्य सिद्धान्तस्य खलु पोषणाय महाकविना अस्य उत्तररामचरितस्य संरचना कृता, इति प्रतीयते। महाकविरयम् प्रकृतिप्रेमी अपि परिदृश्यते, किन्तु अस्य प्रकृतिः नैव कोमला मधुरा च, अपितु प्रकृत्याः कठोररूपस्य भयानकरूपस्य वा वर्णनं खलु अस्मै रोचते। अनेन प्रकृतिवर्णनं चित्रात्मकशैल्या कृतम्। यथा– क्रौञ्चपर्वतवर्णने अनेन सामासिकभाषया स्वकाव्यकुशलता प्रकृतिप्रीतिश्च प्रदर्शिता–

''गुञ्जतकुञ्जकुटीर कौशिक–
घटाघूत्कारवत्कीचक
स्तम्बाडम्बरमूकमौकुलिकुलः
कौञ्चाभिधोऽयं गिरि।''

वस्तुतः कविरयं संस्कृतकाव्यसंसारे गौरवः इव आभाति। केनापि प्रशंसकेन सम्यक् एव कथितम्–

''भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।''

◆◆◆

महाकवि: बाण:

महाकवि: बाण: स्वकीया-अप्रतिम-काव्यप्रतिभया सर्वान् अन्यान् श्रेष्ठतरान् कविवरान् अतिशेते। एतत् कथ्यते यत् पद्ये काव्यनिर्मिति: सरला भवति, गद्ये काव्यनिर्माणम् अतीव कठिनम्, किन्तु अनेन महाकविना गद्ये खलु काव्यसृजनं कृत्वा सर्वातिशायि प्रसिद्धि: अवाप्ता: साहित्यजगति।

अतीव प्रसन्नताया: विषयोऽयं यत् अनेन खलु स्वविरचिते 'हर्षचरित'नाम काव्ये कादम्बर्यां च आत्मकथाया: वंशपरिचयस्य खलु उल्लेख: कृत:। अत: विषयेऽस्मिन् शङ्काया: लेशोऽपि नैव प्रतीयते। तदनुसारम्-

अनेन स्ववंशस्य उत्पत्ति: पौराणिकी कथिता। अस्य वंशस्य प्रवर्तक: वत्स: आसीत्। वत्सस्य पुत्र: कुबेर: तस्य च पुत्र: 'पाशुपत' इति अभवत्। अस्य खलु पाशुपतस्य अर्थपति: सञ्जात:। तस्य एकादशपुत्रेषु एक: चित्रभानु: अपि आसीत्। तस्य एव चित्रभानो: अयं महाकवि: सन्ततिरूपेण जन्म लेभे।

एष: महाकवि: सम्राट्श्रीहर्षस्य सभापण्डित: अभवत्। बाल्यावस्थायां मातृपितृवियोगाद् असौ स्वच्छन्द: सञ्जात:, किन्तु अस्मिन् काले देशाटनं विदधता अनेन प्रभूता ज्ञानराशि: समर्जिता। अनेन महाकविना त्रीणि काव्यानि रचितानि तेषु 'हर्षचरितम्' 'कादम्बरी' इति द्वे गद्यमये काव्ये स्त:, 'चण्डीशतकम्' इति काव्यमेकं पद्यमयं वर्तते।

वस्तुत: महाकविबाणस्य यादृशं काव्यकौशलं गद्ये दृश्यते तादृशं नैव पद्यबन्धे काव्ये इति विदुषां मतम्। हर्षचरितम् नाम गद्यकाव्यं अस्य प्रथमा कृति: मन्यते। यतोहि अस्मिन् काव्ये रचना शैली तादृशी सुगठिता, समलङ्कृता न प्रतीयते यादृशी कादम्बर्याम्। कादम्बरी नाम काव्यं तु सहृदयानां हृदयान् बलपूर्वकं आकर्षयति प्रेयसी इव। अनेनैव प्रसिद्धिरेषा विद्वत्सु सञ्जाता-

''कादम्बरी रसज्ञानामाहारोऽपि न रोचते''

किन्तु विषयेऽस्मिन् तथ्यमिदम् उल्लेखनीयं यत्, अस्य महाकवे: ग्रन्थद्वयम् अपि पूर्णतां न प्राप्तम्। वस्तुत: कविना कादम्बर्या: रचना विरहवर्णनपर्यन्तम् एव कृता, अस्या: अवशिष्टा निर्मिति: अस्य योग्येन तनयेन पुलिन्दभट्टेन विहिता, इति विद्वत्सु प्रसिद्धिरस्ति। हर्षचरितं तु इदानीं यावद् अपि पूर्णतां न अगात्।

अनेन महाकविना गद्यकाव्ये स्व प्रतिभाया: चमत्कृति: प्रदर्शिता। अनया चमत्कृत्या खलु नैव साहित्य-जगति कोऽपि भाग: अस्पृष्ट: दृश्यते। अनेनैव विद्वत्सु उक्ति: एषा प्रचरिता-

''बाणोच्छिष्टं जगत् सर्वम्''

अस्य उक्ते: तात्पर्यमिदं वर्तते, यत् स्वकाव्ये महाकविबाणेन सर्वं वर्णितम्। नैकमपि क्षेत्रम् ईदृशम् अवशिष्टं परिलक्ष्यते, यदनेन त्यक्त:। अन्ये कवय: अनन्तरं बाणकाव्यादेव प्रेरणां प्राप्तवन्त:। न केवलम् एतत् अपितु अन्येन आलोचकेन तु एतावत् कथितं यत्-

महाकविबाणस्य रचनानन्तरं कस्यापि कवेः पदक्रमो युक्तियुक्ततां नार्हति, किन्तु चापल्यमेव तान् सर्वान् कविता निर्मितौ प्रेरयति–

हृदि लग्नेन बाणेन यन्मन्दोऽपि पदक्रमः।
भवेत्कवि कुरंगाणां चापलं तत्र कारणम्।।

एवमेव अन्येन समालोचकेन भणितम् यत्– वस्तुतः स्वयं सरस्वती एव बाणरूपेण अवतरिता, अधिकं प्रागल्भ्यम् अवाप्तुम्–

'जाता शिखण्डिनी प्राग्यथा
शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तुं
वाणी बाणो बभूव ह।।'

वस्तुतः काव्यजगति केचन कवयः शब्दालङ्काराणां संयोजने, अन्ये च अर्थालङ्काराणां प्रयोगे, इतरे च रसपरिपाककर्मणि कुशलाः निपुणाः वा दृश्यन्ते, किन्तु महाकविःअयम् काव्यकौशलेन तान् सर्वान् खलु अतिशेते। वस्तुतः असौ एकलः एव सम्पूर्णे काव्यकान्तारे स्वच्छन्दतया क्रीडां करोति। अनेनैव पञ्चाननत्वं प्राप्तं कविना, इति कथितं केनापि प्रशंसकेन –

'बाणस्तु पञ्चाननः'

अस्य महाकवेः काव्ये वाल्मीकेः माधुर्यं, व्यासस्य प्रासादिकता, कालिदासस्य कोमलत्वं, दण्डिनः पदलालित्यं, सुबन्धोश्च ओजत्वं परिलक्ष्यते। अनेन खलु अस्य यशः–शरीरम् अद्यापि विराजते।

◆◆◆

उपमा कालिदासस्य

कवितावनितायाःविलासस्वरूपोऽयं महाकविः कालिदासः वस्तुतः शारदायाः अवतारः एव प्रतीयते। विविधैः अलङ्कारैः समलङ्कृता अस्य कविता कामिनी सर्वान् काव्य रसिकान् हृदयान् आवर्जयति। यद्यपि अस्य महाकवेः काव्येषु बहूनि वैशिष्ट्यानि सन्ति, यथा–सहजस्वाभाविकं वर्णनं, प्रसादगुण–वैदर्भीरीतिसंयुक्ता रचना विच्छित्तिः, रसपरिपाकश्च किन्तु तासु सर्वासु विशेषतासु कालिदासस्य अलङ्कारचातुरी सहसैव रसरसिक–चेतसां चेतांसि चमत्करोति।

यद्यपि स्वकाव्ये अनेन सर्वेषामेव अलङ्काराणां प्रयोग: कृत: विद्यते ,तथापि उपमा-लङ्कारस्य योजनायां नैव अस्य साम्यं कुत्रचिदपि दृश्यते । वस्तुत: अलङ्कारस्य प्रयोगे अस्य नवनवोन्मेषिणी प्रतिभा विशेषतया प्रस्फुटिता भासिता च । अनेनैव वैशिष्ट्येन साहित्य-जगति एषा उक्ति: प्रसिद्धा सञ्जाता-

''उपमा कालिदासस्य''

वस्तुत: उपमाप्रयोगविषये अयं कविकुलगुरु: सर्वोत्कृष्टं भजते। अस्य उपमा: सरला: सरसा:स्वाभाविकाश्च सन्ति । लिङ्गसाम्यं च तस्य उपमानां विशेषं परमञ्च वैशिष्ट्यम् । अस्य कथनस्य पुष्ट्यर्थम् अत्र कानिचित् उदाहरणानि प्रस्तूयन्ते । रघुवंशमहाकाव्यस्य मङ्गलाचरणे कविना पार्वत्या: वाचा सह सादृश्यं स्थापितम् कीदृशं मनोरमं संस्थापितम् -

वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये ।
जगत: पितरौ वन्दे पार्वती परमेश्वरौ ।।

श्लोकोऽयं पूर्णोपमाया: मनभावनं उदाहरणं अस्ति । एवमेव रघुवंशमहाकाव्ये इन्दुमत्या: स्वयंवरावसरे पतिंवराया: इन्दुमत्या: उपमा महाकविना सञ्चारिणी दीपशिखया सह प्रदत्ता। अनया उपमया तु कविकुलशिरोमणिरेष: 'दीपशिखा कालिदास:'खलु संवृत्त:-

''सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे,
विवर्णभावं स स भूमिपाल: ।। ''

महाकविकालिदासस्य काव्येषु सूक्तय: मौक्तिकानि इव शोभन्ते । उपमाया: आश्रयेण अनेन कविना सूक्तीनां प्रयोग: अतीव रमणीय: कृत: । अस्य उपमा-गर्भितानां सूक्तीनां वैशिष्ट्यमेतत् यत् ता:उपदेशदायिन्य: चेतोहारिण्यश्च सन्ति । अनेनैव सहृदयानां ता:प्रति स्वाभाविकी प्रीति: परिलक्ष्यते। 'महाकवि बाण 'नाम काव्यरसिकेन तु तस्य सूक्तिषु मञ्जरीणां मादकतां अनुभूता,मुक्तहृदयेन च प्रशस्ता:-

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुर सान्द्रासु मञ्जरीष्विव जायते ।।

वस्तुत: महाकविकालिदासस्य विविधानां शास्त्राणां ज्ञानं महद् आसीत् । अनेन कारणेन महाकविना व्याकरणशास्त्रविषयका:,राजनीतिसम्बद्धा:,यज्ञविषयका:,दर्शन-ज्योतिषशास्त्रसम्बद्धा:उपमा: प्रयुक्ता: । एता: सर्वा: उपमा: तस्य तत्तत् विषयकं पाण्डित्यं प्रदर्शयन्ति । तेषाम् उपमानाम् अत्र दिङ्मात्रं प्रदर्शयते-

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के महर्षिकण्वस्य अस्यां उक्तौ कवे: यज्ञविषयकं ज्ञानं प्रतिभाति , उपमा च अतीव मनोरमा सञ्जाता-

''दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुति र्पतिता । ''

एवमेव दुर्वासस: शापस्य अन्ते शकुन्तला कथं दुष्यन्तेन सह मिलिता इति उपमा माध्यमेन ज्योतिष शास्त्रम् अवलम्ब्य कवि: एवं कथितवान्-

''उपरागान्ते शशिन: समुपगता रोहिणी योगम्''

कुमारसम्भवस्य पञ्चमे सर्गेऽपि एकं सुन्दरं उदारहणं उपमाया: वर्तते। स्वप्रियतमं शिवं समक्षं साक्षात्रूपेण दृष्ट्वा पार्वत्या: कीदृशी मन: स्थिति: सञ्जाता? एतत् उपमामाध्यमेन प्रदर्शितम् महाकविना-

तं वीक्ष्य वेपथुमती सरसाङ्ग यष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धु:
शैलाधिराजतनया च ययौ न तस्थौ।।

महाकविकालिदासस्य अभिज्ञानशाकुन्तलम् तु ईदृशीनां उपमानां आगारमेव विद्यते। यथा-ललनाललामभूतां शकुन्तलां वीक्ष्य दुष्यन्त: कथयति-

"अधर: किसलयराग: कोमल विटपानुकारिणौ बाहू।
कुसुमिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।"

पूर्णोपमाया: उदाहरणमिदं सहृदयानां सर्वेषां आह्लादकारकम्। अत्र महाकविना शकुन्तलाया: यौवनस्य उपमा कुसुमेन सह प्रदत्ता। एवमेव वल्कल-आच्छादितं तस्या: सौन्दर्यं वीक्ष्य दुष्यन्त: उपमामाध्यमेन स्वविचारान् प्रकटयति-

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशो र्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

अत: अन्ते संक्षेपेण एतद् एव वक्तुं शक्यते यत् ,महाकवि: अयम् उपमानां प्रयोगविषये सर्वातिशयतां भजते। प्राय: समस्ता: एव उपमा: अस्य मनीषिणां मनांसि चमत्कुर्वन्ति आह्लादयन्ति च। विषयेऽस्मिन् न केवलं संक्षिप्त: निबन्ध: तस्य वैशिष्ट्यं प्रतिपादयितुं क्षम: वर्तते। भारतीयकवीनां का कथा विश्ववाङ्मयेऽपि उपमालङ्कारस्य प्रयुंक्ति-विषये कोऽपि कवि: महाकवि: वा कालिदास इव न प्रतिभाति।

◆◆◆

भारवेरर्थगौरवम्

संस्कृतसाहित्याकाशे महाकविकालिदासस्य अनन्तरं महाकविभारवे: नाम महाकवीनां गणनाप्रसङ्गे आयाति। विश्वविख्यातेन अनेन महाकविना 'किरातार्जुनीयम्' नाम महाकाव्यस्य संरचना कृता , किन्तु अनया एव एष: कवि: सम्पूर्णसाहित्यजगति विशेषां ख्यातिं प्राप्तवान्। यथा महाकवि: कालिदास: उपमाया: कृते ख्यात: ,तथैव महाकविरसौ

अर्थगौरवाय विश्वविख्यात: वर्तते।

अस्य महाकवे: वैशिष्ट्यम् एतत् यत् एष: स्वकाव्ये स्वल्पै: शब्दै: एव अर्थबाहुल्यं अभिव्यनक्ति। अस्य कवे: प्रतिपदे प्रयुक्तेअर्थगौरवम् वस्तुत: श्लाघ्यं वर्तते। कानिचिद् उदाहरणानि कथनस्य अस्य पुष्ट्यर्थं अत्र प्रदीयन्ते। यथा जनेन कदापि किमपि कार्यं सहसा न करणीयम् ,अनेन महती हानि: जायते। अयं विस्तृत: अभिप्राय: संक्षेपेण कविना स्वकाव्ये निबद्ध: –

सहसा विदधीत न क्रियाम–
विवेक: परमापदां पदम्।
वृणुते हि विमृश्य कारिणं
गुणलुब्धा: स्वयमेव सम्पद: ।।

य: जन: संसारेऽस्मिन् सम्यक्रूपेण विचार्यकार्याणि करोति। स: एव ऐश्वर्यशाली भवति। अस्य महाकवे: 'किरातार्जुनीयम्'नाम महाकाव्यं वस्तुत: राजनीतिविषयस्य खलु। पदे–पदे अत्र कविना राजनीति ज्ञानं प्रदत्तं दृश्यते। प्रथमे सर्गे द्रौपद्या :माध्यमेन 'दुष्टेषु दुष्टतया एव वर्तितव्यम्'अस्य सिद्धान्तस्य प्रतिपादनं अर्थगौरवस्य उत्कृष्टम् उदाहरणं अस्ति–

वजन्ति ते मूढधिय: पराभवं
भवन्ति मायाविषु ये न मायिन:।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृत्ताङ्गान् निशिता इवेषव: ।।

वस्तुत: अतीव संक्षिप्ते ऽस्मिन् शब्दसमूहे कविना महान् अर्थ: नियोजित: वर्तते। एवमेव अस्मिन् एव सर्गे वनेचर: युधिष्ठिरं प्रति कथयति–

क्रियासु युक्तै र्नृप ! चारचक्षुषो
न वञ्चनीया: प्रभवोऽनुजीविभि:।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वच: ।।

ईदृशं वचनं तु सुदुर्लभमेव यत् हितकारी अपि स्यात् श्रवणे च कर्णप्रियं अपि भवेत्। अत: यदपि अहं भवतां समक्षे अग्रे कथयिष्यामि ,तस्मिन् निश्चितरूपेण कर्णप्रियता न स्यात्। अत: भवद्भि: क्षन्तव्य: मम एष: अपराध:। वनेचरमाध्यमेन अर्थगाम्भीर्यं अत्र निष्पादितं कविना।

महाकवि: भारवि: स्वस्य काव्यस्य विषये स्वयमेव कथयति। यत् अस्मिन् काव्ये पदे–पदे स्फुटता विराजते। सर्वत्र अर्थगौरवं स्वीकृतं मया। अत्र प्रयुक्तानि पदानि सर्वाणि स्व–स्व अर्थाभिव्यक्तिं कर्तुं समर्थानि सन्ति। तेषु अर्थाभिव्यक्ति विषये सामर्थ्याभावो नास्ति–

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्। ।

वस्तुत: यं अभिप्रायं अभिव्यक्त्यर्थं अन्ये कवय: बहूनि पद्यानि विरचन्ति ,तमेव महाकवि: अयम् अतिसंक्षिप्तेन एकस्मिन् एव पद्ये केषुचित् एव पदेषु नियोजयति। एतत् एव कवे: अर्थगौरवम् अति प्रशस्यं विद्यते । वैशिष्ट्यमेतत् तस्य पात्राणां संवादेषु,सूक्तिषु, अलङ्कार-योजनासु वा विशेषेण उपलभ्यते-द्रौपद्या कथितानि वचनानि युधिष्ठिरं प्रति ,कीदृशं विस्तृतं अर्थं आवहन्ति।

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्त नारीसमया दुराधय: । ।

एका स्त्री यदि राजनीतिज्ञं जनं किमपि कथयति निर्दिशति वा तत् तस्य जनस्य अधिक्षेप: एव। एवमेव स्व हृदि स्थितां पीडां वेदनां वा केन प्रकारेण संक्षेपेणापि विस्तृतेन अर्थगौरवमाध्यमेन अत्र अभिव्यक्ति: प्रदत्ता कविना ,इति दर्शनीयमेव । अत: संक्षेपेण एतदेव वक्तुं शक्नुम: यत् महाकविभारवि: विरचितं किरातार्जुनीयम् नाम महाकाव्यं वस्तुत: प्रतिपदरूपेण भाषासौष्ठवस्व भावगाम्भीर्यस्य,अर्थगौरवस्य च पताका इव आभाति। अनेनैव महाकवि: अयम् सम्पूर्णे संस्कृतजगति उत्कृष्टं स्थानं भजते। अस्य प्रशंसायां सूक्ति: एषा शोभना खलु भणिता केनापि विदुषा -

''भारवेर्थगौरवम् ''

◆◆◆

दण्डिन: पदलालित्यम्

केनापि समालोचकेन यदा 'उपमा कालिदासस्य 'इति श्लोकस्य संरचना कृता। तदा अस्य तृतीये चरणे पदलालित्याय महाकविदण्डिन: प्रशंसा कृता विद्यते । कविकुललालामभूत: महाकविरयं संस्कृतसाहित्यजगति सुविख्यातोऽस्ति । अनेन 'दशकुमारचरितम्'नाम गद्यमयं काव्यं,'काव्यादर्श:'अलङ्कारमय: ग्रन्थ:,छन्दशास्त्रस्य कृति: छन्दोविचित्तिश चेति विरचिता। अस्य महाकवे: कृतीनां विषये राजशेखरेण कथितं स्वग्रन्थे-

''त्रयोऽग्नय स्त्रयो देवा-
स्त्रयो वेदास्त्रयो गुणा: ।
त्रयो दण्डिप्रबन्धाश्च
त्रिषु लोकेषु विश्रुता: । । ''

केचिद् विद्वांस: 'अवन्तिसुन्दरी कथा 'नामकं गद्यकाव्यम् अपि अस्य खलु अन्यां रचनां मन्यन्ते। दशकुमारचरिते नाम्नि काव्ये दशसंख्यकानां राजकुमाराणां कथा निबद्धा वर्तते । कथायाम् अस्यां विविधेषु देशेषु भ्रमतानां तेषां कुमाराणां पराक्रमस्य यशोगाथा

लालित्यपूर्णया शैल्या उल्लिखिता अस्ति।

काव्यस्य अस्य भाषा अतीव सरला, सरसा, सुमधुरा, श्लिष्टा च वर्तते। राजहंसस्य सुषमावर्णनप्रसङ्गे भाषा सौष्ठवं अतीवाकर्षकं सञ्जातम्। दशकुमारचरितम् त्रिभागैः सुगुम्फितम् अस्ति, पूर्वपीठिका, चरितम्, उत्तरपीठिका चेति, अष्टोच्छ्वासेषु निबद्धम् एतत् गद्यकाव्यम्, वस्तुतः महाकवेः कीर्तिपताका इव राजते। यद्यपि केचिद् समालोचकाः अस्य काव्यस्य भाषया केवलं मध्यभागं एव दण्डिना कृतं मन्यन्ते।

यदा कोऽपि पाठकः एतत् काव्यं पठति, सः खलु अत्र सरसताम् अनुभवति। तस्य जीवनस्य अनुभूतयः नेत्रयोः समक्षे अवतरन् इव प्रतिभान्ति। राजहंसस्य तस्य पत्न्याः वसुमत्याः वर्णनप्रसङ्गे एतत् माधुर्यं पदलालित्यं च दर्शनीयम्–

''राजहंसो नाम धनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्य निरवद्यरूपो भूपो बभूव। तस्य वसुमती नाम सुमती लीलावती कुलशेखरमणी रमणी बभूव।''

अस्मिन् काव्ये कविना भावानुसारिणी शब्दयोजना कृता। प्रकृतिचित्रणं अस्य महाकवेः विशेषं मनोज्ञं वर्तते, वस्तुविन्यासश्च वैचित्र्यपूर्णः अस्ति। वर्णनेषु अत्र सर्वत्र स्वाभाविकता परिलक्ष्यते। पदे–पदे च शब्दयोजनासौष्ठवं रसाभिव्यक्तिश्च अनुभूयते। महाकवेः पदलालित्यस्य एकं उदाहरणं प्रायः सर्वैः समालोचकैः प्रस्तूयते। वर्णनेऽस्मिन् राजकुमाराः विजयार्थं प्रस्थानं कुर्वन्ति –

''कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः।''

अस्य महाकवेः रुचिः प्रश्लिष्टेषु पदेषु न दृश्यते सुबन्धु इव। नैव च अस्य कृतौ महाकवि–बाणवत् समासानां दीर्घासरणि प्रयुक्ता विद्यते, किन्तु अस्य काव्ये प्रसादगुणयुक्तानि ललितललितानि पदानि एव दरीदृश्यन्ते। भावगर्भितानि एतानि वस्तुतः सर्वेभ्यः एव रसिकहृदयेभ्यः रोचन्ते। अनेनैव अस्य कवेः काव्यम् अवलोक्य केनापि कविना कथितम्–

'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः'

अनेन कविना दशकुमारचरितस्य सप्तमे उच्छ्वासे एका विच्छित्ति अद्भुता प्रदर्शिता। यत् सम्पूर्णेऽस्मिन् उच्छ्वासे एकस्यापि औष्ठ्यवर्णस्य प्रयोगः न कृतः। पुनरपि नैव आयास साध्या शैलीयं प्रयुक्ता कविना। भाषायां च तदैव स्वाभाविकता प्रवाहः च दृश्यते यथा अन्यत्र अस्ति। यथा–

''आर्य, कदर्यस्यास्य कदर्थनान्न कदाचिन्निद्रायाति नेत्रे।''सखे! सैषा सज्जनाचरिता सरणिः, यदणीयसि कारणेऽनणीयानादरः संदृश्यते।''

अनेन प्रकारेण स्पष्टं भवति यत् दण्डिनः कृतिरियं लालित्यपदवैशिष्ट्यसंयुक्ता। अस्याः प्रत्येकं वर्णनं माधुर्यान्वितेन रमणीयतां आवहति इति। अस्य महाकवेः सुस्पष्टां कोमल–कान्तपदान्वितां पदावलीम् अवलोक्य केनापि प्रशंसकेन भणितम् एतत्–

''कविरवि रुदितो दण्डी भूमण्डले मण्डलीभूतः सततम्।
यस्य हि कविता सार्थं सुधासदृशं बुधा भजन्ते।।''

◆◆◆

माघे सन्ति त्रयो गुणाः

संस्कृतसाहित्यजगति महाकविः माघस्य नाम को न जानाति संस्कृतानुरागी? महा-कविरेषः दत्तकस्य पुत्रः आसीत्। दत्तकः सुप्रभदेवस्य पुत्रः सञ्जातः ,यः राजा वर्मलातस्य सर्वाधिकारी अभवत्। अस्य महाकवेः कालः सप्तमशताब्द्याः उत्तरार्द्धः मन्यते। अनेन महाकविना एकस्यैव 'शिशुपालवधम्' नाम महाकाव्यस्य संरचना कृता। विंशति सर्गेषु निबद्धे अस्मिन् महाकाव्ये कथा महाभारतात् गृहीता दृश्यते।

अस्य महाकवेः संस्कृतसाहित्ये कीदृशं स्थानं इति जिज्ञासाकृते अस्माकं समक्षे बहवः प्रशस्तयः आगच्छन्ति , यासु अस्य कवेः वैशिष्ट्यं निगदितं वर्तते। यथा-'मेघे माघे गतं वयः', 'माघेनेव च माघेन कम्पः कस्य न जायते 'एवं 'तावद् भा भारवे र्भाति यावन्माघस्य नोदयः।'

वस्तुतः माघस्य प्रतिभायाः इदं वैशिष्ट्यं यत् अनेन एकस्मिन्नेव खलु महाकाव्ये उपमा-अर्थगौरव-पदलालित्यानां च त्र्याणामेव प्रयोगः पूर्णतया साफल्येन कृतः वर्तते। अनेनैव केनापि समालोचकेन अन्येषां कवीनां प्रशस्तिं कुर्वन् माघविषये कथितम्-

उपमाकालिदासस्य
भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं
माघे सन्ति त्रयो गुणाः।।

अस्य श्लोकस्य तात्पर्यमिदं यत् यद्यपि महाकविकालिदासः उपमायाः कृते प्रसिद्धो-ऽस्ति , भारविः च अर्थगौरवाय स्मर्यते , दण्डी च तस्य पदलालित्यकृते साहित्ये समाजे वा लब्धप्रतिष्ठः वर्तते,किन्तु महाकविः माघस्तु कविकुलावतंसस्वरूपः ईदृशः यत् अस्य महाकाव्ये एतेषां सर्वेषां गुणगणानां सङ्गमः एकस्मिन्नेव स्थाने दृश्यते। अस्मिन् सङ्गमे च स्नात्वा सर्वे सहृदयाः सामाजिकाः स्वं कृत्कृत्यं पावनं च मन्यन्ते।

माघे त्रयो गुणाः कथं सन्ति ,इत्यस्मिन् विषये कानिचित् उदाहरणानि प्रस्तूयन्ते। महाकवि- माघेन उपमानां प्रयोगः अतीव आकर्षकः हृदयाह्लादकारकः च कृतः विद्यते। 'शिशुपालवधम्' नाम महाकाव्यस्य प्रथमे सर्गे पीताम्बरधारी श्रीकृष्णस्य उपमा वडवानलज्वालाव्याप्तेन समुद्रेन सह कृता कीदृशी मनोहारिणी।

कीदृशी इयं मनोहारिणी उपमा-

स तप्तकार्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः।
विविद्युते वाडवजातवेदसः
शिखाभिराश्लिष्ट इवाम्भसां निधिः।।

एवमेव रैवतकपर्वतवर्णनप्रसङ्गे महाकविना प्रयुक्ता या उपमा, तया तु कविरयं 'घण्टा-माघः' एव संवृत्तः। वस्तुतः प्रातःकालस्य वर्णनम् इदं चतुर्थे सर्गे रैवतकपर्वतस्य एकस्मिन् पक्षे औषधिपतिः चन्द्रमा अस्तं याति, अन्यस्मिन् पक्षे च भास्वान् भास्करः उदेति। एषा स्थितिः उपमा माध्यमेन कविना अनेन प्रकारेण वर्णिता-

उदयति विततोर्ध्वरश्मिरज्जा-
वहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टाद्वय-
परिवारित वारणेन्द्र लीलाम्।।

इयं उपमा संस्कृतवाङ्मये विद्वद्भिः अतीव प्रशंसिता। अतः उपमायाः प्रयोगे महाकविरयं अग्रणी वर्तते। यथा उपमा प्रयोगे कुशलः, तथैव अर्थगौरवविषयेऽपि अस्य प्रतिभा नवनवोन्मेषिणी विद्यते। कानिचित् उदाहरणानि कथनस्य अस्य पुष्ट्यर्थं दातव्यानि। शिशुपालवधस्य प्रथमे सर्गे कथयति महाकविः-

सतीव योषित प्रकृतिश्च निश्चला,
पुमांसमभ्येति भवान्तरेष्वपि।।

अल्पेषु शब्देषु अत्र अर्थविस्तरः परिदृश्यते। अस्य अभिप्रायोऽयं यत् यथा साध्वी स्त्री जन्मान्तरेषु अपि स्व एव पतिं वृणोति तथैव मानवस्वभावः जन्मजन्मान्तरेऽपि तमेवा-नुगच्छति। एतत् प्रतीयते यत् महाकविना स्वस्मिन् महाकाव्ये अर्थगौरवं प्रयत्नेन प्रयुक्तम्। शाश्वतसत्यस्य उद्घाटनाय अनेन अर्थगौरवसमन्वितानां सूक्तीनां प्रयोगः कृतः। स्वाभिमानसंरक्षणस्य शिक्षा अतीव सुन्दररूपेण प्रदत्ता महाकविना-

पादाहतं यदुत्थाय मूर्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः।।

एवं अन्यानि बहूनि उदाहरणानि अत्र सन्ति, येषु अल्पशब्दैरेव कविना गूढातिगूढ-भावना प्रकटिता। काश्चन सूक्तयः सङ्केतेनैव अत्र प्रस्तूयन्ते-

''सर्वः स्वार्थं समीहते '' ,
''सदाभिमानैकधना हि मानिनः'',
''समयः एव करोति बलाबलम्'' ,
''हतविधिलसितानां हा विचित्रो विपाकः''

एवमेव महाकविमाघस्य महाकाव्ये पदलालित्यमपि दृश्यते। पदविन्यासं माघस्य शैल्याः कौशलम्। अनेनैव पदे-पदे अत्र पद लालित्यं दरीदृश्यते। वसन्तर्तौ माधुर्यमयैः वर्णैः कविना सङ्गीतमयं वातावरणं प्रस्तुतम्-

नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनो भरैः।।

उदाहरणमेतद् आलंकारिकैः विद्वद्भिः यमकालंकारस्य कृते प्रदत्तम्, ईदृशी एव

सङ्गीतात्मकता अनेकेषु स्थलेषु अवलोक्यते यथा-

मधुरया मधुबोधितमाधवी
मधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मद -
ध्वनिभृता निभृताक्षरमुज्जगे।।

अनेन पर्यालोचनेन सुस्पष्टमेतत् महाकविमाघस्य काव्ये उपमाया: प्रयोग: अर्थगौरवस्य वैशिष्ट्यं,पदलालित्यस्य चारुता, एतेषां त्र्याणामेव समन्वय: कुशलतया दृश्यते। अत: केनापि कविना सम्यक् एव उक्तम्-

''माघे सन्ति त्रयो गुणा:''

◆◆◆

नैषधं विद्वदौषधम्

संस्कृतकाव्यमंदाकिनी सर्वेषां सहृदयानां हृदयानि पवित्रीकरोति। सौन्दर्यमयी माधुर्यगुणोपेता एषा सर्वेषां संस्कृतानुरागिणां मनांसि आवर्जयति। बहुभि: कविभि: स्वकाव्य -निर्मितिं कृत्वा अस्या: प्रवाहे योगदानं कृतम्। अस्माकं भारतभू: प्रसविनी खलु महाकविनाम् , अत्र कालिदास-माघ-भारवि-दण्डी-सदृशा: महाकवय: समुद्भूता: । तेषु महाकविषु 'नैषधचरितम्'नाम महाकाव्यस्य रचयिता श्रीहर्ष: ,हर्ष: खलु सहृदयरसिकानाम्। संस्कृत साहित्याकाशे कविरयं दिनमणिरिव विराजते।

अस्य पितु: नाम श्रीहरि: , मातु: नाम मामल्लदेवी आसीत्। कन्नौजदेशस्य राजा जयन्तचन्द्र: अस्य आश्रयदाता। सम्राट्जयचन्द्र: श्रीहर्षस्य अत्यादर: करोति स्म। एकस्मिन् स्थले स्वयमेव कविना निगदितम्-

''ताम्बूलद्वयं च लभते य: कान्यकुब्जेश्वरात्''

नैषधचरितम् क्लिष्टशैल्या: निदर्शनम् अस्ति। अत्र कविना अनेकश: प्रबलपाण्डित्य-प्रदर्शनं कृतम्। कथ्यते यत् कविरयं ''चिन्तामणि ''मन्त्रस्य सिद्ध: आसीत्। अस्य महाकवे: दशकृतय: उपलभ्यन्ते,किन्तु तासु सर्वासु नैषधचरितम् महनीयताम् आवहति।

द्वाविंशति सर्गात्मकेऽस्मिन् महाकाव्ये महाकविना नल-दमयन्त्ययो: प्रणयात् परिणय-पर्यन्तं साङ्गोपाङ्गं वर्णनं कृतम्। वस्तुत: महाकाव्यम् एतत् अस्य गुणगौरवस्य विद्वत्तायाश्च आकर: खलु वर्तते। 'वृहत्त्रयी' इति ग्रन्थेषु सर्वोत्कृष्टं रत्नम् एतत् मन्यते

विद्वद्भि: । कथ्यते यत् –

'नैषधचरितम्' न केवलं महाकाव्यम् एव , अपितु विविध–विषयाणां विश्वकोश: खलु वर्तते । साङ्गवदेस्य, सर्वेषां दर्शनानां, पुराणानां, मन्त्रतन्त्राणां, सामुद्रिकशास्त्रस्य, शिल्पकला–तुरग–रत्नादि–ज्ञानस्य , अधिकं किं सर्वेषां एतेषां शास्त्ररत्नाणाम् आकर: इव काव्यमेतद् वर्तते। स्वयं कविना एव कथितम् अस्य काव्यस्य विषये–

ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञं मन्यमना हठेन पठिती माऽस्मिन् खल: खेलतु ।
श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थि: समासादय–
त्वेतत् काव्यरसोर्मिमज्जनसुखं व्यासङ्गनं सज्जन: । ।

अस्मिन् महाकाव्ये महाकवे: पाण्डित्यप्रदर्शनं, वक्रोक्ति वैशारद्यं, शास्त्रीयसिद्धान्त–प्रदर्शनं, वाग्वैदग्ध्यं अद्वितीयमेव प्रतिभाति। अनेन कवियं पूर्ववर्तिन: सहवर्तिन: अनुवर्तिनश्च सर्वान् कविवरान् अतिशेते। श्लेषदृष्ट्या त्रयोदशसर्गीया पञ्चनली वस्तुत: अद्भुतां विच्छित्तिम् आवहति। अत्र एकैकस्यापि श्लोकस्य पञ्चार्थता दर्शनीया अस्ति।

आचार्यपाणिनि विरचिते सूत्रे 'अपवर्गे तृतीया'इति महाकविना हर्षेण कीदृशं व्यङ्ग्यं कृतम् इति अवलोकनीयम्–

''उभयी प्रकृति: कामे सञ्जेदिति मुनेर्मन: ।
अपवर्गे तृतीयेति भणत: पाणिनेरपि । । ''

यद्यपि अस्य महाकवे: सर्वेषु खलु दर्शनेषु वैशिष्ट्यम् प्रतीयते , तथापि अद्वैतमते अस्य मन: विशेषरूपेण रमते। न्यायसिद्धान्ते वर्णितं मोक्षं कवि: कटाक्षयति–

मुक्तये य: शिलात्वाय, शास्त्रमूचे सचेतसाम् ।
गोतमं तमवेक्ष्यैव यथा वित्थ तथैव स: । ।

किन्तु कविना अद्वैतमतम् एव प्रशस्यं श्लाघ्यं सर्वमान्यं च कथितम्–

श्रद्धां दधे निषधराड् विमतौ मताना–
मद्वैततत्त्व इव सत्यतरेऽपि लोक: । ।

एतद् अतिरिक्तं पदलालित्यं नैषधचरितस्य प्रमुखं वैशिष्टयम् वर्तते। अत्र प्रत्येके पदे सौष्ठवं, सौकुमार्यं, लालित्यं च अवलोक्यते। यथा–प्रथमे सर्गे नलसौन्दर्यवर्णने प्रयुक्तोऽयं श्लोक: उदाहरणरूपेण दर्शनीय:–

अधारि पद्मेषु तदङ्घ्रिघृणा घृणा
क्व तच्छयच्छायलवेऽपि पल्लवे ।
तदास्य दास्येऽपि गतोऽधिकारितां
न शारद: पार्विकशर्वरीश्वर: ॥

करुणरसस्य प्रवाहेऽपि भाषासौष्ठवस्य प्रसादगुणस्य च सुन्दर: प्रयोग: अस्मिन् महाकाव्ये कविना अनेकश: कृत: ।प्रथमे सर्गे हंसविलापे करुणरसस्य परिपाक: अतीव मनोहर: सञ्जात:–

मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्
अहो विधे त्वां करुणा रुणद्धि नो ।।

वस्तुत: महाकविहर्षकाले कविताव्याजेन स्वबुद्धिचातुर्यप्रदर्शनमेव कवीनां सर्वेषां लक्ष्यं आसीत्। महाकविमाघकाव्ये ,भारविकाव्ये च अस्या: प्रवृत्त्या उत्कर्ष: अवलोक्यते। पाण्डित्यख्यापनस्य सा खलु प्रवृत्ति: श्रीहर्षविरचिते अस्मिन् नैषधेकाव्ये अपि दृश्यते पराकाष्ठास्वरूपेण। अनेनैव समालोचकै: हर्षप्रशस्त्यां एषा उक्ति: समीचीना एव कथिता–

तावद् भा भारवेर्भाति यावन्माघस्य नोदय: ।
उदिते नैषधे काव्ये क्व माघ: क्व च भारवि: ।।

अत: अस्य काव्यस्य वैशिष्ट्यमवलोक्य एतत् एव वक्तुं शक्यते यत् जटिलता परिपूर्णेऽपि काव्येऽस्मिन् विद्वांस: असीमानन्दम् अनुभवन्ति । तान् सर्वान् काव्यमेतद् औषधमिव सुखीकरोति।

◆◆◆

बाणोच्छिष्टं जगत् सर्वम्

संस्कृतसाहित्ये यथा पद्यकाव्यानां प्राचुर्यं अस्ति तथैव गद्यकाव्यानां न्यूनता अवलोक्यते , अस्य कारणमिदं प्रतीयते यत् कोऽपि कवि: स्वल्पेनैव प्रयासेन छन्दोबद्धरचनां कर्तुं प्रभवति,केचिद् श्लोकान् विरच्य खलु सहृदयसमाजे कवित्वं भजते । सर्वेषां प्रशंसापात्रत्वमपि च भजते। यतोहि पद्यस्य एकस्मिन्नपि अंशविशेषे चमत्कृति: नियोजनात् समस्तमपि पद्यं सहृदयसमाजस्यकृते चमत्कारी संजायते,किन्तु गद्यकाव्ये ईदृशी स्थिति: नास्ति । तत्र तु सर्वाङ्गीणरूपेण चमत्काराभावे प्रशंसां न आप्नोति कश्चित् कवि: । अनेनैव गद्ये लेखनं क्लिष्टतरं मन्यते विद्वद्भि: । तदैव कथ्यते समालोचकै:–

''गद्य कवीनां निकषं वदन्ति ''

अनेनैव कारणेन संस्कृतगद्यलेखकानां कवीनां वा संख्या न्यूनातिन्यूना वर्तते । तेषु गद्यलेखकेषु महाकवि: बाणभट्टस्तु अग्रणी एव स्थितोऽस्ति । अस्य महाकवे: कादम्बरी हर्षचरितञ्च द्वे प्रख्याते काव्ये स्त: । साक्षात् सरस्वत्या: पुत्रोऽयं तत्कालीन महाराज्ञ: श्रीहर्षवर्धनस्य विद्वत्सभायां सम्मानीय: कवि: आसीत् ।

अयं महाकवि: सर्वेषु शास्त्रेषु कुशल:,व्यवहारविद:,प्रकृत्या: सूक्ष्मेक्षक: सिद्धवाक् च अभवत्। अस्य काव्यनिर्मितिं वीक्ष्य सहृदया: पुलकिता: भवन्ति। अस्य काव्ये चरित्रचित्रण चारुता, वर्णनाशक्तिश्च विलक्षणा अवलोक्यते। अनेनैव विद्वद्भि: सहसैव उक्तम्-

'बाणस्तु पञ्चानन:'

वस्तुत: संस्कृतगद्यसाहित्यजगति महाकवे: अस्य स्थानं अतिमहत्त्वपूर्णं विद्यते। प्रतिभा च अस्य अद्वितीया आसीत्। ईदृश: न कोऽपि विषय: दृश्यतेऽस्मिन् संसारे ,यस्य वर्णनं महाकवे: बाणस्य कृतिषु न सञ्जातम्। असौ महाकवि: शब्दानां कुशलप्रयोजक: अभवत्। यतोहि अस्य भाषायां पूर्णाधिकारो समवलोक्यते। अस्य शब्दकोशोऽपि अतीव समृद्ध:प्रतीयते। यत: एकस्यैव शब्दस्य अनेके समानार्थका: शब्दा: अनेन सहजेनैव प्रयुक्ता: वर्तन्ते ।

ईदृशी काव्यविच्छित्ति: नैव अन्यत्र दृश्यते .यादृशी बाणभट्टस्य काव्ये। अत्र एकस्मिन् अपि स्थले शब्दानां पुनरावृत्ति न उपलभ्यते। अनेन स्व सूक्ष्मेक्षिकया संसारस्य प्रत्येकं क्षेत्रं उपवर्णितम्। अनेनैव अस्य प्रशंसकै: कथितं यत्-

''बाणोच्छिष्टं जगत् सर्वम्''

मन्यते विद्वद्भि : यत् अस्य प्रथमा कृति: हर्षचरितम् नाम काव्यम् अस्ति। वस्तुत: ऐतिहासिक-काव्यमेतत् ,यत: अस्मिन् स्वाश्रयदातामहाराजहर्षवर्धनस्य जीवनचरितम् विस्तृतेन वर्णितम् अस्ति। तेनैव सह अत्र तत्कालीन सामाजिक-धार्मिक-राजनीतिक-आर्थिकदशाया: अपि चित्रणं कृतं विद्यते।

महाकविबाणेन स्वयमेव हर्षचरिते नाम काव्ये कविकौशलत्वं अनेन प्रकारेण परिभाषितम्-

''नवोऽर्थो जातिरग्राम्या
श्लेषोऽक्लिष्ट: स्फुटो रस:।
विकटाक्षरबन्धश्च
कृत्स्नमेकत्र दुर्लभम्।।''

अनेन कविना एता सर्वा एव विशेषता स्वकाव्ये नियोजिता। एतेन कविना प्रयुक्तानि मधुराणि श्लेषमयानि गद्यखण्डानि वस्तुत: सहृदयानां चेतांसि आवर्जयन्ति। यद्यपि अत्र सर्वेषां एव अलङ्काराणां प्रयोग: कृत: तथापि श्लिष्टोपमा च अस्मै सर्वाधिकेन रोचते। अस्य महाकवे: काव्यं समष्टिरूपेण निरीक्ष्य एतदेव वक्तुं पारयाम: ,यत् अनेन कविना स्वकीयकाव्ये उक्तपरिभाषाया: सर्वथा अनुपालनमेव कृतम्।

कविकोविदमूर्धन्येन अनेन कविना नैव किमपि क्षेत्रं परित्यक्तं स्ववर्णना कौशलेन। अस्य काव्ये सर्वेषां रसानां परिपाक: सम्यक्तया दृश्यते। पुनरपि शृंगारे च असौ विशेषज्ञतां विभर्ति। न केवलम् एष: वनितावर्णने निपुणताम् आवहति ,अपितु शूद्रकादीनां पुरुषाणाम् अपि वर्णनं अतीव मनोहारिकृतम् अनेन। एवमेव तपोवनानां तत्रस्थां मृगादीनामपि हृदयानुरञ्जिनी छटा अस्य महाकवे: काव्ये समवलोक्यते । वस्तुत: कविरसौ शब्दै: सह खेलति इव आभाति स्व काव्ये।

अनेनैव समालोचकै: सर्वथा समीचीनमेव कथितं यत् ''बाणोच्छिष्टं जगत् सर्वम्'' यत: अनन्तरं ईदृशं किमपि वर्णनम् अवशिष्टं नासीत् , यत् बाणेन न कृतम्। तदनन्तरन्तु कविभि: प्राय: पिष्टपेषणमेव कृतम् , अर्थात् पूर्ववर्णितमेव पुन: वर्णितम्।

◆◆◆

कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्

संस्कृतसाहित्याकाशे भास्वरभानुवत् भासमानस्य महाकविकालिदासस्य नाम को न जानाति संस्कृताध्येता सामान्योऽपि जन:। अनेन महाकविना सप्तसंख्यकानां कृतीनां संरचना कृता,किंतु तासु सर्वासु अभिज्ञानशाकुन्तलम् परमं वैशिष्ट्यं भजते। अनेन नाटकेन कालिदासस्य कीर्ति: न केवलं भारते , अपितु विदेशेषु अपि प्रसारिता। वस्तुत: एतदेव नाटकं येन वैदेशिका: विद्वांस: अपि संस्कृतं प्रति आकृष्टा: सञ्जाता:।

काव्यविधासु सर्वासु 'नाटकम्'सर्वोत्कृष्टत्वेन मन्यते। यत: साक्षात्रूपेण दर्शनस्य सुविधा अत्र वर्तते। कस्यापि घटनाया: कथाया: साक्षात्दर्शनं श्रव्याद् रम्यं भवति,इति सर्व-विदितमेव । संस्कृतसाहित्ये बहूनि नाटकानि निबद्धानि, तेषु सर्वेषु अभिज्ञाशाकुन्तलम् निर्विवादेन उत्कृष्टं मन्यते विद्वद्भि:। अनेनैव केनापि प्रशंसकेन कथितम् यत्-

काव्येषु नाटकं रम्यं
तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्क: -
तत्र श्लोकचतुष्टयम्।।

वस्तुत: नाटकमेतत् सर्वात्मना सफलं रम्यं च वर्तते। अस्मिन् नाटके वर्णननैपुण्यं, घटनासंयोजनं,प्रसादागुणसम्पन्ना वैदर्भीरीति:,चरित्रचित्रणस्य चातुर्यं,प्रकृतिवर्णनं, स्वाभाविकं चित्रणं, अलंकारयोजना,रसपरिपाकश्च सर्वमेव सर्वातिशायित्वेन विराजते।

यादृशी काव्यविच्छित्ति: अत्र दृश्यते तादृशी नैव महाकवीनाम् अन्येषु काव्येषु नाटकेषु वा। अत्र कविना ''व्यञ्जना''नाम काव्यशक्तिं शब्दशक्तिं वाश्रित्य अल्पेषु खलु शब्देषु बहूक्तम् , चित्रात्मकता अस्य महाकवे: शैल्या: विशेषता ,उपमा माध्यमेन स: सहृदयस्य पुरत: कमपि वस्तु साक्षात् रूपेणैव प्रस्तौति। यथा शकुन्तलाया: लावण्यं कीदृशम्,इत्यस्मिन् विषये कवि: कथयति-

अधर: किसलयराग: कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥

एवमेव अस्य नाटकस्य नायिका शकुन्तला कस्य जनस्य हृदयं न आवर्जयति, वल्कलेन आवृत्तापि ,यतोहि नैव सामान्यमेतत् सौन्दर्यम्-

सरसिजमनुविद्धं शैवलेनापि रम्यं ,
मलिनमपि हिमांशो र्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।

यद्यपि नाटकम् एतत् सप्ताङ्केषु विभक्तं तथापि अस्य नाटकस्य चतुर्थोऽङ्कः मध्यमणिरिव राजते। अत्र खलु नाटकस्य महत्त्वपूर्णाः घटनाः नियोजिताः कविना। यथा- दुर्वाससः शापः,नाटकस्य नायिकायाः पतिगृहप्रस्थानम् , कण्वस्य पुत्रीवियोग-वैक्लव्यम् ,तस्य पुत्रीं शकुन्तलां प्रति उपदेशः , दुष्यन्तं प्रति संदेशः,प्रकृत्याः नायिकां प्रति अनुरागः, अनसूया-प्रियंवदयोः विषादः,मृगपक्षिलतानां व्याकुलता । एतत् सर्वं स्वनाट्यकौशलेन कविना अङ्के अस्मिन् नियोजितम्।

वस्तुतः महाकवेः नाट्यशिल्पपटुत्वं अस्मिन् चतुर्थेऽङ्के एव समाविष्टं दृश्यते। यद्यपि समस्तेऽपि अभिज्ञानशाकुन्तले सर्वाणि पद्यानि गेयानि,भावपूर्णानि सन्ति,किन्तु चतुर्थेऽङ्केऽस्मिन् निबद्धाः प्रायः सर्वे एव श्लोकाःविशेषतां आवहन्ति,तेषु अपि चत्वारः श्लोकाः विशेषेण प्रशंसिता विद्वद्भिः । यतोहि तेषु उपदेशात्मकता,भावगाम्भीर्यस्य च पराकाष्ठा अवलोक्यते।

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।

तेषु श्लोकेषु प्रथमे वीतरागिणः कण्वस्य विकलतां निभाल्य कविना गृहस्थीनां कन्यायाः गमनवेलायां कीदृशी अवस्था जायते ,इत्यस्य सुन्दरं सूक्ष्मं मनोरमं हृदयस्पर्शी च वर्णनं कृतं विद्यते। एवमेव द्वितीयश्लोके शकुन्तलायै प्रदत्तःउपदेशः सर्वाभिःकन्याभिः स्वीकरणीयः, अनेन तासां गृहस्थजीवनं सुखी भविष्यति , शाश्वत् संदेशोऽयं वस्तुतः वर्तते।

तृतीये श्लोके शकुन्तलायाः प्रकृतिं प्रति भावना प्रकटिता। वस्तुतः शकुन्तला अत्र प्रकृति कन्या एव अस्ति। तस्याः प्रकृत्या सह अतीव प्रेम वर्तते। एतत् दृश्यमपि अतीव मनोरमं हृदयस्पर्शी च । अत्र प्रकृत्याः मानवेन सह चिरसम्बन्धः प्रदर्शितः कविना। अन्तिमे चतुर्थे श्लोके कुलपतिगरिमानुरूपः दुष्यन्तं प्रति संदेशः नियोजितः , अत्र वस्तुतः पितुः भावना प्रदर्शिता,कन्यायाः कृते चात्र शुभाशंसनमपि विद्यते।

एवं एते चत्वारः श्लोकाः मनोविज्ञानस्य,जीवनदर्शनस्य,नैतिकतायाश्च साक्षात् निदर्शनं एव। न केवलं एते एव श्लोकाः , वस्तुतः अत्र तु यदपि प्रस्तुतं कविना तत् सर्वं हृदयावर्जकं मनोह्लादकारकम् अस्ति । अनेनैव समालोचकैः कथ्यते यत् 'कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्'इति ।

◆◆◆

एको रस: करुण एव

मानवस्य जीवनं विविधभावानां एकमभूतपूर्वं मिश्रणं वर्तते। कदाचिदस्मिन् राग: कदाचिद् विराग:,कदाचित् हर्ष: कदाचिच्च शोको भवति। अन्यस्मिन् काले आकर्षणमपरस्मिन् च विकर्षणं दृश्यते। एतस्मादेव हेतो: काव्यशास्त्रकारै: सूक्ष्मेक्षिकया विचार्येव मानवहृदये स्थायिभावानां स्थिति: निर्धारिता दृश्यते। इत्थं विविधानुभूतिचित्रे जीविते विशेषेण प्रभविष्णुर्भाव: शोको यस्य परिपाक: एवालङ्कारिकै: करुणरसत्वेन मत:।

रसोऽयं विषयभेदादिवानुभावमुखेन अभिव्यक्तिप्रकारभेदात् बहुविधतामाकलयति, आलम्बनभेदादाश्रयभेदाच्च वैचित्र्यमावहन्नयं नैकधा द्रावयति हृदयम्,पितृपुत्र्योर्भ्रातृभगिन्या र्मातुपुत्रयोर्दम्पत्यो: सख्योर्वा परस्परवियोगकृतोऽयमेकोऽपि नैकविवर्तान् गच्छन्, प्राणिनां मनांस्याकुलयति। अनेनैव कारणेन महाकविभवभूतिना स्वकीय उत्तररामचरिते नाटके कथितम्-

एको रस: करुण एव निमित्तभेदाद्
भिन्न: पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान्विकारा -
नम्भो यथा सलिलमेव हि तत् समस्तम्।।

यथा सलिलमेकमावर्तबुद्बुदतरङ्गादि भेदात् विविधं प्रतिभाति, तथैव करुण एव रसो वैविध्यं भजते। स एव करुणप्रधाने विप्रलम्भशृङ्गारेऽपि परिणमति। तस्य तीव्रताभिव्यक्ति: ललितासु कलासु भवति। सा तीव्रतयैव च सहृदयानां हृदयावर्जिका भवति।

संस्कृत-साहित्यस्य सूक्ष्मदृष्ट्यावलोकनात् काव्यस्य मूलमपि अयमेव रस इति निश्चीयते। ध्वनिकृतापीदमेव समर्थितम्-

काव्यस्यात्मा स एवार्थ
स्तथा चादिकवे: पुरा।
क्रौञ्चद्वन्द्वियोगोत्थ:
शोक: श्लोकत्वमागत:।।

स्थितिरेषा न केवलं संस्कृतसाहित्येऽपितु अन्यास्वपि भाषासु परिलक्ष्यते। महाकवि-कालिदासेनापि स्वकृतिषु यथावसरं करुणरसस्य परिपाक: कृत:। अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्केऽस्य रसस्य चरमा परिणति: लक्ष्यते-

उद्गलितदर्भकवला मृग्य:
परित्यक्तनर्तना मयूरा:।
अपसृतपाण्डुपत्रा
मुञ्चन्यश्रूणीव लता:।।

किन्तु करुणरसनिस्यन्दे महाकवि: भवभूतिरितरान् कवीश्वर ान् अतिशेते। अनेनैव कारणेन कथ्यते समीक्षकै:-

''कारुण्यं भवभूतिरेव तनुते''इति

अस्य महाकवे: करुणरसोद्रेकमालोक्यैवार्यासप्तशत्यामपि श्री गोवर्धनाचार्येण कथितम्-

भवभूते: सम्बन्धात् भूधरभूतेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा। ।

संस्कृत-साहित्ये यानि कान्यपि नाटकानि महाकाव्यानि वा निर्मितानि तेषु प्राय: शृङ्गार:,वीरो वाङ्गिरसत्वेन गृहीत:। क्वचित् क्वचिच्च वीरस्य रौद्ररसस्य वा पुष्टये करुणोऽपि लक्ष्यते। स्वयमेव भवभूतिनापि महावीरचरिते मालतीमाधवे च क्रमश: वीरस्य शृङ्गारस्य च परिपाक: प्रदर्शित:,किन्तु उत्तररामचरिते तु कारुण्यमेवाङ्गित्वेन स्वीकृतम्। अस्य रसस्य अभिव्यञ्जने अनुपम एवासौ। भवभूतिना मानवस्य अन्त:स्थितेर्यावत् सूक्ष्मं मनोवैज्ञानिकञ्च विश्लेषणं कृतं तावत् तु अन्यत्र सुदुर्लभमेवास्ति।

कतिपयानि उदाहरणान्यत्र प्रस्तूयन्ते अस्य मतस्य परिपोषणे।

उत्तररामचरिते प्रथमेऽङ्के चित्रदर्शनेन स्मृतिपथं समागच्छतामतीतानां वृत्तान्तानां स्मरणेन करुणरसस्य प्रवाहो दर्शनाय-

जीवत्सु तातपादेषु नूतने दारसंग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा: गता:। ।

स्वबाल्यकालस्य पितृ-मातृस्नेहासिक्तान् दिवसान् स्मारं स्मारं कस्य जनस्य नावर्जयति चेत:।

एवमस्मिन्नेवाङ्के सीताहरणे सति जनस्थाने मर्यादापुरुषोत्तमस्यापि रामस्य दशा कीदृशी आसीत्,सा कारुण्यपूर्णा स्थिति: चित्रदर्शने लक्ष्मणेनेत्थं वर्ण्यते-

अथेदं रक्षोभि: कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति तथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्। ।

सीताया: वियोगे रामस्येदृशी दयनीया स्थिति: आसीत् , यत् ग्रावापि रोदिति स्म वज्रस्यापि हृदयं विदीर्यते स्म।

पुन: तृतीयांकस्यारम्भे सीतावियोगजन्यदीर्घशोकसन्तापेन रामस्य दशाऽनिर्वचनीया सञ्जाता। यदा साधारणो जनो विपत्तिग्रस्तो भवति , स तु मुक्तकण्ठेन रोदितुं प्रभवति,किन्तु राज्ञो रामस्य तु ईदृशी दशा नासीत् ,स तु उच्चस्वरेण रोदितुमपि नाशक्नोत्। राज्ञोऽन्यथाचरणे लोक मर्यादाया: भङ्ग : जायते ,लोकसमक्षे तु राज्ञाऽऽदर्शरूपेण भवितव्य: , किन्तु लोह-धातुरपि तापातिशयेन द्रवति,का नाम कथा मानवस्य। अतएव प्रत्यक्षरूपेण नैव राम : उच्चस्वरेण रोदिति परं कारुण्यं तस्यान्त:करणमाकुलयति घनां च व्यथां तनयति-

अनिर्भिन्नो गंभीरत्वाद् अन्तर्गूढघनव्यथः ।
पुटपाक-प्रतीकाशो रामस्य करुणो रसः । ।

उत्तररामचरिते सीतायाः परित्यागादनन्तरं तृतीयांके तु करुणरसः परां काष्ठां गत इति प्रतीयते। स्वयं रामएव स्वकीयां शोकव्यथापूर्णां दशां एव प्रकटयति-

दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते,
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनुमन्तर्दाहः करोति न भस्मसात् ।
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् । ।

कियत् सुन्दरं सजीवञ्च चित्रणमस्ति। हृदयं प्रस्फुटति, किन्तु द्विधा न भवति, कायः विकलयति, किन्तु प्राणान् न त्यजति, अन्तर्वेदना ज्वलयति किन्तु भस्मसात् न करोति, विधिः मर्मस्थलेषु प्रहरति, किन्तु जीवन-सूत्रं न छिनत्ति। रामस्येदृशीं दशां दृष्ट्वा कस्य सहृदयस्य हृदयं न गच्छति विकलताम्। एवञ्च-

हा हा देवि ! स्फुटति हृदयं ध्वंसते देहबन्धः ,
शून्यं मन्ये जगदविरल ज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवाऽन्तरात्मा,
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि । ।

श्लोकेऽस्मिन् रामस्यधीरतायाः बन्धस्त्रुटितः , सहजधीरतां विमुच्यऽऽक्रोशति सोऽपि।

एते श्लोकाः तु दिङ्मात्रेणैवात्रोदाहृताः। अस्मिन् नाटके तु स्थले-स्थले करुणरसस्य प्रभावोत्पादिकाऽभिव्यञ्जना वर्तते । वस्तुतः भवभूतिः करुणरसस्य आचार्य एव । करुणप्राधान्यवादिना भवभूतिनोदात्तस्य दाम्पत्यप्रेम्णः अभिव्यञ्जनं करुणरसस्य एव अङ्गत्वेन कृतम्। करुणरसनिष्यन्दे अमुं महाकविं अन्यःकोऽपि महाकविः न अतिशेते।

◆◆◆

कालिदासस्य नारीभावना

कालिदासस्य समस्तेऽपि साहित्ये-नाटकेषु, महाकाव्ययोः, गीतिकाव्ये मेघदूते च ,सर्वत्रैव नारीणां चित्रणं मनोहरमाकर्षकं सम्मानप्रदं च वर्तते । यद्यपि तस्य स्थितिः द्विसहस्त्रवर्ष-पूर्वमेवासीत्, तथापि स्त्रीणामादरविषये स आधुनिक इव प्रतीयते। वैदिककाले स्त्रीणां सामाजिकी स्थितिःपुरुषापेक्षया हीना आसीत्। ऋग्वेदे तु बहूनां सूक्तानां ऋषिकाः स्त्रियः सन्ति।

'अस्ति मातृशक्ति: परमा पूज्या' ।

एषैव भावना तस्मिन् काले परिदृश्यते । परन्तु वैदिकोत्तरे स्मृतिकाले स्त्रीणां सामाजिकी स्थिति: पूर्वापेक्षया हीना अवलोक्यते । परिवारे समाजे च ता: पुरुषसमाना-धिकारसम्पन्ना न दृश्यन्ते । आदरस्तु वर्तते,परन्तु सम्पत्त्यधिकार: शून्य एव । सम्पत्त्याधि-कारशून्यत्वात् तासां परिवारेषु समादरभावनापि हीनायते । यद्यपि यज्ञादिकार्येषु गृहपतिना सह तस्य पत्न्या: स्थितिरपि मान्या एव ।

भारतीये साहित्ये धर्मशास्त्राणां (धर्मसूत्राणां स्मृतिनाञ्च)महत्त्वपूर्णं स्थानं वर्तते । तत्र च मनो: स्थानम्,तस्य रचनाया: स्मृतेश्च (मनुस्मृते:)निर्विवादरूपेण अन्यासामपेक्षया महत्त्वयुक्तममन्यत पूर्वकाले । अद्यापि धर्मशास्त्र चर्चासु मनुस्मृतेरेव श्लोका उद्धृयन्ते प्रमाण-रूपेण । मनुस्मृतौ अपि स्त्रीणां स्थितिर्नास्ति तथा समादरवहा यथा वैदिके काले वर्तते स्म ।

यद्यपि महाकवे: कालिदासात् प्रागेव बहूनां धर्मसूत्राणां स्मृतीनाञ्च रचना समपद्यत । तत्र निरूपितै:विषयै: सह स सुपरिचित एव आसीत् । तेन तासां सम्यगध्ययनमपि कृतमित्यपि स्पष्टमेव , तथापि तस्य रचनासु यथा नारीणां चित्रणं विद्यते तेन ज्ञायते,स महाकविस्ता: प्रति अतीव समादरयुक्त: आसीत् । तस्य नाटकेषु प्राय: पुरुषपात्राणामपेक्षया नारीपात्राणामेव बाहुल्यमवलोक्यते , पर न्तु नास्त्येष सार्वत्रिको नियम: । पुरुषपात्राणामपि नास्ति नितरांन्यूनता । किन्तु नारीपात्राणां चित्रणं कुर्वता तेन महाकविना स्वकीये प्रत्येक-स्मिन्नपि ग्रन्थे तासामादर्शमयमेव चित्रणं विहितम् ।

यद्यपि अतिशयेन लोकहृद्यमाकर्षकं सुन्दरं रूपं मन: हरत्येव । परन्तु आपाततो जनितमाकर्षणं प्रायेण वासना संवलितमेव भवति । यच्च वासनोद्दीपकं भवति,तत् सर्वथैव कल्याणकारकम् ,मङ्गलमयं श्रेय: सम्पादकं स्थायि च न भवति । स्थायित्वेन विना च गृहस्थ जीवनस्य साफल्यमेव न भवितुमर्हति । यथा हुताशने तप्तं सुवर्णं दोषरहितं, निर्मलं, देदीप्यमानञ्च जायते , तथैव स्त्रीणां पुरुषाणाञ्च वासनासंयुक्तं प्रेमापि तपसा साधनया च विरहाग्नौ परिक्षिप्तं सन् वासनया रहितं सुतरां कल्याणकरं,पुरुषार्थं-चतुष्ट्यावाप्ति-करं ,लोकपरिवार-हिताधायकञ्च सञ्जायते । महाकवे: कालिदासस्य नाटकेषु काव्येषु चेयमेव भावना सर्वत्रान्तर्निहिता परिदृश्यते । स्मृतिषु नारीणां यादृशी स्थितिर्वर्णिता,तासां कृते यानि यानि विधानानि कृतानि ,दायदक्षेत्रेऽपि तासां कृते यादृशी व्यवस्था विहिता तथा कालिदास: सम्यक्तया परिचितं आसीत् ।

मन्वादि स्मृतीनां तेन न क्वापि प्रत्याख्यानं कृतम् ,तस्य विचारे स्मृतय: श्रुत्यानुसारिण्य आसन् , अत एव रघुवंशे 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत् 'इत्युक्तं तेन । तथापि तस्य मते पुरातनमिति कृत्वा सर्वं ग्राह्यं न भवति , न चापि नवीनमिति कृत्वा सर्वं नवमग्राह्यमेव भवति । तथा चोक्तं तेन स्वकीये प्रथमे नाटके मालविकाग्निमित्रे-

पुराणमित्येव न साधु सर्वं,
न चापि सर्वं नवमित्यवद्यम् ।
सन्त: परीक्ष्यान्यतरद् भजन्ते,
मूढ: पर: प्रत्ययनेय बुद्धि: ।।

सदसद्विवेचिनी या बुद्धि: तयैव मानवो विवेकी भवति। यश्च मानवो विवेकं कर्तुमक्षम: स तु सर्वांशे मानव एव नास्ति। विवेकहीनो मानवस्तु पशुतुल्य एव भवति।

समस्तेऽपि कालिदासस्य साहित्ये पुरातने नवीने वा पक्षपातरहितां सदसद्विवेचिनी बुद्धिमाश्रित्यभारतीय-संस्कृते: यादृशं परिमार्जितमुभयलोकश्रेयस्करं स्वरूपं तेनोपनिबद्धं वस्तुतस्तद्रूपमनघं मङ्गलकरञ्च विद्यते। भारतीय संस्कृते: समुज्ज्वलस्य रूपस्य महान् व्याख्याता खलु कालिदास:। अत एव स राष्ट्रकवि: कथ्यते। पुरुषेषु नारीषु च यदुदात्तं श्रेयस्करं तदेव ग्राह्यं भवति। पुरुषाणां नारी: प्रति, नारीणां न पुरुषान् प्रति यत् प्रेमवासनारहितं भवति ,तदेव कल्याणकरं भवति।

कालिदासस्य साहित्ये अस्यैव प्रेम्ण: परिमार्जितं रूपं सर्वत्र समुपलभ्यते। अभिज्ञान-शाकुन्तले नाटके शकुन्तला -दुष्यन्तयोरुभयोरेव चित्रणं दर्शकानां कृते पाठकानाञ्चकृते सर्वथा आकर्षकं हृद्यञ्च। परन्तु तत्रापि शकुन्तलाया: चित्रणन्तु दर्शकस्य पाठकस्य च मनसि एकामनश्वरां रेखामाकलयति। प्रयत्नेनापि तदविस्मरणीयं खलु भवति। सर्वथा अस्ति तल्लोकोत्तरं किमपि अनिर्वचीनयम्। एवमेव कुमारसम्भवे पार्वत्या: तपसा निर्मलं यद्रुपं चित्रितं तत्तु साक्षात् शिवेनापि वन्दनीयं जायते। अतएव तेनोक्तं तत्रैव-

अद्य प्रभृत्यनवताङ्गि तवास्मि दास:।
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।।

नारीणां यद्रूपं साधनाभिस्तपोभिश्च परिमार्जितं भवति , तदेव श्रद्धेयं वन्दनीयञ्च भवति। तत्रैव नारीणां सौन्दर्यस्य सार्थकता। अत: एतादृशमेव नारीरूपं कालिदासाय रोचते। यतो हि भवति लोकमङ्गलकारि इदमेव रूपम्।

◆◆◆

आधुनिके युगे संस्कृतस्य महत्त्वम्

वैज्ञानिके खलु अस्मिन् युगे यथा वैज्ञानिकविषयाणां महत्त्वं वर्तते तथा संस्कृतभाषाया: महत्त्वं नास्ति,किन्तु अनेकदृष्ट्या अस्या: भाषाया: महती उपयोगिता विद्यते। अस्माकं सम्पूर्णं संस्कृतसाहित्यं यं उपदेशं ददाति , तेन न केवलं भारतीयानाम् , अपितु सम्पूर्णमानवतायाश्च हितं भवितुम् अर्हति। संस्कृतसाहित्ये सम्पूर्णे निबद्धां संस्कृतिम् अनुस्मृत्यैव वस्तुत: विश्वकल्याणं सम्भवम्।

अद्य कम्प्यूटरस्य युगोऽस्ति। युगेऽस्मिन्' कम्प्यूटर 'नाम यन्त्रस्य महत्त्वं सर्वविदितमेव। वैज्ञानिकैश्च अस्य कम्प्यूटरस्य कृते संस्कृतभाषाया: आनुकूल्यं सर्वथा

उद्घोषितं डिण्डिमघोषेण। अत: भविष्ये कम्प्यूटरयन्त्रं चालनाय अस्या: भाषाया: महत्त्वं नि:संदिग्धम् इति मन्यते।

अन्यञ्च अद्य प्रतियोगितात्मक: युग:। सर्वेषु क्षेत्रेषु प्रतियोगिताया: आयोजनं भवत्येव। अस्मिन् प्रतिस्पर्धात्मके युगे ते खलु छात्रा: उन्नतिं कुर्वन्ति, ते वै स्व लक्ष्यं ग्रहन्ति, ये श्रेष्ठतमान्यङ्कानि लभन्ते। अत: सर्वश्रेष्ठानाम् अङ्कानां महत्त्वं स्पष्टमेव। संस्कृतं एका वैज्ञानिकी भाषा, अत: विज्ञानवत् अस्याम् अपि अङ्कानि उपलभ्यन्ते छात्रै:। अत: भाषाया: अस्या: आधुनिके युगे सार्थकत्वं असंदिग्धम्।

संस्कृत -अध्येतार: छात्रा: योग्यताक्रमे अग्रणी भवन्ति। अनया एव विशेषतया सर्वासु उच्चप्रशासनिकसेवाया: परीक्षासु अपि अस्या: भाषाया: उपयोगिता सुस्पष्टा खलु। एकस्मिन् सर्वेक्षणे अखिलभारतीयस्तरे आयोजितासु प्रतियोगितासु संस्कृतविषयम् अधिगृह्य सफलानां छात्राणां प्रतिशतं त्रिंशदाद् अपि अधिकं वर्तते।

अस्मिन् वैज्ञानिके युगे भौतिकसुखसाधनेषु मानव: अतीव दु:खी सञ्जात:। अद्य वैज्ञानिका: स्व बुद्धिबलेन विविधान् आविष्कारान् विधाय अखिलं विश्वं विमुग्धमिव कुर्वन्ति। तेषु व्योमयानं, जलयानं, रेलयानं, दूरदर्शनं, विद्युत् द्वारा परिचालितानि अनेकानि यन्त्राणि सन्ति। न केवलं एतावत्, मानवस्तु विज्ञानबलेन चन्द्रलोकं मंगलग्रहादिकमपि गतवान्।

किन्तु विज्ञानसम्पन्नस्य अपि जनस्य अन्येषु क्षेत्रेषु ज्ञानशून्यतामेव प्रतीयते। इदानींतने काले जनेषु प्रेम्ण:, सौहार्द्रभावस्य, औदार्यस्य, बन्धुत्वस्य, दयाभावस्य च अभाव: एव अनुभूयते। एक: जन: अन्यं जनं न सहते। किमधिकं एक: भ्राता अन्यं भ्रातरमेव सुखी द्रष्टुं न पारयति।

एक: देश: अन्यं देशं प्रति असहिष्णु: सञ्जात:। ते परस्परं क्रुध्यन्ति, ईर्ष्यन्ति, द्वह्यन्ति, असूयन्ति च। अनेनैव सर्वत्र विवाद:, कलह:, वर्णसंघर्ष:, जातिभेद: खलु दृश्यते। अत: विश्वस्य सम्पूर्णस्य वातावरणं युद्धमयं प्रतिक्षणं प्रतीयते।

अस्याम् अवस्थायां संस्कृतमेव मानवताया: पाठं पाठयितुं सक्षमा अनुभूयते। संस्कृत- साहित्यग्रन्थेषु संगुम्फिता शिक्षा रागद्वेषमलिनं, दुर्भावनाग्रस्तं जनमानसं परिशुद्धी कर्तुं सक्षमा वर्तते।

एषा भाषा सर्वेषां धर्माणां धात्री इव, सार्वभौमिकानां विधानानां विधात्री खलु, विश्वबन्धुत्वादिभावानाम् उद्भावयित्री ननु, लोककल्याणसम्पादने एषा अग्रणी, विश्वशान्ति-संस्थापने समर्था खलु दृश्यते। अत: वर्तमाने वैज्ञानिके युगे अस्या: भाषाया: महत्त्वम् अतीव वर्तते, नैव विषयेऽस्मिन् संशयलेशोऽपि विद्यते।

◆◆◆

लेखक परिचय



जन्म—२० मार्च १९५५ (दौराला, जिला—मेरठ, उ०प्र०)।

शिक्षा—बी. ए. (आनर्स) महाविद्यालय स्वर्णपदक, एम.ए. (संस्कृत) मेरठ वि.वि.,डी. फिल् (वेद) गढवाल वि०वि० साहित्य पुराणेतिहासाचार्य (विश्वविद्यालय स्वर्णपदक) सम्पूर्णानन्द संस्कृत वि० वि०, बनारस। डि. लिट् उपाधि हेतु राजस्थान वि०वि० में शोधरत।

अध्यापन (क) वैदिक एवं पौराणिक शोध संस्थान नैमिषारण्य, सीतापुर उ०प्र० १९८०-८१।

(ख) गुरुकुल कांगडी वि० वि० हरिद्वार उ० प्र० १९८२-१९८५।

(ग) राजस्थान लोक सेवा आयोग द्वारा चयनोपरान्त कॉलेज शिक्षा राजस्थान में राज्य सरकार की सेवा में कार्यरत १९८६ से निरन्तर।

प्रकाशन–ऋग्वेद के निपात, ''स्मारिका'' गुरुकुल महाविद्यालय, ज्वालापुर, हरिद्वार, मार्कण्डेय महापुराण (हिन्दी अनुवाद) मधुकणिका (संस्कृत श्लोकसंग्रह), नीतिशतकम्, स्नातक संस्कृत सरला (राजस्थान संस्कृत अकादमी द्वारा पुरस्कृत), सुगम संस्कृत व्याकरण, ऋक्सूक्त चन्द्रिका, बृहदारण्यकोपनिषद् (तृतीय अध्याय), मनुस्मृति (द्वितीय एवं सप्तम अध्याय), कठोपनिषद्, (प्रथम अध्याय), किरातार्जुनीयम् (प्रथम अध्याय), शकुनासोपदेश, भारतीय दर्शन की मूल अवधारणाएँ, सांख्यकारिका (उ० प्र० संस्कृत संस्थान द्वारा संस्कृत साहित्य पुरस्कार से सम्मानित) श्रीमद्भगवद्गीता (प्रथम एवं द्वितीय अध्याय), काव्यदीपिका अष्टम शिखा, अपरीक्षितकारकम्, भारतीय संस्कृति के मूलतत्त्व, स्वप्नवासवदत्तम्, बृहदृक्सूक्त चन्द्रिका, संस्कृत-बोधकथामञ्जरी, वेदान्तसार, संस्कृत निबन्ध-चन्द्रिका, संस्कृत साहित्य का इतिहास, मित्रलाभ, अभिज्ञानशाकुन्तलम् (प्रेस में)।

अन्य–लगभग ३५ शोधलेख २५ सामान्य लेख विभिन्न पत्र पत्रिकाओं में प्रकाशित। आकाशवाणी बांसवाडा और उदयपुर से वेद संस्कृत एवं अन्य समसामयिक विषयों पर २५ से अधिक वार्ताएँ प्रसारित।

पुरस्कार– (क) राजस्थान संस्कृत अकादमी द्वारा नवोदित प्रतिभा पुरस्कार 'स्नातक संस्कृत सरला' कृति पर १९९७।

(ख) महाराणा मेवाड फाउण्डेशन , उदयपुर द्वारा हारीत ऋषि सम्मान १९९८।

(ग) अखिल भारतीय अग्रवाल सम्मेलन, दिल्ली द्वारा संस्कृत शिक्षा के क्षेत्र में उल्लेखनीय योगदान हेतु राष्ट्रीय स्तर पर सम्मानित १९९८।

(घ) सर्वधर्म सद्भावना युवा मंच, बांसवाडा द्वारा संस्कृत प्रचार के क्षेत्र में प्रशंसनीय कार्यों के लिए जिला स्तर पर सम्मानित १९९९।


(ङ) रेड एण्ड व्हाइट द्वारा अष्टम ब्रेवरी अवार्ड्स के अवसर पर संस्कृत शिक्षा के प्रचार के क्षेत्र में सरायनीय योगदान हेतु ब्रेंजो अवार्ड से सम्मानित १९९९।

(च) संस्कृत प्रचार प्रसार के क्षेत्र में उल्लेखनीय योगदान हेतु राजस्थान सरकार की ओर से स्वतन्त्रता दिवस के अवसर पर जिलास्तर पर सम्मानित २०००।

(छ) उ० प्र० संस्कृत संस्थान, लखनऊ द्वारा सांख्यकारिका कृति पर ''संस्कृत साहित्य पुरस्कार'' से पुरस्कृत २०००।

सम्पर्क-सूत्र- शास्त्रि-निलयम्, १-जे-३८ हाउसिंग बोर्ड कॉलोनी, बांसवाडा (राज) ३२७००१।

दूरभाष: 02962~250026



प्रकाशक
धर्म-नीराजना प्रकाशन
114, समाचार अपार्टमेण्ट्स
दिल्ली - 110091



